ISSN 0976-8645

# JAHNAVI SANSKRIT E-JOURNAL

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal]

*A portal of Sarasvatniketanam*

## द्वात्रिंशे अङ्के भवतां समेषां मङ्गलाभिनन्दनम्।




www.sarasvatniketanam.org , www.jahnavisanskritejournal.in



| | |
|---|---|
| **मुख्यसम्पादकः** | विद्यावाचस्पति-डा.सदानन्दझाः । |
| **पुनर्वीक्षकाः** | डा. अशोकचन्द्रगौडशास्त्री, डा. त्रिलोकझा, डा. अनिलप्रतापगिरिः । |
| **विशिष्टपुनर्वीक्षकाः** | Dr. PK Wendabona, Department of Basic Principles, Institute of Indigenous Medicine University of Colombo, Rajagiriya Sri Lanka |
| **सम्पादकाः** | डा. रामसेवकझाः, डा. राधावल्लभशर्मा, डा. श्रीनाथधरद्विवेदी, श्रीश्यामबाबू, श्लेषासचिन्द्र, डा. राजनमिश्रः, **डा. दिनशचन्द्रपाण्डेयः** डा. बिपिनकुमारझाः । |
| **प्रकाशकः** | डा. बिपिनकुमारझाः । |
| **प्रकाशन-सम्पादनसहायकाः** | डा. मीनाक्षीजोशी, सुश्रीगायत्रीशर्मा, डा. सुमनदीक्षित, डा. सरिताश्रीवास्तव, श्री सुमित-आनन्दः, ह्युमेशः, रोहितस्याण्टा, पुष्पराजः। |
| **प्रतिनिधयः (लोकार्पणसन्दर्भे)** | डा. रामसेवक झा। |
| **तकनीकिप्रवन्धनसहायकः** | रित्ज़ वेब होस्टिंग, बंगलोर, अंकुशः। |



सारस्वत-निकेतनाख्या संस्कृतसेवासरणिः पूज्यगुरुपादैः कीर्तिशेषैः राष्ट्राधीशपुरस्कृतैः **देवानन्दझावर्य्यैः** प्रातस्मरणीयैः स्वनामधन्यैः राष्ट्राधीशपुरस्कृतैः **तुलानन्दाऽपरनामनारायणझावर्य्यैश्च** उद्घाटिता विद्यावाचस्पत्युपाधिभाक्-सदानन्दझाऽनुगता एषा सरणिः बिपिनझाद्वारा संस्कृतानुरागिसहयोगैः विविधेषु रूपेषु संस्कृतप्रचार-प्रसाराय सन्नद्धा वर्तते तेषु रूपेषु एवायं प्रबन्धः जाह्नवी संस्कृत ई जर्नलनाम्ना विश्वेऽस्मिन् प्रथितः।



JAHNAVI-A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual (Sanskrit, Hindi & English) Journal with Impact Factor.

## विषयानुक्रमणिका



| | | | |
|---|---|---|---|
| I | प्रस्फुटम् | | |
| 1 | सम्पादकीयम् | विद्यावाचस्पतिः डा. सदानन्दझा | मुख्यसम्पादकः |
| 2 | प्रकाशकीयम् | डा. बिपिनकुमारझा | प्रकाशकः सम्पादकश्च |
| II.A | साहित्यानुरागः | | |
| 1 | Thoughts for Right to Equality in Vedic Tradition | Dhananjay Vasudeo Dwivedi | Assistant Professor, Department of Sanskrit, Ranchi College, Ranchi, Jharkhand. |
| 2 | संस्कृतकाव्येषु वक्रोक्तिसौन्दर्यम् | नीलमाधवः प्रधानः | शोधछात्रः, राष्ट्रियसंस्कृतसंस्थानम्, गुरवायूरपरिसरः, केरलम् |
| 3 | ज्योतिषे आजीविकाविचारः | हरिनारायणधरद्विवेदी | सहायकाचार्यः, राष्ट्रियसंस्कृतसंस्थानम् वेदव्यासपरिसरः (हि.प्र) |
| 4 | ऋतूनां कुसुमाकरः | रामसेवकझाः | प्राध्यापकः,संस्कृत-विभागः, वाटसन+2विद्यालयः,मधुबनी। |
| 5 | संस्कृतसाहित्ये मानवीयमूल्यानि | श्रीकृष्णशर्मा | शोधछात्रः, शिक्षाशास्त्रम्, राष्ट्रिय-संस्कृत- संस्थानम् , जयपुरपरिसरः| |
| 6 | कालिकापुराण में ब्रह्मपुत्र की उत्पत्ति, ऐतिहासिकता का वर्णन | विवेकशर्मा | सहायकाचार्यः, संस्कृतविभागः हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः, धर्मशाला, जिला कांगड़ा, हिमाचलप्रदेशः |
| 7 | रससूत्र-व्याख्या का तुलनात्मक अध्ययन | मीनाक्षी जोशी | संस्कृत प्राध्यापिका, खरगोन, मध्यप्रदेश |
| 8 | अध्यापन में नवीन प्रवृत्तियों की भूमिका ई अधिगम के सन्दर्भ में | प्रेमसिंह सिकरवार | सहायकाचार्य, श्री लाल बहादुर शात्री राष्ट्रिय संस्कृतविद्यापीठ, नई दिल्ली |
| 9 | पाठ्यचर्यायां दार्शनिकविचारधारा: | ऋषिराजः | सहायकाचार्यः,शिक्षा-शास्त्रविभागः राष्ट्रियसंस्कृतसंस्थानम्,(सम विश्वविद्यालयः), एकलव्यपरिसरः,राधानगरम्,अगरतला- त्रिपुरा पश्चिम् |

| | | | |
|---|---|---|---|
| 10 | Purushasukta -The Hymn of Thermodynamics | Mahesh | Research Scholar #2780 Sector-3, Rohtak |
| 11 | व्याकरणशास्त्राभिमतं कालस्वरूपम् | मधुकेश्वरभट्टः | सहायकाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली |
| 12 | प्रयोगधर्मी एवं क्रान्तिकारी कवि –हर्षदेव माधव | राधावल्लभ शर्मा | सहायकाचार्य, साहित्य विभाग, वेदव्यास परिसर. रा.सं.सं., बलाहर, हिमाचलप्रदेश |
| 13 | कालिदासीयकाव्येषु वक्रोक्तिचिन्तनम् | अनुराधामल्लिक् | शोधच्छात्रा, राष्ट्रियसंस्कृतसंस्थानम्, गुरुवायूरपरिसरः, केरलम् |
| 14 | उपमालङ्कारस्य सामान्यपरिचयः | अनुपमामल्लिक् | शोधच्छात्रा, श्रीसदाशिवपरिसरः, राष्ट्रियसंस्कृतसंस्थानम्, पुरी परिसरः |
| 15 | आचार्यमम्मट मतानुसार ध्वनिनिरूपण। | स्वीटी | शोधच्छात्रा, वेदव्यास परिसर, हिमाचल प्रदेश। |
| 16 | हिमाचलीयोपभाषायाः उत्पत्तिः | योगेश-अत्रिः | संस्कृत प्राध्यापक, शेरला,पत्रालयः–जावली,कसौली, सोलन,हिमाचलप्रदेशः |
| 17 | देशभाषिकशब्देषु विकृतयः | गायत्रीशर्मा | शोधच्छात्रा, राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसरः बलाहरः, हिमाचलप्रदेशः। |
| 18 | संक्रान्तिविचार | आशुतोष कुमार झा | संस्कृत प्राध्यापक, आ. सं. महाविद्यालय, रमौली, दरभंगा, बिहार। |
| 19 | गोमेधयज्ञस्य महत्वम् | ब्रजेशकुमारझाः | शोधच्छात्र, श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृतविद्यापीठ, नई दिल्ली |
| 20 | वृत्ति-रीति-प्रवृत्तीनां स्वरूपं तद्गतभेदश्च । | रमेशचन्द्रनैलवालः | शोधच्छात्रः, जवाहरलालनेहरूविश्व-विद्यालय, नई दिल्ली |
| 21 | शिक्षण प्रक्रिया में योग शिक्षा की उपादेयता | प्रदीप कुमार झा | सहायकाचार्य, श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृतविद्यापीठ, नई दिल्ली |




[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani

# प्रस्फुटम्

# सम्पादकीयम्



विद्यावाचस्पति डॉ. सदानन्द झा[1]

शिवशिरसि वसन्ती संविदानन्दनीरा
हृदय कलुषपुञ्जं प्रक्षिपन्ती विदूरे
सघन तमसि दिव्यं ज्योतिरालोकयन्ती
प्रसरतु भुवि भव्या जाह्नवी काऽपिधन्या॥

अये विविधविद्याविद्योतितान्तःकरणा नानाविद्यार्थिवृन्दसमुपास्यमानचरणा-ज्ञानप्रभाध्वस्ताऽज्ञानाऽऽवरणनिर्मलमनसः पाण्डित्यपराजितसंस्कृतबद्धरतयः विद्वन्मणयः महाकवयः सुरसरस्वतीकमलानुरागिणः पाठकाश्च।

विश्वस्य प्रथमान्तर्जालीयसंस्कृतत्रैमासिकजान्हव्याः द्वात्रिंशदङ्कमिमं तत्र भवतां श्रीमतां सुरभारतीसततसमुपासकानां पण्डितमार्तण्डानां करकमलयोः समुपस्थापयन् नितरां प्रमोदमनुभवामि।

प्रारंभकालादेव प्रस्तुतपत्रिकायाः लोकार्पणकार्यक्रमः देशे-विदेशे च तत्रस्थितैः प्रख्यातविद्वद्भिः कृतः। एतत्परम्परायां मधबनीनगरे अपरसमाहर्ताश्रीदुर्गानन्दझामहोदयद्वारा विविधकार्यक्रमव्यस्तेनापि पत्रिकालोकार्पणकृते कृपानुमतिः प्रदत्तास्ति। एतदर्थं तान् प्रति श्रद्धया स्तवीमि।

जान्हव्याः संकलनसम्पादनमुद्रणाधिभारः प्रारंभकालादेव विभिन्नराज्यस्थितानां कतिपयसारस्वतसाधकेषु न्यस्तः तेषां विशेषानुरोधादहं धुरिनियोजितः सोत्साहं सानन्दं तमङ्गीकृतवान्। यतोहि आशैशवादेवसंस्कृतप्रचारप्रसारकार्ये बद्धपरिकरोऽहम्।

वस्तुतः राष्ट्रियान्ताराष्ट्रियानां शतशो ख्यातिलब्धविदुषां साहाय्येनेयं पत्रिका विश्वविद्यालयानुदायोगेन अन्ताराष्ट्रियमानकपत्रिकारूपेणोररीकृतेति मोमुद्यते मे मनः। प्रस्तुताङ्के यद्यपि विभिन्न प्रान्तेभ्यः कृतभूरिपरिश्रमाणां पण्डितानां शोधपूर्णाः नानाशास्त्रीयनिबन्धा सम्प्राप्ताः परमोपादेयास्तथापि संस्कृतसाहित्ये चम्पूकाव्यानां परिचयः, उपमालङ्कारस्य सामान्यपरिचयः, कालिदासीयकाव्येषु वक्रोक्तिचिन्तनमित्यादयः विदुषामानन्ददायकाः वर्तन्ते। येषां सारस्वतयज्ञपुरुषाणां शास्त्रीयाः शोधपूर्णाऽऽलेखाः प्रकाशनाय सम्प्रेषिताः अतस्तेभ्यः हार्दिकी कृतज्ञतां प्रकटयति समस्तजाह्नवीपरिवारः।

जानन्त्येव श्रीमन्तः संस्कृतपत्रिकासंचालनकार्यं तथैव कठिनं यथैव मणिमण्डितव्यालस्य परिष्करणम्। किन्तु कतिपयबद्धपरिकराणामाचार्यणामवलम्बमासाद्य पत्रिका शुक्लपक्षीयाकलेव वर्धते वर्द्धिष्यते चेति मे दृढीयान् विश्वासः। यथा भगवतो पार्वतीजानेः महेश्वरस्य जटातः प्रवहन्ती भगवती जन्हुतनया जाह्नवी त्रैलोक्यं पुनाति मज्जतां मनोनिर्मलं प्रसादयति मुक्तिपथं तथैवेयं जान्हव्यपि पत्रिका सुरभारती समुपासकानां संस्कृतानुरागिणां च मनसि दिव्यसौरभप्रसादं निधत्तामिति वयं कामयामहे।

[1] पत्रिकायाः मुख्यसम्पादकः।





आशासे अवश्यमेव शास्त्ररसिकाः गवेषकाः संस्कृतप्रचार-प्रसारबद्धपरिकराश्च लाभान्विताः भविष्यन्ति अन्ते सकलजाह्नवी परिवारः बद्धकराञ्जलिः समेषां प्राणिनां दीर्घायुष्ट्वलपुष्टिनैरुज्यप्राप्तिकामाय, सुभद्रासहितं साग्रजमनाथनाथं जगन्नाथं प्रार्थयते।

श्रुतिध्वनिमनोहरा मधुरसा शुभा पावनी
स्मृताप्यतनुतापहृत् समवगाहसौख्यप्रदा।
निषेव्यपदपङ्कजा विवुधवृन्दमान्याऽमला
समस्तजगतीतले प्रवहतादियं जाह्नवी

विद्वच्चरणचञ्चरीकः
झोपारव्यः सदानन्दः

लखनौरम, विहारः
महाशिवरात्रिः

# प्रकाशकीयम्



डा. बिपिनकुमारझा[2]

यस्याः प्रभावमतुलं भगवाननन्तो,
ब्रह्माहरश्च नहि वक्तुमलं बलञ्च।
सा चण्डिकाऽखिलजगत्परिपालनाय,
नाशाय चाशुभभयस्य मतिं करोतु॥

अत्र नास्ति काचिद्विचिकित्सा यत् ज्ञानं समाजविकासार्थं विविधाधिव्याधिनिवारणाय एकं महनीयं साधनमस्ति। तत्र यत्र इह विचित्रचित्रहेत्वाभासादिचाञ्चल्यावस्थापूर्णप्रपंचे मनुजपुत्राः ऐहिकभोगेषु संलिप्ताः सन्दृश्यन्ते, अस्य महत्वमितोऽपि वर्धितं साम्प्रतिके युगे। कालैः सह विकाससोपानानि वर्धितानि। नूतनं दृष्टिकोणमपि समापतत्। अत्र विचारणीयः भवति यत् विकासस्य स्वरूपं सर्वांगीणमस्ति न वा ? यथा- विषसम्पृक्तमधु अपि प्राणघातकं भवति न तु तदमृतम्। अतः रचनात्मकविकासः भवेत्। येन सर्वे आनन्दिताः भवेयुः। विकासार्थमावश्यकं यत् ये नियमाः सन्ति ते आचरणे भवेयुः। आचरणे यावत् न भवति तावत् समाजस्य समुन्नतिः नैव भवितुमर्हति। सन्दर्भेस्मिन् विभिन्न पत्र-पत्रिकादिमाध्यमेन प्रजानां विचारः प्रस्फुटितो जायते। तदाधारीकृत्यैव नूतनदिशा-निर्देशः प्रचष्टे। पत्रिकेयमपि व्यावहारिकी शिक्षा यथा स्यात् तथा प्रयतमाना अस्ति। प्रयत्नः तावत् त्रिविधः-

प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम्।
एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिदर्शितम्।

अस्यां श्रृङ्खलायामेव नूतनाङ्कोऽयं सम्प्रकाशितः। ईश्वरकृपया कार्यमिदं साफल्यं संजायते इति मन्ये। सम्प्रति UGC द्वारा प्रकाशितप्रामाणिकशोधपत्रिकाया: सूची इत्यत्र 41039 क्रमे जाह्नवीपत्रिकाया: क्रम: वर्तते। तत्रापि Impact Factor अपि इयं पत्रिका प्राप्तवतीति एतदर्थमनारतं ये सहायकाः तेभ्यो हार्दान् धन्यवादान् प्रकटीकरोमि। सारस्वतकर्मण्येऽस्मिन् ये महामान्या: सुविज्ञाः पण्डिताः साहाय्येन सनाथीकृतवन्तः तेभ्यः महानुभावेभ्यः प्रणतिपूर्वकं

[2] प्रकाशकः सम्पादकश्च



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani
ISSN 0976-8645

प्रणामाञ्जलिमर्पयामि । अन्येभ्यस्सहायकेभ्यः वाग्व्यापारैः भूयोभूयः धन्यवादान् व्याहृत्य भगवन्तमुपास्यदेवं सम्प्रार्थ्य विस्तरात् विरमामि ।

दुर्जनः सज्जनो भूयात् सज्जनः शान्तिमाप्नुयात्
शान्तो मुच्येत बन्धेभ्यो मुक्तश्चान्यान् विमोचयेत्।

भवदीयः

बिपिनकुमारझा

मातृभाषादिवसः

बलाहरस्थ-वेदव्यासपरिसरः, हिमाचलप्रदेशः

# साहित्यानुरागः



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani 0976-8645

Paper Received- **19/01/2018** Paper Published- **22/02/2018**

## Thoughts for Right to Equality in Vedic Tradition

**Dhananjay Vasudeo Dwivedi**

Assistant Professor, Department of Sanskrit,
[Ranchi College, Ranchi, Jharkhand, Pincode-834008]

*****************************************************************************************

**Key word -** Shrimad Bhagvad Gita, Human Rights, United Nations

**Abstract**

The General Assembly of the United Nations (UN) adopted Declaration of Human Rights in 1948. Though the declaration deals with many aspects of rights, special focus was given to the Right to Equality. This type of right might be new concept for the entire world, but by going through Sanskrit Literature, it is loud and clear that Right to Equality is an age old concept for us. Vedas have established the fact that all human being should be treated equally. They direct that all people should share the means of happiness equally. Vedic seers have made it clear that all human beings are son of Mother Earth. If this is the fact, we are left with no other option but to develop the feeling of universal brotherhood. Shrimad Bhagvad Gita directs to seek refuge in the evenness of mind. The Riga Veda asks human beings to move together, speak together, make minds of one accord. It also asks to live together with harmony and fellow feeling. Manu Smriti says that rulers should support all without any discrimination.

*****************************************************************************************

Human Rights are essential for all the individuals as they are consonant with freedom and dignity and are conducive to physical, moral, social and spiritual welfare. Much focus has been given on the protection of human rights in recent times. In modern era, the concept of these rights was discussed systematically first time by the General Assembly of the United Nations (UN). The Assembly adopted Universal Declaration of Human Rights in 1948.

Though the declaration deals with many aspects of rights, but special focus was given to the Right to Equality. Two articles of the declaration are related to the Right to Equality. These are[1]- Article-1- All human beings are born free and equal in dignity and rights. Article-7- All are equal before the law and are entitled without any discrimination to equal protection of the law. The Right to Equality constitutes one of the elements of the basic structure of the Constitution of India, which cannot be amended or altered even by the Parliament, as stated by the Supreme Court of India in the case-Keshvananda Bharati vs. Union of India (AIR 1973 SC 1461). The Right to Equality and the prohibition against discrimination are incorporated in Article 14, 15 and 16 of the Constitution of India.

However, in Vedic Tradition, thoughts for Right to Equality have been an age old concept. The idea of equality has been part and parcel of Indian Tradition from the *Vedic* times. Be it *Vedic* Literature or Classical *Sanskrit* Literature, thoughts for equality has been given special emphasis. Seers and poets have talked about following the code of conduct, which would be helpful in establishing the Right to Equality. Here one has to understand that the

philosophical approach of understanding co-existence and tolerance is the very spirit of our ancient thought.

The Right to Equality, is perhaps, the most valuable right, without which happiness is impossible. *Vedas* have established the fact that all human being should be treated equally. They unequivocally advocate equality for all without any distinction of colour or race or language. In fact, *Vedas* acknowledge right from eternity that human community has to be a multi-lingual and multi-sectarian society[2]. But then, *Vedas* proclaim, that all are sons and daughters of Almighty God[3]. Nobody is big or small, high or low, senior or junior, great or downtrodden. All are equal before Almighty God[4]. A *Vedic Ṛṣi* says that one should try to live together in a friendly manner[5]. *Vedas* recommend equal respects to elders, youngsters, youth and ages, and exhort that all should contribute their mite in the performance of *Yajña*[6]. They direct that all people should share the means of happiness equally. It is said-

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।

सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्।।'' [7]

i.e. Let all be happy, let all free from diseases, let all see auspicious things, let nobody suffer from grief.

The scriptures have pointed out that just as a man never conceives his own head, hands and other limbs as belonging to anyone else, a person should not regard his fellow creatures as distant from himself-

''यथा पुमान् न स्वाङ्गेषु शिरःपाण्यादिषु क्वचित्।

पारक्यबुद्धिं कुरुते एवं भूतेषु मत्परः।।'' [8]

The scriptures have also established the fact that one should see the Supreme God in all animate and inanimate creation. Lord *Kṛṣṇa* says in *Gitā*-

''समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।

विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति।।'' [9]

i.e. He who sees the Supreme Lord as the only imperishable substance abiding equally in all perishable beings, beholds the reality. *Yajurveda* has expressed similar views. It says that those who practice equality lead a peaceful life-

''यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति।

सर्वभूतेषु चात्मानं ततो न विचिकित्सति।। [10]

that is one who sees all creatures as if they were his ownselves and himself in others, his mind rest in peace with no doubts to disturb it.

*Vedic* seers have made it clear that all human beings are son of Mother Earth-

''माता भूमिः पुत्रो अहं पृथिव्याः।' [11]

If this is the fact, we are left with no other option but to develop the feeling of universal brotherhood. The union of liberty and equality can be achieved by the power of human brotherhood.[12]

The concept of brotherhood as described in Indian Tradition is not restricted to the people of India only. It embraces the whole human race, as can be seen from common prayer sung by ancient seers-



[A First International Electronic Peer-reviewed Quarterly Refreed **UGC Approved** (41039 ) Sanskrit Tri-lingual Journal with **Impact Factor**]
**Available at-** www.jahnavisanskritejournal.in **Issue**-32nd , **Year** 08, **Vol** -I, **Date**-22/02/2018, **Place**- Madhubani
ISSN 0976-8645

''मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्।

मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।

मित्रस्य चक्षुषा समीक्षामहे।।''[13]

i.e. O God! The dispeller of ignorance and darkness, strengthen me, may all beings regard me with the eye of a friend. May I regard all beings with the eye of a friend. With the eye of a friend, we should regard one another.

*Vedic* seer says-

''अभयं मित्रादभयममित्रादभयं ज्ञातादभयं पुरो यः।

अभयं नक्तमभयं दिवा नः सर्वा आशा मम मित्रां भवन्तु।।'' [14]

i.e. May we be fearless of our friends and even of those who are unfriendly to us, may we never fall in dread of whom we know and even of those whom we do not know, my we remain free from any apprehensions by night and in the day time, and may all the quarters be friendly to us. All have equal rights over food, clothing and shelter and this fact is well established in *Atharvaveda*. The *Ṛṣi* says that all the enjoyable wealth that is hidden in the bowels of the earth is meant to be unearthed for the enjoyment of one and all who are born of the mother's womb, those who are *'Matṛmat'*. What a novel idea of saying that provision for food, clothing and shelter is everybody's birth right[15]. In fact, 'He is my brother and he is not'- such a thought are of mean minded people as per Indian Tradition. For broad minded people, the whole earth is like a family.-

अयं निजः परो वेति गणना लघुचेतसाम्।

उदारचरितानान्तु वसुधैव कुटुम्बकम्।।'' [16]

Keeping in mind above facts, *Vedic* seers considered the whole universe as a single unit in spite of apparent differences-

''इमे लोका इमे देवा इमानि भूतानीद सर्वं यदयमात्मा।।'' [17]

i.e. All these worlds, these Gods, these beings and all this, these are but the self alone. This idea is presented symbolically in the *Vedic suktas* like *Puruṣa Sukta*, *Nārāyaṇa Sūkta* etc[18]. This is again presented in the *Purāṇas* in the creation theories of Lord-

''एवं रजः प्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः।

सृजत्यमोघसङ्कल्प आत्मैवात्मानमात्मना।।''[19]

The Lord has projected the world out of himself. He himself is the material and instrumental cause for this universe. In the *Śrimad Bhagvad Gitā*, the Lord says-

''अहमात्मा गुडाकेश सर्वभूताशयस्थितः।

अहमादिश्च मध्यं च भूतानामन्त एव च।।'' [20]

i.e. I am the self seated in the hearts of all beings. Therefore according to out *Shastras*, all living beings are essentially identical although we make distinctions of each species based on certain arbitrary norms.

Our ancient seers have opined that all living beings and even the inert materials are part and parcel of the cosmic body of the Lord and they have their respective place and identity and we have got to respect the same. Any damage caused by one limb to another limb will affect

the whole structure, for all belong to one single unit. It has been further added in *Śrimad Bhāgvad Mahāpurāṇa*-

''द्विषन्तः परकायेषु स्वात्मानं हरिमीश्वरम्।

मृतके सानुबन्धेऽस्मिन् बद्धस्नेहाः पतन्त्यधः।।'' 21

i.e. *Bhagvān Hari* is the indweller in all beings. Therefore those who hate others because of attachment to their mortal body, they fall into hell.

It has been further added-

''अन्तर्देहेषु भूतानामात्माऽऽस्ते हरिरीश्वरः।

सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसौ।।'' 22

i.e. *Bhagvān Hari* indwells his entire creation. The best form of his worship is to understand the entire creation as the Lord Himself.

Recognition of the universe as the body of God is the vision of our *Ṛṣis* and this vision alone can lead to establish the right of equality in real terms.

They have opined that all living beings and even the inert materials are part and parcel of the cosmic body of the Lord and they have their respective place and identity and we have got to respect the same. Any damage caused by one limb to another limb, will affect the whole structure, for all belong to one single unit.[23]

This is why *Śrimad Bhagvad Gitā* directs to seek refuge in the evenness of mind.[24] A person who becomes even minded sees himself in all beings and all beings in himself-

''सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।

ईक्षते योगयुक्तात्मा सर्वत्रा समदर्शनः।।'' 25

Lord *Kṛṣṇa* says that such a *Yogī* is regarded as supreme, who looks on all as one, on the analogy of his own self, and judges pleasure or pain everywhere by the same standard as he applies to himself-

''आत्मौपम्येन सर्वत्रा समं पश्यति योऽर्जुन।

सुखं वा यदि वा दुःखं स योगी परमो मतः।।'' 26

He further adds that those, who are endowed with equanimity are noble. Endowed with equanimity, one frees oneself from vice and virtue. Skill in actions lies in equanimity-

''बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।

तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्।।'' 27

Wise men endowed with equanimity attain the blissful supreme state.[28] The *Upaniṣad* say- you and others are all one, therefore if you harm anyone, you are harming yourself[29]. Discrimination on any ground has to be opposed because it is violation of the *Upanishadic* Philosophy of oneness of all human beings[30]. There is no exaggeration in stating that thoughts preached in *Sanskrit* Literature are good to the welfare of humanity and helpful in establishing Right to Equality. Sparing thought for welfare of others had been given prominence in the *Vedas*. The *Ṛg Veda* proclaims, "Man attains the position of God when he takes care of racked, the sick people, the blind and the cripple."[31]

Going by the *Sanskrit* Literature one would find that it is known far and wide for spreading the noble qualities such as compassion[32], righteousness[33], generosity[34], benevolence[35], respect for humanity[36], love for everyone[37], high sense of duty[38] and





protection of weak and distressed. In effect, these qualities are indispensible for establishing the Right to Equality.

One should never try to promote undue discrimination in the society. *Mahabharata* says that persons, who do so, are working against the concept of *'Dharma'*[39]. Such persons never flourish and also never lead happy life-

न वै भिन्ना जातु चरन्ति न वै सुखं प्राप्नुवन्तीह भिन्नाः।'' 40

*Ṛg Veda* asks human beings to move together, speak together, make minds of one accord. It also asks to live together with harmony and fellow feeling, have conversation without any malice, acquire knowledge having common ideals of life, pray for welfare of all, never develop separatist feeling, always be united, have oneness in resolutions, heart and minds and develop mutual co-operation-

''सङ्गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।

देवा भागं यथा पूर्वे सञ्जानाना उपासते।।

समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।

समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहामि।।

समानी व आकूतिः समाना हृदयानि वः।

समानमस्तु वो मनो यथा वः सुसहासति।।'' 41

In *Atharvaveda*, *Vedic* seers have asked to be alike hearted, alike minded and free from hostility. They say that one must show affection towards other as a cow towards her newly born calf. They ask not to hate each other and speak words auspiciously. They have also made it clear that all have equal rights over articles of food and water. The Supreme Creator, *Parmātmā*, has instructed man to inculcate mutual sympathy, generosity and friendliness. Every human being should be social benefactor-

''सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।

अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या।।

मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा।

सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया।।

येन देवा न वियन्ति नो च विद्विषते मिथः।

तत्कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः।।

ज्यायस्वन्तश्चित्तिनो मा वि यौष्ट संराधयन्तः सधुराश्चरन्तः।

अन्यो अन्यस्मै वल्गु वदन्त एत सध्रीचीनान् वः संमनस्कृणोमि।।

समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनज्मि।

सम्यञ्चोऽग्निं सपर्यतारा नाभिमिवाभितः।

सध्रीचीनान् वः संमनस्कृणोम्येकश्नुष्टीन्त्संवननेन सर्वान्।

देवा इवामृतं रक्षमाणाः सायंप्रातः सौमनसो वो अस्तु।। '' 42

In this way we see that *Vedas* have talked of fraternity and universal brotherhood, which is unparalleled in the world's literature. *Vedic* seers have expected that all people should be mutually bound by love and understanding with each other.

*Mārkaṇḍeya Purāṇa* also echoes similar view. It has been prayed there that all persons may be happy, may express each other's happiness, that there may be welfare of all, all being free from fear and disease; cherish good feeling and sense of brotherhood, unity and friendship-

''नन्दन्तु सर्वभूतानि स्निह्यन्तु विजनेष्वपि।
स्वस्त्यस्तु सर्वभूतेषु निरातंकानि सन्तु च।।
मा व्याधिरस्तु भूतानामाध्यो न भवन्तु च।
मैत्रीमशेषभूतानि पुष्यन्तु सकले जने।। '' 43

This why, in *Śrimad Bhagvad Gitā*, God *Śri Kṛṣṇa* says, "He who bears ill-will to none, and is friendly and compassionate to all without any motive or self-interest, who is free from worldly attachment and egoism, who looks upon pleasure and pain alike, and is forgiving, that is forgives even those who have done him wrong, who is mentally united to me and is ever contended both in the face of gain and loss, who has controlled his self and is fixed in resolve, who has dedicated his mind and intellect to Me, that devotee is dear to Me-

अद्वेष्टा सर्वभूतानां मैत्राः करुण एव च।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी।।
सन्तुष्टं सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धयों मद्भक्तः स मे प्रियः।। 44

Scriptures have also directed the rulers to support all without any discrimination as the earth does-

''यथा सर्वाणि भूतानि ध्रा धरयते समम्।
तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम्।।'' 45

i.e. the king should support all his subjects without any discrimination in the same manner as the earth supports all living beings.

In this very context it has been said that a king who keeps his senses under control and treats everyone alike whether they like or dislike him, is considered a real king[46].

*Nītivakyāmṛtam*, hence, has established the fact, that nothing is better than the concept of equality-

''सर्वसत्वेषु हि समता सर्वाचरणानां परमाचरणम्।'47

*Manu Smṛti* has rightly established the fact that irrespective of age, class or caste to which he belongs, he should fulfill his duties. He should be equal minded towards all living beings irrespective of gender and religion-

"दूषितोऽपि चरेद्धर्मं यत्र तत्राश्रमे रतः।
समः सर्वेंषु भूतेषु न लिङ्गं धर्मकारणम्॥"48

Similar view has been opined in *Bhavabhūti's Uttararāmcharitam*. *Arundhati* says-

''शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा





विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति।
शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतां
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः।।'' 49

i.e. Whether thou art to me a child or a pupil, be that as it may; the supereminence of thy purity consolidates my affection for thee; the childhood or womanhood is not the consideration; verily thou art adorable to the three worlds. In the case of (or with) the virtuous, merits are the object of reverence; neither their sex nor their age. In this way we can say that as per Indian Tradition, equality among all human beings should be established. The concept of equality is essential for ensuring happiness and harmony in the society.

**References**


1. Aggarwal Keshoram (ed), (2002), *Kalyān Kalpataru*, Gita Press, Gorakhpur, 38
2. Acharya Shree Ram Sharma (ed.), (2002), *Atharvaveda*, Brahmavarchas, Hardwar, 12/1/45
3. Deva Acharya Dharma (tr.), (2004), *The Ṛg Veda*, Sarvadesik Arya Pratinidhi Sabha, New Delhi, 10/13/1
4. Ibid, 5/60/5
5. Ibid, 5/60/5
6. Ibid, 1/27/13
7. Tripathi Dr. Brahmanand, (1994), *Prastav Ratnakar*, Chaukhamba Surbharati, Varanasi, 37
8. Vyasa Veda, (1982) *Śrimad Bhāgvata Mahāpurāṇa*, translated by C.L. Goswami, Gita Press, Gorakhpur, 4/7/53
9. Ramsukhdas Swami (ed) (2000), *Śrimad Bhagvad Gitā- Sadhak Sanjeevani*, Gita Press, Gorakhpur, 13/27
10. Chand Devi (tr.), (1980), *The Yajurveda*, Munshiram Manoharlal Publishers Pvt. Ltd., New Delhi, 40/6
11. *Atharvaveda*, 12/1/12
12. AIR 1996 Supreme Court 1765-1807
13. *The Yajurveda*, 36/18
14. *Atharvaveda*, 19/15/6
15. Ibid, 12/1/60
16. Pandey, Dr. Vishvambharnath, (2003), *Suktisaptasati*, Bharatiya Sanskriti Sansthan, Lohardaga, 256
17. Anonymous, (1972), (Samvat 2029), *Brihadaranyakopnishad with Shankar Bhashya*, Gita Press, Gorakhapur, 2/4/6
18. *The Ṛg Veda*, 10/90
19. *Śrimad Bhāgvata Mahāpurāṇa*, 11/5/15
20. *Śrimad Bhagvad Gitā*, 10/20
21. *Śrimad Bhāgvata Mahāpurāṇa*, 11/5/15
22. Ibid, 6/4/13
23. Dwivedi Dr. Dhananjay Vasudeo, (2009), The Concept of Human Rights as Depicted in Sanskrit Literature, Anusandhnika, Vol VII (1), 46
24. *Śrimad Bhagvad Gitā*, 2/49
25. Ibid, 6/29
26. Ibid, 6/32
27. Ibid, 2/50
28. Ibid, 2/51

29. Agarwal Satya P., (2007), The World Peace Agenda, New Age Books, New Delhi, 29
30. Ibid, 42
31. Keshwan K, (2002), Humanity in Vedas and Upanishads in Kalyan Kalpataru, Volume 48(1), 87
32. Valmīki, (1974), *Śrimad Valmīki Rāmāyaṇa*, Gita press, Gorakhpur, 5/38/39 & 6/113/45
33. Verma Dr. Shyam Bahadur & Verma, Dr Madhhu, (2006), Encyclopaedia of Quotations, Prabhat Prakashhan, New Delhi, 1199
34. Ibid, 166
35. Pathak Dr. Jamuna (ed), (1984), *Abhijñānaśākuntalam*, Shree Ghanshyam Das and Sons Publishers, Faizabad, 5/12
36. Mishra, Bhagvan Dutta, (1955), *Śiśupālvadham*, Chaukhamba Vidya Bhawan, Varanasi,16/23
37. Atharvaveda, 3/30/1
38. Pandey Shree Shyama Charan, (1983), *Śrivisṇu-sharmpraṇītam Pañchatantram*, Motilal Banarasidas, 4/42
39. AIR 1996 Supreme Court 1965-1807
40. Vyasa Veda, (1987), (Samvat 2044), *Mahābhāratam*, Gita Press, Gorakhpur, 5/36/56
41. Chaubey Dr. Braj Bihari, (1997), The New Vedic Selection (Part I), Bharatiya Vidya Bhawan, Delhi, 226-230
42. *Atharvaveda*, 3/30/1,3-7
43. Encyclopedia of Quotations, p 776
44. *Śrimad Bhagvadgitā*, 12/13-14
45. Manu, (2005), *Manu Smṛti* edited by Rajveer Shastri, Aarsh Sahitya Prachar Trust, Delhi, 9/31.
46. *Mahābhāratam*, 12/21/13
47. Malviya Ramchandra, (1972), *Shri Somdeovirachitam Nītivākyāmṛtam*, Chowkhamba Vidya Bhawan, Varanasi, 1/5
48. *Manu Smṛti*, 9/31.
49. Kale MR (ed.), (2006), *The Uttarrāmcharitam of Bhavbhūti*, Motilal Banarasidas Publishers Private Ltd., Delhi, 4/11.

## Bibliography

1. Agarwal Satya , (2007), The World Peace Agenda, New Age Books, New Delhi,
2. Keshwan K, (2002), Humanity in Vedas and Upanishads in Kalyan Kalpataru, Volume 48(1).
3. Valmīki, (1974), *Śrimad Valmīki Rāmāyaṇa*, Gita press, Gorakhpur.
4. Verma Dr. Shyam Bahadur & Verma, Dr Madhhu, (2006), Encyclopaedia of Quotations, Prabhat Prakashhan, New Delhi, 1199
5. Pathak Dr. Jamuna (ed), (1984), *Abhijñānaśākuntalam*, Shree Ghanshyam Das and Sons Publishers, Faizabad.
6. Mishra, Bhagvan Dutta, (1955), *Śiśupālvadham*, Chaukhamba Vidya Bhawan, Varanasi,16/23



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani

Paper Received- **20/01/2018** Paper Published- **22/02/2018**

# संस्कृतकाव्येषु वक्रोक्तिसौन्दर्यम्

**नीलमाधवः प्रधानः**

शोधच्छात्रः, राष्ट्रियसंस्कृतसंस्थानम्, गुरवायूरपरिसरः, केरलम्

*****************************************************************************************

**प्रमुखशब्दाः-**साहित्यशास्त्रम्, कुन्तकः, षड्सम्प्रदायाः, वक्रोक्तिः।

**शोधसारः-** संस्कृतवाङ्मये विद्यमानेषु सर्वेषु शास्त्रेषु साहित्यशास्त्रस्य अतीवमहत्त्वं वर्तते। साहित्यशास्त्रे तावत् स्वनामधन्याः प्रतिभासम्पन्नाः कवयः सन्ति। ते सर्वेऽपि साहित्यशास्त्रस्य उत्कर्षता प्रतिपादितवन्तः। साहित्यशास्त्रे षड्सम्प्रदायाः सन्ति। तेषु षड्सम्प्रदायेषु अन्यतमः सम्प्रदायः भवति वक्रोक्तिसम्प्रदायः। वक्रोक्तिसम्प्रदायस्य प्रवक्ता भवति कौन्तकाचार्यः। कुन्तकाचार्येन स्वस्य वक्तोक्तिजीवितमिति पुस्तके वक्रोक्तिविषये सुविस्तारेण चर्चितम्। वक्रोक्तिः इत्यस्य साहित्यशास्त्रे अतीव गूढरूपेण प्रयोगः दृश्यते। साहित्यशास्त्रे ये ये कवयः सञ्जाताः ते तावत् स्वस्य काव्ये महाकाव्ये च वक्रोक्तिः इत्यस्य सुस्पष्टरूपेण चर्चां कृतवन्तः। तदेव मया मम शोधपत्रेऽस्मिन् प्रतिपादितम्।

*****************************************************************************************

वक्रोक्ति एव शब्दार्थयोः उभयोः सामान्यालङ्कारः इति कुन्तकस्य मतम्। शब्दः तावत् विवक्षितार्थकवाचकः एवञ्च अर्थस्तु सहृदयाह्लादकारी स्वस्पन्दः सुन्दरः। तयोः पुनः अलङ्कृति वक्रोक्तिरेव। सा वैद्ग्ध्यभङ्गिभणितिः प्रसिद्ध अभिधाव्यतिरेकिणी विचित्रम् एव अभिधानं वक्रोक्तिः इत्युच्यते।

वैचित्र्यं नाम कविकौशलम्, तस्य भङ्गी भणितिः। शब्दार्थयोः साहित्यं सहितभावविशिष्टं वक्रत्वं नाम अभिप्रेतम्। कुन्तकेन प्रथमतया तावत् वक्रोक्तेः त्रिविधविभाजनं कृतम्। तेषां भेदा-उपभेदानां नामानि अधस्तात् सविस्तीर्णं वर्णनं क्रियते। यथा –

1.शब्दवक्रता, 2. अर्थवक्रता, 3. बन्धवक्रता

**1. शब्दवक्रता** – शब्दवक्रतायाः पुनः भेदत्रयं वर्तते। यथा – i. वर्णविन्यासवक्रता, ii.पदपूर्वार्धवक्रता, iii.पदपरार्थवक्रता।

i. वर्णविन्यासवक्रता – वर्णविन्यासवक्रतायाः षड्भेदाः सन्ति।

क. एकस्य वर्णस्यावृत्तिः,
ख. द्वयोः वर्णयोः आवृत्तिः,
ग. त्रयाणां ततोधिकानां वर्णानाम् आवृत्तिः,
घ. वर्गान्तयुक्तस्पर्शवर्णानाम् आवृत्तिः,
ङ. त, न, ल इत्येषां वर्णानां द्वित्वरूपानाम् आवृत्तिः,
च. अन्तिमस्पर्शवर्णैस्सह रकारयुक्तवर्णानाम् आवृत्तिः,

ii. पदपूर्वार्धवक्रता – पदपूर्वार्धवक्रतायाः एकादशभेदास्सन्ति। यथा –

क. रूढिवैचित्र्यवक्रता, ख. पर्यायवक्रता, ग. उपचारवक्रता, घ. विशेषणवक्रता, ङ. संवृतिवक्रता, च. प्रत्ययवक्रता, छ. आगमवक्रता, ज. वृत्तिवक्रता, झ. भाववक्रता, ञ. लिङ्गवक्रता, ट. क्रियावैचित्र्यवक्रता इति।

iii. पदपरार्धवक्रता – पदपरार्धवक्रतायाः अष्टभेदास्सन्ति। यथा –

क. कालवक्रता, ख. कारकवक्रता, ग. संख्यावक्रता, घ. पुरुषवक्रता, ङ. उपग्रहवक्रता, च. प्रत्ययवक्रता, छ. उपसर्गवक्रता, ज. निपातवक्रता

**2.अर्थवक्रता –** अर्थवक्रतायाः एकः भेदः वर्तते। स च भेदः भवति वाक्यवक्रता। वाक्यवक्रतायाः पुनः एकः भेदः भवति। यथा – वस्तुवक्रता।

3. **बन्धवक्रता –** बन्धवक्रतायाः भेदद्वयं वर्तते। यथा – i. प्रकरणवक्रता, ii. प्रबन्धवक्रता च इति। पुनः प्रकरणवक्रतायाः एवञ्च प्रबन्धवक्रतायाः कतिपयाः भेदास्सन्ति। यथा –

i. प्रकरणवक्रता – क. पात्र-प्रवृत्तिवक्रता, ख. उत्पाद्य-कथावक्रता, ग. उपकार्योपकारकवक्रता, घ. आवृत्तिवक्रता, ङ. प्रासंगिक प्रकरणवक्रता, च. प्रकरण-रसवक्रता, छ. अवान्तर-वस्तुवक्रता, ज. नाटकान्तर्गतनाटकवक्रता, झ. मुखसन्ध्यादि-विनिवेशवक्रता इति।

ii. प्रबन्धवक्रता – क. मूलरस-परिवर्तनम्, ख. प्रकरण-विशेषे कथा-समाप्तिः, ग. कथा-विच्छेदः, घ. नायकैः द्वारा आनुषङ्गिकफलानां प्राप्तिः, ङ. प्रधानकथायाः द्योतकनाम, च. कथासाम्यता, इति।

वक्रोक्तिरेव काव्यस्य जीवनम् इति कुन्तकेन प्रतिपादितम्। यथा –

**विचित्रा यत्र वक्रोक्तिः वैचित्र्यं जीवितायते ।**
**परिस्फुरति यस्यान्तः सा काव्यातिशयभिधा ।।**

पुनः आचार्यकुन्तकेन वक्रोक्तिः इति एतस्य स्वरूपस्य प्रतिपादितम्। उक्तं यथा –

**उभावेतावलङ्कार्यो तयोः पुनरलङ्कृतिः ।**
**वक्रोक्तिरेव वैदग्धभङ्गीभणितिरूच्यते ।।** [3]

वैचित्र्यमित्यस्यार्थो वक्रोक्तिः। तदेव लोकोत्तरचमत्कारकारि अलौकिकः काव्यानन्दजनकम्। अस्यैव वक्रोक्त्यपरनामस्य वैचित्र्यस्य निष्पत्तिप्रकारं प्रदर्शयितुमेव नवीनऽयमलङ्कारग्रन्थो निर्मीयते। तदेव विशिष्टानां बहुनामालङ्कारिकाणां विविधेषु अलङ्कारग्रन्थेषु विद्यमानेष्वपि संस्कृते नवीनस्य वक्रोक्तिजीवितग्रन्थस्य प्रणयनोद्दश्यं वर्णयित्वा कुन्तकेनोक्तम्—

**लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये ।**
**काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते ।।**

रचितपूर्वे कस्मिनपि ग्रन्थे वैचित्र्यस्यास्य व्याख्यानं नास्ति। वैचित्र्यापरनामिकाया वक्रोक्तेः स्वरूपं विविध प्रसङ्गे तेन कुन्तकेन स्वस्य ग्रन्थे बहुधा निरूपितम्। क्वचिदत्र उदाहरं यथा प्रसिद्धप्रस्थानव्यतिरेकि वैचित्र्यम् अथवा शास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकि वैचित्र्यम्। कुत्रापि एतद् कथितं प्रसिद्धभिधानव्यतिरेकि विचित्रैवाभिधा। एवं रूपेण कुन्तकेन वक्रोक्तेः स्वरूपं एताभि अभिरूक्तिः माध्यमेन पर्यवसति इति सर्वमपि सूक्ष्मातिसूक्ष्मं विवेचनं कृतवान् स्वस्य ग्रन्थे।

**काव्येषु वक्रोक्तेः उदाहरणम्**

कविजयदेवस्य प्रणीतः सुप्रसिद्ध गीतिकाव्यम् गीतगोविन्दः इत्यत्र वर्णविन्यासवक्रता दृश्यते। यथा –

**ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे**
**मधुकरनिकरकरम्बितकोकिलकूजितकूञ्जकुटीरे ।**
**विहरति हरिरिह सरसवसन्ते नृत्यति**
**युवतिजनेन समं सखि विरहिजनस्य दुरन्ते ।।**
**उन्मदमदनमनोरथपथिकवधूजनजनितविलापे ।**
**अलिकुलसङ्कुलकुसुमसमूहनिराकुलबकुलकलपे ।।** [4]

[3] वक्रोक्ति.जी. १.१०
[4] गीत.गो.१.३.२.३





अत्र सर्वेषु पद्येषु वर्णानां विन्यासः अतीव चमत्काररूपेण कविना वर्णितः। पद्ये तावत् वर्णानां वारम्बारः प्रयोगः द्वारा एतस्य वक्रता तथा च भिन्नरूपेण वैचित्र्येण शब्दशोभातिशय इति अतीव चमत्काररूपेण प्रतिपादितम्।

भट्टनारायणस्य वेणीसंहारनाटके तावत् प्रथमाङ्कस्य सप्तदशः श्लोके वर्णविन्यासवक्रतायाः प्रयोगः दृश्यते। यथा –

**युष्माहेनपयति क्रोधाल्लोके शत्रुकुलक्षयः ।**
**न लज्जयति दाराणां सभायां केशकर्षणम् ।।**[5]

श्लोकेऽस्मिन् तावत् 'क' वर्णस्य स्वल्पान्तरे ऽऽ वृत्तिर्भवति। तदेव वर्णविन्यासे पदं चमत्कारं जनयति।महाकविकालिदासस्य रघुवंशे तावत् एकस्मिन् श्लोके सर्वेषु पदपूर्वार्थवक्रतायाः भेदेषु पर्यायवक्रता दृश्यते। यथा –

**हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यम्बक एव नापरः।**
**तथा विदुर्मा मुनयः शतक्रतुं द्विवितीयगामी न हि शब्द एष नः ।।**[6]

अत्र पितुः दिलीपस्य अश्वमेधयज्ञस्य अश्वम् अपहरणकारी इन्द्रं कृते तिरस्कार विधाय रघोः देवेन्द्रं कथयति अस्मिन् संसारे यथा पुरुषोत्तमशब्दः नारायणमेव बोधयति, यथा महेश्वरशब्दः त्रिनेत्रं शङ्करमेव बोधयति, तथा शतक्रतुशब्दः मामेव बोधयति, एतत् द्वितीयगामी शब्दः न भवतीति।

पर्यायवाचकः शब्दस्य प्रयोगः द्वारा नारायणं तथा शङ्करस्य कृते येनरूपेण शब्दस्यार्थ बोधयति तत्वत् एव रघोः कृतेमपि शतक्रतुः पर्यायवाचकः शब्दः बोधयति। एवञ्च पर्यायवाचकशब्दस्य प्रयोगेन अत्र चमत्कारः प्रतिपादयति।

पर्यायवक्रतायाः इतोऽपि रघुवंशे महाकाव्ये द्रष्टुं शक्यते। तस्मिन् द्वितीयसर्गे एवम् अस्ति यत् –

**अलं महीपाल ! तव श्रमेण प्रयुक्तमप्यस्त्राभितो वृथा स्यात्।**
**न पापोन्मूलनशक्ति रं हः शिलोच्चये मूर्च्छति मारुतस्य।।**[7]

अत्र महीपालः इति शब्दस्यार्थः समस्त पृथिव्यां यः पालकः स एव, परन्तु तस्मिन् पृथिव्यां पालनकर्ता राजा दिलीपः स्वस्य सत्प्रयत्नात् परमपि गुरुः वशिष्ठस्य गौः रक्षणे असमर्थो भवति। अतः अत्र 'महीपाल' इति शब्दस्य असम्भवार्थः। एवंरूपेण अत्र महीपालः इत्यस्य पर्यायवक्रता भवति।

कालिदासस्य कुमारसम्भवमहाकाव्ये तावत् पदपूर्वार्धवक्रतायाः संवृत्तिवक्रतायाः प्रयोगः दृश्यते। यथा—

**दर्पणे च परिभोग दार्शनो पृष्ठतः प्रणयिनी निषेदुषः ।**
**वीक्ष्म विम्बमनुविम्बमात्मनः कानि न चकार लज्जया ।।** [8]

पुनः वेणीसंहारनाटके षष्ठाङ्कस्य षड्दशतमे पद्ये तावत् वक्रोक्तेः तृतीयभेदस्य प्रत्ययवक्रतायाः प्रयोगः दृश्यते। यथा—

**तस्मिन्कौरवभीमयोर्गुरुगदाधौरध्वनौ संयुगे**
**सीरी सत्वरमागतश्चिरमभूतस्याग्रतः सङ्गरः ।**
**आलम्ब्य प्रियशिष्यतां तु हलिना संज्ञा रहस्याहिता**
**यामासाध कुरूत्तमः प्रतिकृर्तिं दुःशासनारौ गतः ।।**[9]

अत्र प्रयुक्तेषु कुरुत्तमः इति शब्दे तमम् प्रत्ययः विशेषतां प्राप्नोति। अत्र राक्षसः कथयति यत् कौरवेषु दूर्योधनः सर्वश्रेष्ठः अस्ति। अनेन प्रत्ययेन प्रयोगं कृत्वा कविः राक्षसमाध्यमेन प्रतिपादयति यत् सः दूर्योधनः यः कौरवेषु श्रेष्ठतमोऽस्ति। येन भीमः हतः। इयं चमत्कृतिः अनेन प्रत्ययेन भवति।

[5] वे.सं.१.१७
[6] रघु.वं.३.४९
[7] रघु. २.३४
[8] कुमार.८.११
[9] वे.सं.६.२६

कवि हर्षस्य रत्नावली नाटिकायां तावत् एकस्मिन् श्लोके वक्रोक्तेः पदपूर्वार्द्धवक्रतायाः विशेषणवक्रतायाः प्रयोगः दृश्यते। यथा—

**देवि त्वन्मुखपङ्कजेन शशिनः शोभातिरस्करिणा ।**
**पश्याब्जानि विनिर्जितानि सहसा गच्छन्ति विच्छायताम् ।।**[10]

अत्र तावत् उपरोक्त पद्ये अतिव चमत्कारः रूपेण विशेषणस्य प्रयोगः कविना कृता। यद्वारा अत्र वाक्येन अर्थःचमत्कारः आगच्छति।

महाकविकालदासस्य मेघदूतमहाकाव्ये पूर्वमेघे बहुत्र उपचारवक्रतायाः प्रयोगः दरीदृश्यते। तत्र एकस्मिन् श्लोके एवम् अस्ति यत् –

**गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं**
**रूद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः।**
**सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वी**
**तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः।।** [11]

श्लोकेऽस्मिन् अमूर्तअन्धकारे मूर्तपदार्थस्य योग्यसूची-भेदकस्य प्रयोगः उपचारमाध्यमेन कृतं वर्तते। एवं रूपेण ‘सौदामिनी’ इत्यस्य कृते ‘स्निग्ध’ पदेन विशेषणस्य प्रयोगं तावत् उपचारवक्रता भवति।

महाकविमाघविरचितस्य शिशुपालवधमहाकाव्ये कालवैचित्र्यवक्रतायाः प्रयोगः दृश्यते। तत्र प्रथमसर्गे कालवक्रतायाः श्लोकम् अस्ति ।

**स्मरत्यदो दाशरथिर्भवन्भवानमुं वनान्ताद्वनितापहारिण।**
**पयोधिबद्धचलज्जलाविलं विलङ्घयलङ्कां निकषा हनिष्यति।।** [12]

श्लोकेऽस्मिन् ‘हनिष्यति’ इत्यस्य लृटलकारस्य प्रयोगे भूतकालस्य प्राप्ते सति अत्र कालवैचित्र्यवक्रतायाः वैचित्रं दृश्यते।

महाकविकालिदासस्य रमणीयनाटके अभिज्ञानशाकुन्तले संख्यावक्रतायाः प्रयोगः दृश्यते। तत्र प्रथमाङ्के एवम् अस्ति –

**चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं**
**रहस्याख्यायीव स्वनसि मृदुकर्णान्तिकचरः।**
**करौ व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं**
**वयं तत्त्वान्वेषान्मधुकर ! हतास्त्वं खलु कृती।।** [13]

श्लोकेऽस्मिन् राजा दुष्यन्तः स्वस्य कृते ‘वयम्’ इति पदस्य प्रयोगं कृतवान्। अर्थात् अस्मिन् पद्ये कारकवक्रता वर्तते।

कुमारसम्भवे पुरुषवक्रतायाः प्रयोगः एकस्मिन् श्लोके उदाहरणस्वरूपं प्रस्तुयते। तत्र पञ्चमसर्गे –

**अतोऽत्र किञ्चिद् भवतीं बहुक्षमां द्विजातिभावादुपपन्नचापलः।**
**अयं जनः प्रष्टुमनास्तपोधने न चेद् रहस्य प्रतिवक्तुमर्हसि।।** [14]

अत्र श्लोकेऽस्मिन् तावत् ‘अहम्’ (उत्तमपुरुषः) इति स्थाने ‘अयं जनः’(प्रथमपुरुषः) एतस्य प्रयोगः विहितम्। एतदर्थं वक्रतायाः उत्पन्नं जायते। यत् पुरुषवक्रतायाः पुष्टिर्जायते।

उपग्रहवक्रतायाः एकम् उदाहरणं प्रस्तुयते रघुवंशमहाकाव्ये। तत्र नवमसर्गे एवम् अस्ति –

---

[10] रत्नावली. १.२५

[11] मेघ. (पूर्वमेघ) ३७
[12] शिशु.१.६८
[13] अभि. ना.१.२५
[14] कुमार.५.४०





**तस्यापरेष्वपि मृगेषु शरान्मुमुक्षोः कर्णांन्तमेत्य बिभिदे निबिडोऽपि मुष्टिः।**
**त्रासातिमात्रचटुलैः स्मरयत्सु नेत्रैः प्रौढप्रियानयनविभ्रमचेष्टितानि।।** [15]

श्लोकेऽस्मिन् बिभेदे (शिथिलमभवत्) इत्यत्र आत्मने प्रयोगः अतीव चमत्काररूपेण उपग्रहवक्रतायाः सौन्दर्यं प्रदर्शयते।

कुमारसम्भवमहाकाव्ये एकं श्लोकम् अस्ति यत्र वस्तुवक्रतायाः प्रयोगः दृश्यते। तत्र –

**तां प्राङ्मुखीं तत्र निवेश्य तन्वीं क्षणं व्यलम्बन्त पुरो निषण्णाः।**
**भूतार्थशोभाह्रियमाणनेत्राः प्रसाधने सन्निहितेऽपि नार्यः।।** [16]

अस्मिन् श्लोके वस्तुः स्वभाविकस्य सौन्दर्यस्य चित्रं दृश्यते। कविः स्वस्य कल्पनायाधिकं प्रयोगं न कृतवान्। एतदर्थम् श्लोकेऽस्मिन् वस्तुवक्रता भवति।

**उपसंहारः**

वक्रोक्तिः ध्वन्यादीनाम् अभावेनाऽपि काव्यसौन्दर्यम् उत्पादयति। वक्रोक्तिशून्यञ्च काव्यं नीरसं भवति। एतदेव कुन्तकेन वक्रोक्तिः काव्यस्यात्मारूपे प्रतिष्ठापिता। सूक्ष्मातिसूक्ष्मरूपेण विचारणेन प्रतीयते यत् ध्वनिना विना अपि वक्रोक्तिः काव्यस्य सौन्दर्यं वर्धने समर्थाः भवति। एतस्य वक्रोक्तेः प्रयोगेन काव्यस्य सौन्दर्यः कथं वर्धते तत्सर्वमपि उदाहरणपुरस्सरं मया मम शोधपत्रेऽस्मिन् प्रतिपादितम् वर्तते।

**सन्दर्भग्रन्थसूची–**

1. वक्रोक्तिजीवितम्, श्रीमद्राजाजककुन्तकः, व्याख्याकारः - राधेश्याममिश्रः, प्रकाशकः – चौखम्बासंस्कृतसंस्थानम्, १९८३
2. गीतगोविन्दकाव्यम्, महाकविश्रीजयदेवविरचतम्, सम्पादकः – डॉ. रमेशचन्द्रहोता, प्रकाशकः – चिन्मयप्रकाशनम्, प्रयागः, १९९७
3. वेणीसंसहारम्, श्रीभट्टनारायणः, व्याख्याकारः – परमेश्वरदीनपाण्डेय, प्रकाशकः – चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, १९८५
4. रघुवंशमहाकाव्यम्, महाकविकालिदासः, व्याख्याकारः – श्रीहरगोविन्दमिश्रः – प्रकाशकः – चौखम्बा संस्कृतसंस्थानम् , वाराणसी,
5. कुमारसम्भवम्, महाकविकालिदासः, व्याख्याकारः – डॉ. कृष्णा विश्वासः, प्रकाशकः – मान्यता प्रकाशनं, नवदेहली, २०१३
6. रत्नावली, श्रीहर्षः, सम्पादकः – देवेन्द्रमिश्रः, प्रकाशकः – रामनारायणलाल वेनीप्रसादः, इलाहाबाद, १९६४
7. शिशुपालवधम्, महाकविमाघः, टीकाकारः, हरगोविन्दशास्त्री, प्रकाशकः – चौखम्बा विद्याभवनम्, वाराणसी, १९८४
8. अभिज्ञानशकुन्तलम्, महाकविकालिदासः, व्याख्याकारः – रामतेजपाण्डेयः, प्रकाशकः – चौखम्बा संस्कृत सीरीज अफिस, वाराणसी, १९७८
9. मेघदूतम्, महाकविकालिदासः, व्याख्याकारः – डॉ. राजेश्वरप्रसादमिश्रः, प्रकाशकः – अक्षयवटप्रकाशनम्, इलाहाबाद, २०११

---

[15] रघु. ९.५८
[16] कुमार. ८.१३

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani
ISSN 0976-8645

Paper Received- 07/02/2018 Paper Published- 22/02/2018

# ज्योतिषे आजीविकाविचारः

**हरिनारायणधरद्विवेदी**

सहायकाचार्यः, राष्ट्रियसंस्कृतसंस्थानम् वेदव्यासपरिसरः (हि.प्र)

*****************************************************************************************

**प्रमुखशब्दाः-** धर्मः, अर्थः, कामः,मोक्षः, जन्मकुण्डली।

**शोधसारः**

"ब्रह्मनारदवशिष्ठकश्यपमनुसूर्यशौनकव्यासान् ।

यवनं च्यवनं गर्गं नौमि मुनीन् पराशरप्रमुखान्" ।।

अस्मिन् जगति यदा जातकः आगच्छति जन्म वा प्राप्नोति तदा तस्य जीवने कापि चिन्ता न भवति धर्मार्थादि विषयेषु। तत्र धर्मार्थादि विषयाः वर्तन्ते धर्मः,अर्थः,कामः,मोक्षश्चेति। धर्मादिविषये तस्य पितरौ एव चिन्तयन्ति, तस्मात् सः बालकः स्वबाल्यवस्थायां स्वतन्त्रः भवति। शनैः शनैः यदा सः बालः प्रौढतां प्राप्नोति तदा एते विषयाः समक्षं समागच्छन्ति। तदा तस्य चिन्तने व्यहारे च चिन्ताः दृश्यते। एतासु चिन्तासु तस्य मुख्यचिन्ता भवति "आजीविका" इति।

ज्योतिषमाध्यमेन उद्योगचयने जन्मकुण्डल्याः लग्नस्य महत्वपूर्णं योगदानं भवति। लग्नस्य बलत्वं परमावश्यकं भवति। आत्मकारकः ग्रहः यदा बली भवति तदा जातकः यत्र तत्र भ्रमति , सः उत्तमदिशि कार्यं कृत्वा सफलतां प्राप्नोति। लग्नः,लग्नेशः, सूर्यः, सूर्यराशीशः, चन्द्रः, चन्द्रराशीषु, यावन्ताः ग्रहाः शुभयुक्ताः,शुभदृष्टाः, उच्चस्थाः, स्वक्षेत्री मित्रक्षेत्री वा भवति, जातकस्य कार्यक्षेत्रे तावदाधिक्येन सफलता प्राप्तिः भवति।

*****************************************************************************************

विभिन्नाचार्यैः विभिन्नग्रन्थेषु आजीविकासम्बन्धी विषये स्वमत्यानुगुणं प्रतिपादितं यथा "जातकपारिजातः" नामके ग्रन्थे दशमैकादशभावफलाध्याये वर्णितमस्ति यत् आजीविकाविचारः दशमभावातिति।

**"आज्ञामानविभूषणानि वसनव्यापारनिद्राकृषि-**
**प्रवज्यागमकर्मजीनयशोविज्ञानविद्याः क्रमात्।**
**कर्मस्वामिदिनेशवोधनगुरुच्छायासुतैश्चिन्तये-**
**दुक्तानि प्रविहाय पूर्वमशुभे मानी विमानो भवेत्"।।**
**(जातकपारिजात-15.1)**

तथैव **"जातकाभरणम्"** इति ग्रन्थेऽपि वर्णितं वर्तते यथा-

**"व्यापारमुद्रानृपमानराज्यं-**
**प्रयोजनं चापि पितुस्तथैव।।**
**महत्पदाप्तिः खलु सर्वमेतद्**
**राज्याभिधाने भवने विचार्यम्"।।**

इतः ज्ञायते यत् दशम भावात् बहुविधविचाराः क्रियन्ते, तत्रापि मुख्यरुपेण कर्मणः, व्यापारः वा एतेषां विचारः क्रियते यतोहि व्यापारेण, कर्मणा वा सः जातकः आजीविकां प्राप्नोति तया



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani
ISSN 0976-8645

आजीविकया जीवननिर्वहणं यापनं वा करोति। कदाचित् जातकः आजीविकायाः कृते चिन्तापराधीना भवति यत् भविष्ये सः किं कार्यं करिष्यति, केन माध्यमेन च आजीविकां प्राप्स्यति।

**जातकतत्वानुसारम् आजीविका विचारः-**

**"जातकतत्वे"** नामके ग्रन्थे उक्तमस्ति-

**"राज्ये शुभदृष्ट्याधिक्ये व्यापारी"**

दशमभावोपरि शुभग्रहाणां यदि दृष्ट्याधिक्यं भवति तदा जातकः व्यापारी(बिजनैसमैन) भवति तेन च आजीविकां प्राप्नोति। तथैव अग्रे दशमो विवेकः इत्यध्याये वर्णितम् अस्ति-

**"खेशे स्वर्क्षे शुभयुते व्यापारी मानशीलः"**

अर्थात् दशमेशः स्वगृहे शुभग्रहैः युतः भवति तदा जातकः व्यापारेण आजीविकां प्राप्नोति।

**जातकपारिजातः" ग्रन्थानुसारम् आजीविका विचारः-**

जातकः यदा प्रौढः भवति तदा तस्य चिन्तनं भवति यत् अहं केन माध्यमेन स्वाजीविकां प्राप्स्यामि, तस्य एतस्याः शंङ्कायाः निवारणार्थं जातकपारिजातके वर्णितं यत्-

**"अर्थाप्तिःपितृजननीसपत्नमित्रभ्रातृस्त्रीतकजनाद्दिवाकराद्यैः।**

**होरेन्द्वोर्दशमगतैर्विकल्पनीया भेन्द्वर्कास्पदपतिगांशनाथवृत्या"।।**

दशमभावात् अस्माभिः आजीविकायाः विचारः तु क्रियते किन्तु यदि दशमे स्थाने ग्रहः एव न भवति चेत् तदा किं जातकः आजीविकां न प्राप्नोति ? इति न.....

यदि जन्माङ्गे दशमे भावे कदाचित् एतादृशी स्थितिः भवति तदा लग्नात् चन्द्रात् वा दशमे स्थाने यः ग्रहः भवति तस्य ग्रहस्य द्रव्येण तस्य जातकस्य आजीविका भवति। अनेन प्रकारेण लग्नात चन्द्रात् वा दशमस्थ सूर्यः भवति तदा पितुः आजीविका प्राप्नोति। लग्नात् दशमे स्थाने चन्द्रः भवति तदा मातुः, लग्नात् चन्द्रात् वा भौमः भवति तदा शत्रोः जीविका भवति, उपरोक्तानुसारं यदि दशमे बुधः तदा मित्रात्, जीवः भवति तदा भ्रातोः, शुक्रः भवति तदा स्त्रीमाध्मेन, शनिः भवति तदा सः जातकः सेवकात् जीविकां, धनम्, लाभं वा प्राप्नोति। तत्रैव यदि दशमे भावे बह्वः ग्रहाः भवन्ति तदा तस्यां स्थितौ सर्वे ग्रहाः स्व स्व दशायां फलं यच्छन्ति। लग्नात् चन्द्रात् वा दशमे स्थाने कोऽपि ग्रहः न भवति तदा **"भेन्द्वर्कास्पदपतिगांशनाथवृत्या"** अर्थात् लग्नात्, चन्द्रात्, सूर्यात् वा दशमभावस्य अधिपतिः यस्मिन् नवांशे भवति तस्य अधिपतिः यः ग्रहः भवति तस्याः वृत्या आजीविका सः जातकः प्राप्नोति।

श्रीमत्कल्याणवर्मविरचितः ग्रन्थः **"सारावल्याम्"** आचार्याः वदन्ति-

कर्मणि अर्थात् जन्माङ्गे दशमे भावे सूर्यकुजोः संयोगः भवति तदा जातकः आजीविका निमित्तं यदा कार्यारम्भः कृत्वापि सः असफलतां प्राप्नोति तथैव च सः सर्वदा चिन्तितः भवति मनसि अशान्त्याः प्रभावः भवति। किमत्र प्रमाणम्?

"विफलारम्भो भृतको नित्योद्विग्नः प्रधाननृपसेवी।

भूतनयदिवाकरयोः कर्मणि गतयोर्भवेद्विकलः"।। (सारावली 13.9)

एवमेव अस्माकं ज्योतिषशास्त्रे बहुषि ग्रन्थेषु आजीविकायाः विषये विभिन्नज्योतिषाचार्यैः विर्णितम् अस्ति।

**अस्ति कश्चन् ज्योतिषे सुकर्मयोगः तत्र –**

"केन्द्रत्रिकोणगे कर्मनाथे स्वोच्चसमाश्रिते।

गुरुणासहिते दृष्टे स कर्मसहितो भवेत्"।।

(बृहत्पाराशरहोराशास्त्रम्22.13)

कर्मेशः अर्थात् दशमेशः केन्द्रे(1, 4, 7, 10) त्रिकोणे(1,5,9) स्वोच्चे च भवेत् एवं जीवेन युतः दृष्टो वा स्यात् तदा जातकः कर्मशीलः भवति। एतत् तु ज्ञायतेऽपि यः कर्मशीलः भवति सः निश्चयेन सफलतां प्राप्नोति अर्थात् सः व्यापारं प्राप्नोति तेन च आजीविकामपि इति अयं योगः। एवमेव यदि दशमेशः नीचस्थ भवति ,दशमे भावे पापग्रहाः भवन्ति,तथा च **“भावात् भावं”** इति सिद्धान्तानुसारं यदि दशमात् दशमे(दशमेशात् दशमे) यदि पापग्रहः भवति तदा सः जातकः कार्यविहीनो भवति। कार्यं विहीने सति आजीविकापि शून्या अर्थात् तस्य आजीविका साधनं न भवति।

**आजीविका समबन्ध्यन्ययोगाः-**

1. जन्माङ्गे लग्नात् चन्द्रात् वा दशमस्थानस्य अधिपतिः सूर्यस्य नवांशे भवति तदा औषध्या, स्वर्णेन, रत्नैः इत्यादिनां माध्यमेन आजीविका भवति।
2. जन्माङ्गे लग्नात् चन्द्रात् वा दशमस्थानस्य अधिपतिः चन्द्रस्य नवांशे भवति तदा जलोत्पन्नवस्तुमाध्यमेन तस्य जीविका भवति।
3. लग्नात् चन्द्रात् वा दशमाधीशः भौमस्यांशे भवति तदा स्वर्णेन, रजतेन, ताम्बा,पीतल, युद्धेन, कलहेन, व्यापारेण इत्यादि माध्यमेन जातकस्य जीविका भवति।
4. लग्नात् चन्द्रात् वा दशमेशः बुधस्य नवांशे भवति तदा जातकः, काव्येन, पुराणेन, धर्मशास्त्रादिमार्गेण वा तस्य जीविका भवति।
5. लग्नात् चन्द्रात् वा दशमेशः यदि जीवस्य नवांशे भवति तदा ब्राह्मणसेवया, अध्यापनेन, पुराणेन,शास्त्रेण, धर्मेण, नीतिमार्गेण वा इत्यादिमाध्यमेन तस्य आजीविका भवति।
6. लग्नात् चन्द्रात् वा दशमेशः यदि शुक्रस्य नवांशे भवति तदा जातकः स्वर्णेन, यानैः(गाडी), संगीतेन, स्त्रीणां प्रलोभनेन, वा इत्यादि मार्गेण आजीविका प्राप्नोति।
7. लग्नात् चन्द्रात् वा दशमेशः शनेः नवांशे भवति तदा जातकः निन्दितमार्गेण, शिल्पकार्येण, सेवा कार्येण, वैरभावनया वा इत्यादि माध्येन आजीविका प्राप्नोति।

इति एवं प्रकारेण विभिन्नग्रन्थोक्ताचार्याणां मते आजीविका विचारः। अन्ते च पाठकानां कृते यत् ते न केवलं सिद्धान्तान् पठित्वा विचारं कुर्युः अपितु स्वमत्यानुगुणं देशकालपरिस्थित्यानुगुणम् इत्युक्ते एतत् सर्वं दृष्ट्वा विचारयन्तु इति।

धन्यवादः।

**सन्दर्भग्रन्थसूची-**

1. पं. कपिलेश्वरचौधरी पं. मातृप्रसादपाण्डेय च, श्री वैद्यनाथविरचितः “जातकपारिजातः”, चौखम्भासंस्कृतसंस्थान,पोस्ट बाक्स नं. 1139,के. 37/116गोपाल मन्दिर लेन, वाराणसी 221001, सन् 2008
2. डा. सुरेशचन्द्र मिश्रः, महर्षि पराशर प्रोक्त “बृहतपराशरहोराशास्त्रम्”, रन्जन पब्लिकेशन्स, 16 अंसारी रोड. नई दिल्ली-110002, सन् 1999
3. पं. हरिशंकर पाठक, श्रीमन्महादेवपाठकविरचितं “जातकतत्वम्” , चौखम्बा विद्याभवन, पोस्ट बाक्स नं. 1069 वाराणसी-221001
4. डा. मुरलीधरचतुर्वेदी, श्रीमत्कल्याणवर्मविरचिता “सारावली”, मोतीलाल बनारसीदास, बंगलो रोड, जवाहरनगर दिल्ली,110007, सन् 1995

इति शम्।।





Paper Received- **19/01/2018** Paper Published- **22/02/2018**

# ऋतूनां कुसुमाकरः

**रामसेवकझाः**

प्राध्यापकः, संस्कृत-विभागः, वाटसन+2विद्यालयः, मधुबनी।

*********************************************************************************************

**प्रमुखशब्दाः-** राष्ट्रम् , भारतवर्षम्, ऋतवः, वसन्तः।

**शोधसारः**

भारतवर्षं ऋतुप्रधानं राष्ट्रम् अस्ति । सम्पूर्णवर्षे अत्र षड्-ऋतवः भवन्ति । तद्यथा 1.वसन्तः2.ग्रीष्मः3.वर्षा 4.शरदः5.हेमन्तः6.शिशिरश्च। एषु सर्वेषु सर्वे एव ऋतवः रमणीयाः सन्ति। किन्तु वसन्तः ऋतुः सर्वोत्कृष्टत्वं भजते। तदर्थं ऋतुः अयं ऋतुराजः कथ्यते। वसन्तस्य इदं वैशिष्ट्यं दृष्ट्वा भगवता कृष्णेन गीतायां वसन्तः स्वकीयरूपत्वेन वर्णितम्।

**बृहत्साम तथा साम्नां गायत्री छन्दसामहम्।**
**मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः[1] ।।**

श्रीमद्भगवद्गीता भारतीयसंस्कृतेः प्राणभूता वर्तते। भारतीयदर्शनग्रन्थेषु मूर्धन्यं स्थानं विद्यते गीतायाः इति। गीतायाः सर्वेऽपि विषया उपनिषद्भ्य एव विनिसृता। उपनिषदां निगूढं तत्त्वमेव गीतायां भगवताकृष्णेन कमनीय काव्यशैल्या मधुरया च वाण्या वर्णितम्।

*********************************************************************************************

वसन्तऋतुः शिशिरऋतोः पश्चात् चैत्रवैशाखमासयोः भवति। वसन्तऋतुः आगमनात्पूर्वमेव क्षेत्रेषु पीतानि सर्वपुष्पाणि विकसन्ति। अस्मिन् ऋतौ वृक्षेषु वनस्पतिषु च नवीनानि किसलयानि जायन्ते येन ते नवीना इव प्रतीयन्ते।आम्रे मञ्जर्यः आगच्छति। आम्रवृक्षेषु पुनः पुनः उड्डीय 'कुहू' 'कुहू' इति मधुरं ध्वनिं कृत्वा पुरुषाणां स्त्रीणां च मनांसि हरन्ति। एतद् सर्वं द्रष्टुं शक्यते। वसन्ते तडागेषु कमलानि विकसन्ति। कमलेषु भृङ्गः गुञ्जन्ति। वायुः वल्लरीमण्डपं सञ्चालयन् शरीरं संस्पृशन् तीव्रवेगेन कामं वर्धयन्, सुगन्धिं प्रसारयन् मन्दं मन्दं प्रवहति। केनोक्तम्[2]–

**लताकुञ्जं गुञ्जन् मदवदलिपुञ्जन चपलयन् ,**
**समालिङ्गनन्नङ्गं द्रुततरमनङ्गं प्रबलयन्।**
**मरुमन्दं मन्दं दलितमरविन्दं तरलयन् ,**
**रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि ।।**

सामान्यतःसर्वेषु अपि ऋतुषु तत्तपुष्पाणि विकसन्ति तथापि एतद् अतिरिक्तस्य न कस्यापि अन्यस्य ऋतोः पुष्पसमयःइति नाम भवति। तेनेदं ज्ञायते यत् पुष्पाणाम् अनेकेषाम् उद्भवो विशेषतः अस्मिन् एव ऋतौ भवति। वसन्तवर्णनप्रसङ्गे भट्टिकाव्ये कविना प्रोक्तम्[3] –

**न तज्जलं यन्न सुचारु पङ्कजं ,न पङ्कजं तत् यदलीनषटपदम्।**
**न षट् पदोऽसौ कलगुञ्जितौ न यः,न गुञ्जितं तन्न जहार यन्मनः ।।**

वसन्तागमनास्य वर्णनं कृत्वा ऋतुसंहारे कालिदासेन प्रोक्तम्[4]-

**प्रपुल्लचूताङ्करतीक्ष्णसायकः द्विरेफमालाविलसद्धनुर्गुणः।**
**मनांसि वेद्धुं सुरतप्रसंगिनां वसन्तयोद्धा समुपागतः प्रिये ।।**

अर्थात् यथा कश्चन वीरः धनुर्गणस्योपरि शरं निधाय हृदयानि वेद्धुं समायाति तथैवायं वसन्तः। ऋतोऽस्मिन् सुगन्धितवायुप्रवाहेण सर्वा दिशःसुगन्धितः भवन्ति। वसन्तप्रसङ्गे महाकविमाघेनापि

लिखितम्- वसन्ते पलाशेषु रक्तपुष्पामि विकसन्ति। तरुषु कोमलानि किसलयानि विकसितानि पुष्पाणि च दृष्टवा मनः प्रसीदति। तद्यथा[5]-

**नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपंकजम्।**
**मृदुलतान्तलतान्तमलोकयत्स सुरभिं सुरभिं सुमनोहरैः॥**

अस्मिन् ऋतौ नहि केवलं पुष्पेषु एव नवजीवनसंचारो भवति अपितु प्राणिनां एव नवजीवनसंचारो भवति। सर्वेषां मनसि नवचेतना, नवीनाभावना, नूतनमादकता च उत्पद्यते। समयेऽस्मिन् मदलोलुपाः भ्रमराः रसान्वेषणाय रसपानाय च स्वकीयाभिः भ्रमरीभिः सह पुष्पपुष्पेषु गुञ्जन्त्यःभ्रमन्ति। तदर्थं माघेन प्रोक्तम्[6] –

**मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया।**
**मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे॥**

वसन्तऋतौ भास्करस्य आतपः सुखदायको भवति। दिवसाः समशीतोष्णाः भवन्ति। तदर्थं ग्रामवासिनः नगरवासिश्च प्रतिक्षणं नवनवताम् अनुभवन्ति। गीतिकाव्ये महाकविकालिदासेन वसन्तवर्णनं कृत्वा प्रोक्तम्[7] –

**द्रुमाः सपुष्पाःसलिलं सपद्मं ,स्त्रियं सकामाः पवनः सुगन्धिः।**
**सुखाः प्रदोषा दिवसाश्च रम्या, सर्वं प्रिये चारुतरं वसन्ते॥**

ऋतोऽस्मिन् वसन्तपञ्चमी नाम्ना उत्सवः परिपालयामो वयम्। अस्मिन् ऋतौ एव रङ्गानाम् उत्सवः **होलिका** इति भवति। होलिकावसरे जनाःस्त्रियश्च मिलित्वा परस्परं विविधैः रागैः क्रीडन्ति, गायन्ति, नृत्यन्ति हसन्ति च। एतत् सर्वं वैशिष्ट्यं विचिन्त्य एव श्रीकृष्णः गीतायां स्वस्योपमा ऋतुराजेन सह कृतः यत् **ऋतूनां कुसुमाकरोऽस्मि** इति। आयुर्वेदशास्त्रेऽपि वसन्तभ्रमणं पथ्यकरं कथितम्- **वसन्ते भ्रमणं पथ्यम्।** अर्थात् वसन्ते प्रातःकालिकं भ्रमणं लाभप्रदं भवति यतोहि प्रकृतिपदत्तानि सर्वाणि गुणानि अस्मिन् ऋतौ प्रातःकाले वातावरणे विद्यन्ते। वसन्तः मानवजीवने तस्य वाल्यावस्था यथा सुखमयी आनन्दमयी च भवति तथैव सम्पूर्णे वर्षे अयं कालःसर्वेभ्यः प्राणिभ्यः सुखम् उल्लासम् आनन्दञ्च प्रददाति।

वस्तुतः एषः ऋतुः जगतः सर्वेषु प्राणिषु मादकता समायाति, आत्मप्रसन्नतायाः नवसंदेशश्च प्रददाति। आर्याणां सौरवर्षमपि वसन्तऋतौ एव प्रारम्भ्यते तथा च चन्द्रवर्षस्य आरम्भोऽपि अस्मिन् ऋतौ भवति।

अन्ते वक्तुं शक्यते यत् भगवता श्रीकृष्णनेन गीतायां स्वस्य उपमा ऋतुराजेन सह यत् कृतः तत् सत्यमेव भाति।

**सन्दर्भ-सङ्केतः**

1. गीता - 10/35
2. साहित्यदर्पण - 8/4
3. भट्टिकाव्य - 2/ 219
4. ऋतुसंहारे
5. शिशुपालवधे- 6/ 2
6. शिशुपालवधे
7. ऋतुसंहारे

**सन्दर्भग्रन्थसूची-**

1. रघुवंशमहाकाव्यम्, महाकविकालिदासः, व्याख्याकारः–श्रीहरगोविन्दमिश्रः, चौखम्बा संस्कृतसंस्थानम् , वाराणसी, 1990
2. शिशुपालवधम्, महाकविमाघः, टीकाकारः-हरगोविन्दशास्त्री, चौखम्बा विद्याभवनम्, वाराणसी, 1984
3. गीतगोविन्दकाव्यम्, महाकविश्रीजयदेवविरचतम्, सम्पादकः – डॉ. रमेशचन्द्रहोता, चिन्मयप्रकाशनम्, प्रयागः, 1997
4. कुमारसम्भवम्, महाकविकालिदासः, व्याख्याकारः-डॉ. कृष्णा विश्वासः, मान्यता प्रकाशनं, नवदेहली, 2013





5. साहित्यदर्पणम्, टीकाकार- शेषराज शर्मा रेगमी, चौखम्बा प्रकाशन, वाराणसी, 1999
6. संस्कृत-निबन्धशतकम्, डॉ. कपिलदेवद्विवेदीआचार्य, विश्वविद्यालय प्रकाशन, वाराणसी, 2004
7. श्रीमद्भगवद्गीता, गीताप्रेस गोरखपुर, दशम संस्करणम्, 2008

Paper Received- 27/01/2018 Paper Published- 22/02/2018

# संस्कृतसाहित्ये मानवीयमूल्यानि

**श्रीकृष्णशर्मा**
शोधच्छात्रः शिक्षाशास्त्रम्, राष्ट्रिय-संस्कृत- संस्थानम् , जयपुरपरिसरः|

*****************************************************************************************

**प्रमुखशब्दाः-** मानवः, मूल्यम्, व्यवहारः, भारतीयः, संस्कृतिः।

**शोधसारः**

मूल्यानि मानवव्यवहारस्य निर्धारकतत्वानि भवन्ति। मानवजीवनस्याधारो तस्य मूल्यान्येव सन्ति। मानवीयमूल्यानमाधारे एव मानव: स्वप्रगते: सोपानानि प्राप्नोति अन्ते च पूर्णतां प्राप्नोति। मानव: स्वानुभवानामाधारे केषाञ्चित् सामान्यसिद्धान्तानां निर्माणं करोति। ये तस्य व्यवहारस्य पथप्रदर्शका: भवन्ति व्यवहारञ्च निर्दिशन्ति। इमे सामान्यसिद्धान्ता एव 'मानवीयमूल्यानि' इत्यभिधीयन्ते। मूल्यानि मानवस्य कृते दर्पणस्वरूपाणि भवन्ति।

मूल्यमिति पदम् आंग्लभाषाया: Value इत्याख्यस्य अनुवादरूपम्। Value इति आंग्लेयं पदं लेटिन्भाषाया: Valeri इति धातो: निष्पन्नम्। यस्यार्थ: बलवत्वं, शक्तिमत्वं च। भारतीयधर्मग्रन्थेषु मूल्यशब्दस्य प्रयोग: 'शीलम्' शब्दार्थे कृतोऽस्ति। शब्दोऽयं न मूल्यशब्दस्य पर्यायोऽपितु तत्समवाची शब्द:। दर्शनशास्त्रे मनुष्यस्य जीवनं प्रति दृष्टिकोण: 'मूल्यम्' इत्यभिधीयते। भारतीयदार्शिर्नकानां दृष्ट्या मोक्ष: भोगश्चेति द्वे मूल्ये स्त:। भोगार्थिनां व्यवहार: स्वार्थकेन्द्रितो भवति चेत् मोक्षार्थिनां व्यवहार: परमार्थकेन्द्रितो भवति। धर्मशास्त्रे नैतिकनियमा: मूल्यत्वेन परिगण्यन्ते। संस्कृतसाहित्ये मानवीयमूल्यानि सम्यग् रूपेण उपलभ्यन्ते। किं बहुना संस्कृतसाहित्यं मानवीयमूल्यानामुपरि एव आधारितं दृश्यते।

*****************************************************************************************

यजुर्वेदे पर्यावरणसंरक्षणस्य राष्ट्रसंरक्षणस्य च भावना सङ्कल्पिता अस्ति, मनस: शिवसङ्कल्पस्य कामनाऽपि निगदिता, तत्रैव विश्वकल्याणाय स्वस्तिवाचनमपि तत्र प्राप्यते यथा -

**शिवोभव प्रजाभ्यो**
**मानुषीभ्यस्त्वमङ्गिर:।**
**सा द्यावापृथिवी अभि**
**शोचीमर्मान्तरिक्षं मा वनस्पतीन्।।[17]**
**येन कर्माण्यपसो मनीषिणो**
**यज्ञे कृष्वन्ति विदथेषु धीरा:।**
**यदपूर्वं यक्षमन्त: प्रजानां**
**तन्मे मन: शिवसङ्कल्पमस्तु।।[18]**

**आ नो भद्रा: क्रतवो यन्तु विश्वतो दब्धासोऽपरीतासऽउद्भिद:।**
**देवा नो यथा सदमिद् वृधेऽअसन्न प्रायुवो रक्षितारो दिवेदिवे।।[19]**

---

[17] यजुर्वेदः - 11/45
[18] यजुर्वेदः - 34/2
[19] यजुर्वेदः - 25/14



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani ISSN 0976-8645

अथर्ववेदे तु जलमपि औषधरूपेण काम्यते विश्वकल्याणाय।[20] वाण्या एव शान्ते: प्रयास: तत्र समुपवर्णित:। वाण्या: महिमा तत्र सम्यग् वर्णिताऽस्ति।[21] तत्रैव सदाचारेण मधुरवाण्या च सुखस्य शान्ते: परिकल्पना परिकल्पिताऽस्ति यथा -

**अनुव्रत: पितु: पुत्रो, मात्रा भवतु संमना:।**
**जायापत्ये मधुमतीं, वाचं वदतु शान्तिवाम्।।[22]**

अनुशासनस्य महत्त्वं, गुरुणां सत्संगत्या: प्रयास: प्रभावश्य चजुर्वेदे आख्यायितम्। सत्संगत्या: प्रभावेऽपि तत्र वर्णितम्। विदुषां सत्संगते: कृते: प्रार्थना तत्र अस्ति -

**अनु नो अद्यानुमतिर्यज्ञं देवेषु मन्यताम्।**
**अग्निश्च हव्यवाहनो भवतं दाशुषे मय:।।[23]**
**अग्निरसो न: पितरो नवग्वा,**
**अथर्वाणो भृगव: सोम्यास:।**
**तेषां वयं सुमतौ याज्ञियानामपि,**
**भद्रे सोमनसे स्याय।[24]**

तैत्तिरीय-आरण्यके धर्म: परमोक्त:। धर्मेण एव जगत: विश्वस्य प्रतिष्ठा इति निगदितम्। यश्च धर्म: मानवीयमूल्याश्रित: अस्ति[25]।

## रामायणे वर्णितानि मानवीयमूल्यानि-

वैदिकसाहित्येन समं रामायणेऽपि जीवनमूल्यानां मानवीयमूल्यानां च वर्णनं पदे पदे वर्णितम्। यथा सत्संगते: प्रभावस्य, कुसंगते: च दुष्प्रभावस्य विषये नागह्रदस्य वर्णनं अरण्यकाण्डे वर्णितम् -

**अकर्वुन्तोऽपि पापानि, शुचय: पापसंश्रयात्**
**परपापैर्विनश्यन्ति, मत्स्या नागह्रदे यथा।।[26]**

नैतिकशिक्षाया: सुन्दरम् उदाहरणं सुन्दरकाण्डे वर्णितम्। अनीतिपथे चलायमानस्य राज्ञ: राष्ट्राणि नगराणि च सर्वाणि विनश्यन्ति इति वर्णनम् सुन्दरकाण्डे समुपलब्धम् -

**अकृतात्मानमासाद्य, राजानमनये रतम्।**
**समृद्धानि विनश्यन्ति, राष्ट्राणि नगराणि च।।[27]**

सत्यम् इति मानवीयमूल्यस्य सत्ता अयोध्याकाण्डे स्वीकृता। सत्यमनुवर्तन्तं जनम् एव यश: कीर्ति:, लक्ष्मी, भूमिश्च प्रार्थयन्तित्र अत एव सत्यपूर्णं व्यवहार एव सुखप्रदपदार्थानां स्रोत: भवन्ति।

**भूमि: कीतिर्यशो लक्ष्मी: पुरुषं प्रार्थयन्ति हि।**
**सत्यं समुपवर्तन्ते सत्यमेव यजेत् तत:।।[28]**

अयोध्याकाण्डे धर्मस्य सर्वश्रेष्ठता वर्णिता। अस्मिन् लोके धर्म: एव परम: एवञ्च धर्मे एव सत्यस्य प्रातिष्ठा वर्तते-

**धर्मो हि परमो लोके धर्मे सत्यं प्रतिष्ठितम्।**

---

[20] आप: पृणीत भेषजं वरुथं तन्वे मम ज्योक् च सूर्यं दृशे। अथर्ववेदः 1/6/3
[21] इयं या परमेष्ठिनी वाग्देवी ब्रह्मसंशिता।
ययैव संसृजे घोरं, तयैव शान्तिरस्तु न:।। अथर्ववेदः 19/9/3
[22] अथर्ववेदः 3/30/2
[23] यजुर्वेदः 34/9
[24] यजुर्वेदः 19/50
[25] धर्मो विश्वस्य जगत: प्रतिष्ठा, लोके धमिष्ठं प्रजा उपसर्पन्ति।
धर्मेण पापमपनुदति, धर्मे सर्वं प्रतिष्ठितम्, तस्माद्धर्मं परमं वदन्ति।। तैतिरीयोपनिषद 0/63
[26] वा.रामायणम्/अरण्यकाण्डम्-38/26
[27] वा.रामायणम्/सुन्दरकाण्डम्-21/11
[28] वा.रामायणम्/अयोध्याकाण्डम्.-109/22

**धर्मसंक्षितमप्येतत् पितुर्वचनमुत्तमम्।।**[29]
**धार्मिकेणानृशंसेन नरेण गुरुवर्तिना।**
**भवितव्यं नरव्याघ्र, परलोकं जिगीषता।।**[30]

**महाभारते वर्णितानि मानवीयमूल्यानि -**

रामायणेन समं महाभारतेऽपि जीवनमूल्यानां मानवीयमूल्यानां च भृशं वर्णनं समुपलब्धम्। शान्तिपर्वे अक्रोधनः, तितिक्षुः, मानुषः ज्ञानवन्तः च मनुष्याणां श्रेष्ठतायाः उदाहरणं प्राप्यते -

**अक्रोधनः क्रुध्यतां वै विशिष्टस्तथा तितिक्षुरतितिक्षोर्विशिष्टः।**
**अमानुषान्मानुषो वै विशिष्टस्तथाऽज्ञानाज्ज्ञानविद् विशिष्टः।।**[31]

अस्मिन् एव विषये महाभारतस्य आदिपर्वेऽपि लिखितम् -

**अक्रोधनः क्रोधनेभ्यो विशिष्ट- स्तथा तितिक्षुरतितिक्षोर्विशिष्टः।**
**अमानुषेभ्यो मानुषाश्च प्रधाना- विद्वांस्तथैवाविदुषः प्रधानः।।**[32]

अस्मिन् एव पर्वे धर्माधर्मस्य निर्णयः स्वविवेकेन एव करणीयः इति निगदितम्। विवेकशीलः मनुष्यः स्वप्रज्ञया धर्माधर्मस्य, कृत्याकृत्यस्य च निर्णयः करोति -

**अधर्मो यत्र धर्माख्यो, धर्मश्चाधर्मसंज्ञितः।**
**स विज्ञेयो विभागेन, यत्र मुह्यन्त्यबुद्धयः।।**[33]

भीष्मपर्वे मानवीयमूल्यानाम् अनुकरणं कृत्वा महत्तरयुद्धान् अपि जेतुं शक्नोति इत्युद्धरणं प्राप्नोति -

**अनुमान्य यथाशास्त्रं, यस्तु युध्येन्महत्तरैः।**
**ध्रुवस्तस्य जयो युद्धे भवेदिति मतिर्मम।।**[34]

अनृतस्य, असत्यव्यवहारस्य च दोषाणां वर्णनं शान्तिपर्वे प्राप्यते -

**अनृतं तमसो रूपं तमसा नीयते ह्यधः।**
**तमोग्रस्ता न पश्यन्ति, प्रकाशं तमसावृताः।।**[35]

'सन्तोषः परमं सुखम्' इति पदं स्वीकृत्य संतोषस्य महत्वम् वर्णयति वनपर्वस्य श्लोकः -

**अन्तो नास्ति पिपासायाः, सन्तोषः परमं सुखम्।**
**तस्मात् सन्तोषमेवेह परं पश्यन्ति पण्डिताः।।**[36]

तत्रैव अहिंसायाः कृते परमो धर्मः इति पदस्य प्रयोगः कृतः। वेदोक्तकर्तव्येषु सदा लाभः भवति एवञ्च सद्भिः। संधिः न जीर्णं प्राप्नोति इत्यपि निगदितम् -

**आनृशंस्यं परो धर्मः त्रयीधर्मः सदाफलः।**
**मनो यस्य न शोचन्ति सन्धिः सद्भिर्न जीर्यते।।**[37]

सत्यस्य, आत्मज्ञानस्य, क्षमतायाः, अहिंसायाश्च फलानि अपि वनपर्वे प्रोक्तानि-

**अनृशंस्यं परो धर्मः क्षमा च परमं बलम्।**
**आत्मज्ञानं परं ज्ञानं सत्यं व्रतं परं व्रतम्।।**[38]

धर्मस्य परिभाषा स्पष्टतया शान्तिपर्वे उक्ता -

---

29 वा.रामायणम्/अयोध्याकाण्डम्-21/41
30 वा.रामायणम्/अयोध्याकाण्डम्-105/44
31 महाभारतम् /शान्तिपर्व- 299/15
32 महाभारतम्/आदिपर्व.- 87/6
33 महाभारतम्/आदिपर्व.- 150/27
34 महाभारतम्/भीष्मपर्व- 43/24
35 महाभारतम्/शान्तिपर्व - 190/3
36 महाभारतम्./वनपर्व - 2/46
37 महाभारतम्/वनपर्व - 313/76
38 महाभारतम्/वनपर्व - 213/30



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani

**धारणाद् धर्ममित्याहुर्धर्मेण विधृताः प्रजाः।**
**सः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः।।**[39]

तपः इत्यस्य विषये शान्तिपर्वे विशिष्टमुक्तम् "अहिंसा एव तपोच्यते।"अहिंसया सहैव सत्यवचनं, अनृशंस्यं, दमः इत्यादय तपोच्यते न च शरीरशोषणम् -

**अहिंसा सत्यवचनमानृशंस्यं दमो घृणा।**
**एतत् तपो विदुर्धीरा न शरीरस्य शोषणम्।।**[40]

त्यागस्वरूपी मानवीयमूल्यस्य सर्वोत्कृष्टता शान्तिपर्वे स्वीकृता -

**तपसा महदाप्नोति बुद्ध्या वै विन्दते महत्।**
**त्यागेन सुखमाप्नोति, सदा कौन्तेय तत्त्ववित्।।**[41]

महाभारतस्य आदिपर्वे यदा स्वर्गस्य सप्तद्वाराणां चर्चा भवति तत्रापि सर्वोत्कृष्टमानवीयमूल्यानि एव तत्र सर्वप्रथमं विवेचितानि -

**तपश्च दानं च शमौ दमश्च ह्रीरार्जवं सर्वभूतानुकम्पा।**
**स्वर्गस्य लोकस्य वदत्ति सन्तो द्वाराणि सप्तैव महान्ति पुंसाम्।।**[42]

शीलम् अर्थात् उत्तमस्वभावेन त्रिषु लोकेषु जयः संभवः अर्थात् उत्तमस्वभावः सर्वसिद्धीनां मूलमस्ति -

**शीलेन हि त्रयो लोकाः शक्याः जेतुं न संशयः।**
**न हि किंचिदसाध्यं वै, लोके शीलवतां भवेत्।।**[43]

इत्थं संस्कृतसाहित्ये मानवीयमूल्यानां कृते प्रसंगानुसारं चर्चा सर्वत्र ग्रन्थेषु विद्वद्भिः कृता। अग्रे केषाञ्चित् ग्रन्थानाम् उदाहरणरूपेण वर्णनम् अस्ति।

**संस्कृतसाहित्ये अन्यग्रन्थेषु वर्णितानि मानवीयमूल्यानां वर्णनम् -**

मुद्राराक्षसे शरद्ऋतोः आख्याने प्रकृतेः माध्यमेन जनसामान्यं नम्रतायाः संदेशं प्रदत्तम्-

**अपामुद्वृतानां निजमुपदिशन्त्या स्थितिपदम्,**
**दधत्या शालीनामवनतिमुदारे सति फले।**
**मयूराणामुग्रं विषमिव हरन्त्या मदमहो,**
**कृतः कृत्स्नस्यायं विनय इव लोकस्य शरदा।।**[44]

मनुस्मृत्यां वृद्धोपसेविनः, अभिवादनशीलस्य च मनुष्यस्य श्रेयः वर्णितः।

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्।।**[45]

विदुरनीत्यां धर्माचरणस्य अष्टविधमार्गाणां वर्णनं प्राप्यते

**इज्याध्ययनदानानि तपः सत्यं क्षमा घृणा।**
**अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः।।**[46]

इदानीं समाजे वृद्धगुरुणां सम्मानः न्यूनः अभवत्। 'Old age home' वृद्धाश्रमाणां प्रचलनम् अधिकं जातम्। समयेऽस्मिन् समाजे वृद्धान् प्रति अस्माकं कर्तव्यानां बोधः मनुस्मृतेः श्लोकेनानेन जायते -

---

39 महाभारतम्/शान्ति. - 109/11
40 महाभारतम्/शान्ति. - 79/18
41 महाभारतम्/शान्ति. - 19/26
42 महाभारतम्/आदिपर्व - 90/22
43 महाभारतम्/शान्ति.- 124/15
44 मुद्राराक्षसम्- 3/8
45 मनुस्मृतिः- 2/121
46 विदुरनीतिः - 3/56

**अभिवादयेत् वृद्धांश्च, दद्याच्चैवासनं स्वकम्।**
**कृताञ्जलिरूपासीत्, गच्छत: पृष्ठतोऽन्वियात्।।**[47]

धर्मविहीनस्य मानवीयमूल्यविहीनस्य च मनुष्यस्य तुलना पशुभि: हितोपदेशे कृता -

**आहारनिद्रा-भय-मैथुनानि सामान्यमेतत् पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीना: पशुभि: समाना।।**[48]

अवदानशतके दयाहीनस्य मानवस्य निंदा वर्णिता, क्रोधयुक्त: दयाहीनश्च मानव: निंदनीय:, अविश्वसनीयश्च भवति -

**यस्यचित्ते दया नास्ति क्रोधानलविदाहिनि।**
**न साधु: पुरश्चापि नैव विश्वस्यते जनै:।**[49]

नीतिशतके भर्तृहरिणा सर्वत्र मानवीयमूल्यानां जीवनोपयोगिताया: वर्णनं कृतम्। नीतिशतके प्रत्येकस्मिन् एव श्लोके नैकानि मानवीयमूल्यानि समन्वितानि सन्ति। प्रकृतिम् आधारिकृत्य मानवीयमूल्यानाम् उद्देश्यानि सर्वत्र प्रस्फुटितानि यथा-

**भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिदूरविलंबिनो घनाः**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्।।**[50]

योगदर्शने यदा पञ्चयमा: इति विषये चर्चा भवति तदा अहिंसा, सत्यं, अस्तेय इति मानवीयमूल्यानां सर्वप्रथमं प्रयोग: दृष्टव्य: -

**अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा: यमा:।।**[51]

हिंगुलप्रकरणे धर्मसम: सखा नास्ति इति लिखितम् अस्ति। धर्म एव सर्वोत्कृष्ट-मानवीयमूल्यम् अस्ति। धर्मे एव सर्वाणि मानवीयमूल्यानि समाहितानि -

**नास्ति त्याग समं सत्यम्, नास्ति धर्मसम: सखा**
**नास्त्युद्यसमं मित्रम्, नास्ति भाग्यसमं धनम्।।**[52]

कूर्मपुराणे अहिंसाया: स्वरूपं निगदितम् यत् कर्मणा, मनसा, वाचा च अक्लेशजननमेव अहिंसा प्रोक्तम् तद्यथा -

**कर्मणा मनसा वाचा, सर्वभूतेषु सर्वदा।**
**अक्लेशजननं प्रोक्तं, त्वहिंसा परमर्षिभि:।।**[53]

मानवीयमूल्यानां परिदृश्ये लोकहितचर्चा बुद्धचरितेऽपि समुपवर्णिता अस्ति यत् ''तत् कर्म एव करणीयम् येन लोकहितं भवेत्''। लोकहितमपि मानवीयमूल्येषु परिगण्यते -

**कर्मभिश्चाखिलं लोकमाबद्धं विद्धि सुव्रत।**
**तस्मात्वं कुरु तत्कर्म, येन लोके हितं भवेत्।।**[54]

पञ्चतन्त्रस्य मित्रभेदप्रकरणे उक्तं यत् ब्रह्मवधस्य प्रायश्चित्तेन शुद्धिर्भवितुमर्हति किञ्च सुहृद्द्रुहात् न कथंचिदपि शुद्धिर्भवितुमर्हति। अत: मित्रेण सह कदापि द्रोह: न करणीय:।

**अपि ब्रह्मवधं कृत्वा प्रायश्चित्तेन शुध्यति।**
**तदर्हेण विचीर्णेन न कथञ्चित्सुहृद्द्रुह:।।**[55]

---

47 मनुस्मृतिः- 4/154
48 हितोपदेशः /प्रस्तावना - 25
49 अवदानशतकम् – 399, उद्धृतः – नैतिकमञ्जूषा श्लो.1382
50 नीतिशतकम्-41
51 पातञ्जलयोगसूत्रम् - 2/30
52 शिक्षामञ्जूषा श्लो. ९६८/हिंगुलप्रकरणम् - 1/6
53 कूर्मपुराणम् 21/11/14
54 बुद्धचरितम् 19/20 उद्धृतः – शिक्षामञ्जूषा पृ.147
55 पञ्चतन्त्रम् / मित्रभेद: - 219/ उद्धृतः – शिक्षामञ्जूषा पृ.34



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani
ISSN 0976-8645

मानवीयमूल्येषु अन्यतम: अतिथिसत्कार:। भारतीयसंस्कृत्याम् 'अतिथि देवो भव' इत्युक्त: । अतिथिसत्काराय पारासरस्मृत्यां निगदितं यत् -

**अतिथिं तत्र संप्राप्तं पूजयेत्स्वागतादिना।**
**तथाऽऽसनप्रदानेन, पादप्रक्षालनेन च।।**
**श्रद्धया चान्नदानेन, प्रियप्रश्नोत्तरेण च।**
**गच्छताश्चानुयानेन, प्रीतिमुत्पादयेगृही।।**[56]

नारदपुराणेऽपि अस्मिन् प्रसङ्गे अतिथिपूजनस्य विधानम् उक्तम् - यत् अज्ञातगोत्रस्य कश्चित् अतिथि: यदि अन्यग्रामादपि उपागत: तदाऽपि तस्य विष्णुवत् पूजा विधेया -

**अज्ञातगोत्रनामानमन्यग्रामादुपागतम्।**
**विपश्चितोऽतिथि: प्राहुर्विष्णुवत् तं प्रपूजयेत्।।**[57]

अस्माकं संस्कृतसाहित्यं मानवीयमूल्यै: समृद्धम् अस्ति। सर्वत्र जीवनोपयोगी मानवीयमूल्यानां संकल्पना अस्ति। **'संस्कृति: संस्कृताश्रिता'** अनेन प्रकारेण संस्कृतसाहित्यमेव न अपि भारतीयसंस्कृतिरपि मानवीयमूल्यै: सुसमृद्धम् अस्ति। इत्यलम्।

**सन्दर्भग्रन्थसूची-**

1.यजुर्वेदसंहिता , चौखम्भा ओरियन्टालिया,वाराणसी , 2000
2. अथर्ववेदः , वैदिक यन्त्रालय , अजमेर , वि.सं.2032
3. मनुस्मृतिः,चौखम्भा संस्कृत संस्थान , वाराणसी , 2003
4. महाभारतम्, भण्डारकर प्राच्य विद्या संस्थान , पुणे
5. रामायणम्, गीताप्रेस गोरखपुर ,2009
6 .नीतिशतकम्, चौखम्भा सुरभारती प्रकाशन ,2001
7. मुद्राराक्षसम्,मोतीलाल बनारसीदास,वाराणसी,1995
8. विदुरनीतिः, गीताप्रेस गोरखपुर ,2013
9. हितोपदेशः , महालक्ष्मी प्रकाशन ,आगरा ,1985
10.कूर्मपुराण , नाग पब्लीकेशन,1990
11.नारदपुराण , नाग पब्लीकेशन,1990
12. शिक्षामञ्जूषा,नीता प्रकाशन ,2002
13. नैतिकमञ्जूषा,नीता प्रकाशन ,2009
14. पातञ्जलयोगसूत्रम्, ज.रा. राजस्थान –संस्कृत –विश्वविद्यालयः , जयपुरम्,2009

---

56 पारासरस्मृतिः - 1/43-44 /उद्धृतः – शिक्षामञ्जूषा पृ.16
57 नारदपुराणम् 1/1/26/63

Paper Received- 25/01/2018 Paper Published- 22/02/2018

# कालिकापुराण में ब्रह्मपुत्र की उत्पत्ति, ऐतिहासिकता का वर्णन

## विवेकशर्मा

सहायकाचार्यः, संस्कृतविभागः हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः,
धर्मशाला, जिला कांगड़ा, हिमाचलप्रदेशः

***************************************************************************************

**प्रमुखशब्दाः-** पौराणिक ग्रन्थ, भौगोलिकता, प्रामाणिक, कालिका पुराण, ब्रह्मपुत्र, रेणुका माता, परशुराम, **पुनर्जीवित, वृषोदक तीर्थ, तिब्बत,** कैलाश, लोहित नदी, कोरी कल्पनायें, ऐतिहासिकता, अनुसन्धान ।

**शोधसारः –** भारत की भौगोलिकता का प्रामाणिकता से वर्णन करना पौराणिक वाङ्मय की विशेषता रही है । पुराणों की इसी परम्परा का निर्वाह कालिका पुराण नामक उपपुराण में पूर्ण रूप से किया गया है । कालिका पुराण में परशुराम आख्यान द्वारा ब्रह्मपुत्र की भौगोलिकता का उत्कृष्ट वर्णन प्राप्त होता है । कालिका पुराण में तिब्बत तक ब्रह्मपुत्र की भौगोलिकता का वर्णन किया गया है, जिससे यह बात भी प्रमाणित होती है कि तिब्बत तक हमारे सांस्कृतिक सम्बन्ध थे । भारत में प्रवेश के उपरान्त ब्रह्मपुत्र के सटीक मार्ग को कालिकापुराण में दर्शाया गया है । साथ ही दिवांग और लौहित नदी की भूमिका का प्रतिपदान इसी सन्दर्भ में कालिका पुराण में किया गया है । अतः कालिकापुराण में जो ब्रह्मपुत्र नदी का प्रामाणिक वर्णन किया गया है, उससे उस दुष्प्रचार का निवारण भी स्वयं ही हो जाता है, जिसमें कहा जाता है कि पुराणों में केवल कोरी कल्पनायें की गयी हैं । कई भुगोलविद् ब्रह्मपुत्र के पुरातन मार्ग के ज्ञान हेतु या इतिहास के विद्वान् ब्रह्मपुत्र के सम्बद्ध ऐतिहासिकता को जानने हेतु कालिकापुराण को आदरपूर्ण स्वीकार करते हैं । यह तो स्पष्ट ही है कि जैसी भौगौलिकता का वर्णन कालिकापुराण में हुआ है वह अनुसन्धान के बिना सम्भव ही नहीं है ।

***************************************************************************************

पौराणिक ग्रन्थों में भारत की भौगोलिकता का उत्कृष्ट वर्णन है । इन ग्रन्थों में किया गया यह वर्णन अत्यन्त प्रामाणिक रूप से उपलब्ध होता है । भौगोलिकता का ऐसा ही प्रामाणिक वर्णन हमें उपपुराण वाङ्मय के शिरोमणि कालिका पुराण में उपलब्ध होता है । वस्तुतः कालिका पुराण भौगोलिक वर्णनों से पूर्णतः ओतप्रोत है । विशेषतः ब्रह्मपुत्र नदी की उत्पत्ति एवं उस क्षेत्र की भौगोलिकता को यहाँ उत्कृष्ट ढंग से प्रतिपादित किया गया है । ब्रह्मपुत्र की उत्पत्ति के प्रसङ्ग में रेणुका माता और उनके पुत्र परशुराम का आख्यान आता है । इस आख्यान के द्वारा पुराणकार ने यह भी बतलाने का प्रयास किया है कि किन परिस्थियों में परशुराम ने अपनी माता पर प्रहार किया ।

कालिका पुराणकार बतलाते हैं कि रेणुका जब स्नान करने जाती है तो वह जल क्रीडा में रत एक सुन्दर राजा को देखती है[58] । राजा के सौन्दर्य को देखकर रेणुका काम से पीडित हो जाती है । काम सन्तप्तता

58 एकदा तस्य जननी स्नानार्थं रेणुका गता ॥
गङ्गातोये ह्यथापश्यन्नाम्ना चित्ररथं नृपम् ॥
भार्याभिः सदृशीभिश्च जलक्रीडारतं शुभम् ॥



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani 0976-8645

से पसीने – पसीने हुई रेणुका आश्रम में आती है[59] तो जमदग्नि रेणुका पर क्रोध करते हुये उसे धिक्कारते हैं[60] । **क्रोध में किस तरह व्यक्ति अपने विवेक को पूर्ण रूप से खो देता है,** इसका सबसे बड़ा उदाहरण हमें इस आख्यान में मिलता है जब जमदग्नि अपने पुत्र परशुराम को कहते हैं कि वह अपनी माता पर प्रहार करे अन्यथा वह उसे श्राप दे देगा[61] । इस लिये ही तो नीति के उपदेशक कई शास्त्रों में वर्णित किया गया है कि किसी भी कार्य को बिना विचार किया या उसके परिणाम जाने बिना नहीं करना चाहिये क्योंकि अविवेकिता विपत्तियों का कारण बनती है[62] । पिता के श्राप के भय से एवं उनको प्रसन्न करने हेतु परशुराम ने यह कार्य न चाहते हुये भी किया । फिर पिता के प्रसन्न होने पर परशुराम ने अपनी माता के **पुनर्जीवित** होने का वर मांगा[63] । यहाँ पिता ने परशुराम से कहा कि तुम्हें मातृहत्या के दोष से मुक्ति हेतु ब्रह्मकुण्ड जाना होगा, जहाँ पर स्नान से तुम पाप मुक्त हो जाओगे[64] । पिता के वचन सुनकर परशुराम ब्रह्मकुण्ड नामक वृषोदक तीर्थ पर गये[65] । **कालिकापुराण में जो वृषोदक तीर्थ का वर्णन किया गया है वह सम्भवतः ब्रह्मपुत्र का उद्गम स्थल है, जो वर्तमान में तिब्बत देश में है । इससे यह भी प्रमाणित हो जाता है कि हमारे पुराने ऋषियों का विचरण क्षेत्र तिब्बत तक फैला हुआ था । पुराणों के इस वर्णन से यह बात भी सिद्ध होती है कि तिब्बत तक हमारी संस्कृति फैली हुई थी । यह तिब्बत का भारत के साथ सांस्कृतिक सम्बन्ध ही था जिस कारण चीन द्वारा प्रवासित की गई तिब्बत सरकार ने पूरी दुनिया में से धर्मशाला (हि०प्र०, भारत) को ही अपना सुरक्षित आश्रयस्थल के रूप में चुना ।** कालिकापुराण के आगे के तथ्य भी इस बात को को पुष्ट करते है, यथा यहाँ वर्णित किया गया है कि स्वयं स्नान करके तथा अपने परशु को धोकर मातृहत्या दोष से मुक्त हुये परशुराम ने उस तीर्थ से जल को ब्रह्मकुण्ड से निकालकर कैलाश की उपत्यका में लौहित्य नामक सरोवर तक पहुँचाया[66] । कालिका पुराण में एक अन्य महत्त्वपूर्ण तथ्य प्राप्त होता है कि इसी लौहित्य

सुमालिनं सुवस्त्रं तं तरुणं चन्द्रसन्निभम् ॥ कालिकापुराणम्, ८३/८-९

59 तथाविधं नृपं दृष्ट्वा सञ्जातमदना भृशम् ।
रेणुका स्पृहयामास तस्मै राज्ञे सुवर्चसे ॥
स्पृहायुतायास्तस्यास्तु संक्लेदः समजायत ।
विचेतनाम्भसा क्लिन्ना त्रस्ता सा स्वाश्रमं ययौ ॥ कालिकापुराणम्, ८३/१०-११

60 अबोधि जमदग्निस्तां रेणुकां विकृता तथा ।
धिग् धिक्कारतेत्येवं निनिन्द च समन्ततः ॥ कालिकापुराणम्, ८३/१२

61 अथाजगाम चरमो जामदग्न्येऽतिवीर्यवान् ।
तं च रामं पिता प्राह पारिष्ठां छिन्धि मातरम् ॥
स भ्रातृंश्च तथाभूतान् दृष्टा ज्ञानविवर्जितान् ।
पित्रा शप्तान् महातेजाः प्रसूं परशुनाच्छिनत् ॥ कालिकापुराणम्, ८३/१६-१७

62 सहसा विदधीत न क्रियामविवेकः परमापदां पदम् । किरातार्जुनीयम्, २/३०

63 स तु रामो वरान् वव्रे मातुरुत्थानमादितः ।
वधस्यास्मरणं तस्या भ्रातृणां शापमोचनम् ॥ कालिकापुराणम्, ८३/२०

64 न पुत्र वरदानेन मातृहत्यापगच्छति ।
तस्मात् त्वं ब्रह्मकुण्डाय गच्छ स्नातुं च तज्जले ॥
तत्र स्नात्वा मुक्तपापो नचिरात् पुनरेष्यसि ।
जगद्धिताय पुत्र त्वं ब्रह्मकुण्डं व्रज द्रुतम् ॥ कालिकापुराणम्, ८३/२५-२६

65 स तस्य वचनं श्रुत्वा रामः परशुधृक् तदा ।
उपदेशात् पितुर्यातो ब्रह्मकुण्डं वृषोतकम् ॥ कालिकापुराणम्, ८३/२७

66 ब्रह्मकुण्डात् सृतः सोऽथ कासारे लौहिताह्वये ।
कैलासोपत्यकायां तु न्यपतद् ब्रह्मणः सुतः ॥ कालिकापुराणम्, ८३/३०

सरोवर से पुनः उत्पन्न होने के कारण ब्रह्मपुत्र को लौहित्य भी कहा जाता है[67]। वर्तमान भौगोलिक दृष्टि से विचार करे तो **अरुणाचल प्रदेश के लोहित जिला** की उत्तर पूर्व दिशा में २४ कि०मी० की दूरी पर **परशुराम कुण्ड** स्थित है, अतः यह सिद्ध हो जाता है कि कालिका पुराण का उपरोक्त भौगोलिक वर्णन बहुत ही सटीक है। इसके अतिरिक्त अरुणाचल प्रदेश और असम में बहने वाली एक नदी का नाम भी लोहित नदी है जो ब्रह्मपुत्र की सहायक नदी है। इस लौहित नदी का उद्गम स्थल तिब्बत के जयाल छू पर्वत श्रेणी में है जो अरुणाचल प्रदेश में १०० कि०मी० बहने के बाद असम के मैदानों में प्रवेश कर जाती है। यह लोहित नदी मिश्मी पर्वतमाला से बहती हुई ब्रह्मपुत्र घाटी के मुहाने पर ब्रह्मपुत्र नदी में विलय हो जाती है। वस्तुतः दिवांग और लोहित नदी के मिलने पर ही ब्रह्मपुत्र नदी अपने अस्तित्व में आती है। **कालिकापुराण में भी ब्रह्मपुत्र को लोहित से विकसित हुआ बतलाया गया है**। आगे कालिका पुराण में वर्णन है कि परशुराम ने उस ब्रह्मपुत्र को अपने परशु की सहायता से मार्ग बनाकर पूर्व दिशा की ओर लाया[68]। ब्रह्मपुत्र के आगे के प्रवाह को उपस्थापित करते हुये कालिकापुराणकार कहते हैं कि इसके बाद हेमश्रृङ्ग पर्वत को भेदते हुये कामाख्यापीठ तक प्रवाहित की गई[69]। कामाख्यापीठ कामरूप में स्थित है जिस कामरूप का वर्णन रघुवंश महाकाव्य में है[70]। कामाख्या पीठ वर्तमान कालीन कामरूप / असम में स्थित है। यहाँ ध्यान देने की बात यह है कि कालिकापुराण में पूर्ण रूप से ब्रह्मपुत्र के वास्तविक मार्ग को प्रतिपादित किया जा रहा है। इसके बाद कालिकापुराण में बतलाया गया है कि कामरूप को जल में डुबाकर तथा सभी तीर्थों को अपने में समाकर ब्रह्मपुत्र दक्षिणसागर में गई[71]। यह तथ्य तो सर्वविदित ही है असम में ब्रह्मपुत्र द्वारा विस्तृत रूप से जलाप्लावन किया जाता है। जिससे हर वर्ष करोड़ो की हानि भी होती है। साथ ही असम के बाद ब्रह्मपुत्र बंगलादेश में जमुना के नाम से प्रचलित हो दक्षिणस्थित बंगाल की खाड़ी (सागर) में मिल जाती है है।

कालिकापुराण में जो ब्रह्मपुत्र नदी का प्रामाणिक वर्णन किया गया है, उससे उस दुष्प्रचार का निवारण भी स्वयं ही हो जाता है, जिसमें कहा जाता है कि पुराणों में केवल कोरी कल्पनायें की गयी हैं। कई भुगोलविद् ब्रह्मपुत्र के पुरातन मार्ग के ज्ञान हेतु या इतिहास के विद्वान् ब्रह्मपुत्र के सम्बद्ध ऐतिहासिकता को जानने हेतु कालिकापुराण को आदरपूर्ण स्वीकार करते हैं। यह तो स्पष्ट ही है कि इस तरह की भौगौलिकता का वर्णन अनुसन्धान के बिना हो ही नहीं सकता। **वस्तुतः पौराणिक वाङ्मय में अथाह ज्ञान है आवश्यकता है तो सिर्फ उस ज्ञान को बाहर लाते हुये उस पर एक मौलिक एवं निष्पक्ष अनुसन्धान की**।

---

[67] तस्य नाम स्वयं चक्रे विधिर्लौहित्यगङ्गकम्।
लौहित्यात् सरसो जातो लौहित्याख्यस्ततोऽभवत्॥ कालिकापुराणम्, ८३/३३

[68] तस्यापि सरसस्तीरे समुत्थाय महाबलः।
कुठारेण दिशं पूर्वामनयद् ब्रह्मणः सुतम्॥ कालिकापुराणम्, ८३/३१

[69] ततः परत्रापि गिरिं हेमश्रृङ्गं विभिद्य च।
कामरूपान्तरं पीठमावहद्यदमुं हरिः॥ कालिकापुराणम्, ८३/३२

[70] तमीशः कामरूपाणामत्याखण्डलविक्रमम्।
भेजे भिन्नकटैर्नागैरन्यानुपरूरोध यैः॥ रघुवंशम्, ४ / ८३

[71] स कामरूपमखिलं पीठमाप्लाव्य वारिणा।
गोपयन् सर्वतीर्थानि दक्षिणं याति सागरम्॥ कालिकापुराणम्, ८३/३४



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani

**सन्दर्भग्रन्थसूची-**

१. **कालिकापुराणम्**, आचार्य मृत्युञ्जय त्रिपाठी, नवशक्ति प्रकाशनम, वाराणसी, प्रथमसंस्करणम् २००६
२. **कालीतत्तवम्**, आचार्य मृत्युञ्जय त्रिपाठी, नवशक्ति प्रकाशनम, वाराणसी
३. **कालिकापुराणम्**, चमनलालगौतमः, संस्कृति संस्थान ख्वाजा कुतुब बरेली, १९७३
४. **भारतीय चित मानस काल**, धर्मपाल, पुनरुत्थान ट्रस्ट, 4 वसुन्धरा , सोसाइटी, आनन्द पार्क, कांकरिया, अहमदाबाद, ३८००२८
५. **भारत की परम्परा**, धर्मपाल, पुनरुत्थान ट्रस्ट, 4 वसुन्धरा , सोसाइटी, आनन्द पार्क, कांकरिया, अहमदाबाद, ३८००२८
६. **उपपुराणदिग्दर्शनम्**, डॉ० लीलाधरवियोगी, आई० बी० एन० पब्लिकेशन अम्बाला छावनी, प्रथम संस्करणम् २००७
७. **पुराणविमर्शः**, आचार्य बलदेव उपाध्याय, चौखम्बा विद्याभवन वाराणसी, तृतीय संस्करण २०१५
८. **Studies in Up-puranas**, Rajendra Chandra Hazara, The principal Sanskrit Collage, Bakim Chatarjee street, Culcutta, Edition 1958

Paper Received- **03/01/2018** Paper Published- **22/02/2018**

# रससूत्र–व्याख्या का तुलनात्मक अध्ययन

**मीनाक्षी जोशी**
संस्कृत प्राध्यापिका, खरगोन, मध्यप्रदेश

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani
ISSN 0976-8645

************************************************************************************

**प्रमुखशब्द-**साहित्यशास्त्र, भरत, कुन्तक, भट्टलोल्लट, शङ्कुक।

**शोधसार-** भारतीय वयुन्धरा सदैव अपने ज्ञान का चरम–तत्त्व को मानती आ रही हैं। उसकी मेधा अपने उत्कर्षत्व को प्राप्त करने के लिए निरन्तर नवीन आयाम खोजती रही हैं। जीवन के प्रत्येक भाग में श्रेष्ठत्व की सिद्धि हेतु जीवन के समस्त अड्गों का निरूपण आवश्यक हो जाता हैं। भला ,भारतीय मेधा यह कार्य क्यों नहीं करती। उसके काव्य के माध्यम से जीवन के आदर्श रुप को अनुसन्धान किया। अनेक प्रतिभासम्पन्न विद्वानों की आजीवन–साधना के फलस्वरुप संस्कृत की अगाध काव्यराशी हमें धरोहर के रुप में प्राप्त हुई । यह काव्यराशी प्रकृति की ही भाँति कुछ नियमों एवं सिद्धान्तों का अनुसरण करती हैं। जिसके कारण काव्यानुशासन रुप काव्यशास्त्र भारतीय–चिन्तकों का प्रमेय–भूत (ज्ञातव्य विषय) हो गया। आचार्य भरत से प्रारम्भ हुई यह परम्परा अद्यावधि तक सतत प्रवाहमान हैं। इस काव्यशास्त्र सरणि में कई धाराएँ प्रविष्ट होकर इससे प्रवाह को विवर्धित करती रही हैं। ऐसी ही दो तपःपूत धाराएँ तपोभूमि हिमगिरि से प्रवाहित हुई जिन्होंने समस्त काव्यशास्त्र को स्वयं में समेटकर 'ब्रह्मानन्दसहोदरत्व–रुप' परमलक्ष्य तक के मार्ग को निष्कण्टक बना दिया। सहृदय को 'विगलितवेद्यान्तर' की स्थिति में पहुँचाने वाली ये दो धाराएँ– महामाहेश्वर अभिनवगुप्तपादाचार्य एवं वाग्देवतावतार मम्मट के रुप में अपनी सशक्त भूमिका काव्यशास्त्र के धरातल पर उपस्थित करती हैं।

************************************************************************************

यद्यपि आचार्य अभिनवगुप्तवाद ने काव्यशास्त्र पर किसी स्वतन्त्र–ग्रन्थ का प्रणयन नहीं किया फिर भी भरतमुनि–कृत 'नाट्यशास्त्र'पर अभिनव–भारती' नामक टीका तथा आनन्दवर्द्धन–विरचित 'ध्वन्यालोक' पर 'लोचन' नामक टीका के द्वारा उन्होंने उन नवीन सिद्धान्तों की उपस्थापना की जो काव्य के 'प्राणभूत' हैं। ये दोनों ही टीकाएँ उनकी यशोगाथा को विस्तरित करती हैं। विविध विषयों के ज्ञाता, दार्शनिक, काव्यसाधक , योगिराज अभिनवगुप्त ने अभिनव–भारती एवं लोचन टीका में ध्वनि–सिद्धान्त के विरोधा का शमन करते हुए नवीन सिद्धान्तों को काव्यशास्त्र में 'माणिक्यों' की भाँति सुशोभित किया हैं।
आचार्य मम्मट् ने पूर्ववर्ती आचार्यों के सिद्धान्तों को कमबद्ध तथा काव्य में उपादेयत्व के औचित्य को ध्यान में रखकर युक्ति युक्तियुक्त तर्को के साथ 'काव्यप्रकाश' नामक ग्रन्थ में समाविष्ट किया। ध्वनिकार आनन्दवर्धनाचार्य, आचार्य अभिनवगुप्त एवं मम्मट् ये तीनों ही ध्वनिवादी आचार्य कहे जाते हैं। ध्वनि–सम्प्रदाय का प्रतिष्ठापन आनन्दवर्द्धन ने किया तथा आचार्य अभिनव गुप्त ने ध्वनि–विरोधी कुछ मतों का खण्डन कर उसके स्वरुप का निरुपण किया तथापि ये दोनों आचार्य मिलकर साहित्य के व्यापक क्षेत्र को पूर्ण–रुप से व्याप्त नहीं करते। क्योंकि ध्वन्यालोक, अभिनव भारती एवं लोचन टीका काव्य के आवश्यक अड्ग दोष एवम् अलड्कारों का विवेचन नहीं करते। अत एव अलड्कारशास्त्र की दृष्टि से उन्हें एकदेशीय या अपूर्ण कहा जा सकता हैं। मम्मटकृत 'काव्यप्रकाश' उनकी इस अपूर्णता को पूर्ण करता हैं। आनन्दवर्धन जहाँ ध्वनि की 'काव्यत्म' के रुप में स्थापना करते हैं। वहीं अभिनवगुप्तवाद उसे दृढ करते हैं परन्तु ध्वनि–सिद्धान्त के उग्र विरोध के संघर्ष में आचार्य मम्मट ही 'ध्वनि' को सुरक्षित कर पुनरुज्जीवित करते हैं। इसी हेतु वे ध्वनिप्रस्थापकपरमाचार्य कहे जाते हैं। अलड्कारशास्त्र की दृष्टि से जो सारभूत तत्त्व है उसकी उपस्थिति काव्यप्रकाश में हैं। वह सारगर्भितत्व के साथ सम्पूर्णत्व को भी धारण करता हैं।
आचार्य अभिनव ने भरत के 'रससूत्र–विमर्श' का विधान अन्य आचार्य के मतोल्लेखपूर्वक अभिनव भारती में किया हैं। साथ ही सर्वश्रेष्ठ 'अभिव्यक्तिवाद ' की उद्भावना भी वे करते हैं। आचार्य मम्मट ने इस प्रकरण का अनुदान काव्यप्रकाश में अभिनव भारती से ही किया परन्तु शैलीगत भिन्नता से दोनों ही स्थलों में भेद–दर्शन होता हैं। और यही भेद–निदर्शन ही इस शोध पत्र का विवेच्य–विषय हैं।

**'रस' शब्द का अर्थ**

'रस' शब्द संस्कृत वाड्मय का प्राचीनतम शब्द है जिसका वेदों में वनस्पतियों के द्रवों के रूप में, तत्पश्चात् यह सोमरस, आनन्द, चमत्कार तथा तन्मयता का वाचक बना।



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani
ISSN 0976-8645

उपनिषदों में यह अत्यत सूक्ष्म अर्थ का ग्रहणकर ब्रह्मनन्द, आत्मानन्द का वाहक बन, रामायण महाभारत तथा सूत्रग्रन्थों में 'रति' एवं 'भाव' का बोध्क बना। इस प्रकार 'रस' शब्द की यात्रा मूर्त्त से अमूर्त्त तथा स्थूल से सूक्ष्म की ओर प्रवृत्त हुई । अमरकोश में भी 'रस' को इस प्रकार निरूपण किया है–
''रसो गन्धरसे जले। शृड्गानरादौ विषे वीर्ये तिक्तदौ द्रववरागयोः।। देहधतुप्रभेदे च पारदस्वादयोः पुमान् इति हैमः।''
अन्ततः आचार्य भरत के नाट्यशास्त्र में 'रस' शब्द अपने शास्त्रीय अर्थ को ही अभिव्यज्जित करता हैं। भरत–मुनि नाट्यशास्त्र में ही उनके पूर्ववर्ती आचार्य का उल्लेख करते हैं। जिन्होंने रस–स्वरूप–निरूपण का कार्य किया हैं परन्तु तत्सम्बन्धी ग्रन्थों के अभाव के फलस्वरूप रस–निरूपण तथा रस सिद्धान्त अपनी प्रौढि एवम् उत्कर्षत्व के कारण भरतमुनि से ही रस चिन्तन प्रारम्भ माना जाता हैं।

**रससूत्र एवम् उसके व्याख्याकार**

आचार्य भरत ने अपने नाट्यशास्त्र के षष्ठ अध्यााय में नाट्याडग् की विवेचना के अन्तर्गत रस–निर्वचन आरम्भ करते हैं। इस सन्दर्भ में वे कहते हैं कि ''रस के बिना कोई अर्थ प्रवर्तित नहीं होता ''–

''नहि रसादृते कश्चिदर्थ प्रवर्तते ।''

यह रस के बीज–स्थानीय–रूप की स्वीकृति हैं। पुनः प्रश्न उपस्थापित करते हुए कहते हैं– 'रस आस्वाद्य हैं तथा अपनी आसवाद्यता के कारण ही वह 'रस' इस नाम से जाना जाता हैं।

''रस इति कः पदार्थ ? उच्यते आस्वाद्यत्वात् ।1 [72]

इस की दोनों परिभाषाएं उसे विस्तृत आयाम देती हैं। इन दोनों के साथ ही आचार्य अपने प्रसिद्ध रस–सूत्र की स्थापना करते हैं।

'तत्र विभावानुभावव्यभिचारिसंयोगाद्रस–निष्नत्तिः।

अर्थात् विभाव ,अनुभाव और व्यभिचारिभाव के संयोग से रस की निष्पत्ति होती है।
वस्तुतः भरत–मुनि समवेतत्व में ही आस्वादयोग्यता मानते हैं और इसी हेतु उन्होंने रस वही माना हैं।जहाँ स्थायीभाव के साथ दूसरे भावों का समवेतत्व हो। यद्यपि उन्होंने अभिनेय स्थायी को भी माना तथा व्यभिचारिभाव को भी तथापि वे जब तब अलग–अलग है तब तक वे रस नहीं कहे जा सकते।
रस–निष्पत्ति के प्रमुख आधार पर पश्चाद्वर्ती आचार्योने इसकी कई प्रकार से व्याख्या की। जिनमें भट्टलोल्लट, शड्कुक, भट्टनायक तथा अभिनवगुप्तपादाचार्य प्रमुख हैं। महामाहेश्वर अभिनवपादाचार्य विरचित नाट्यशास्त्र की टीका 'अभिनव–भारती 'में इन चारों मतों को सविस्तार वर्णित किया हैं। वाग्देवतावतार मम्मटाचार्य ने भी काव्यप्रकाश में इन चारों मतों अनूदित किया जो मूलतः अभिनव–भारती से लिए गए हैं। वस्तुतः सूत्रस्थ 'संयोग' तथा 'निष्पत्ति' शब्दों की व्याख्या के कारण ही ये भिन्न–भिन्न मत प्रादुर्भूत हुए हैं। आचार्य भट्टलोल्लट् 'निष्पत्ति' का अर्थ 'उत्पत्ति' लेते हुए 'उत्पत्तिवाद'की स्थापना करते हैं, वही आचार्य शकुक ने 'निष्पत्ति' का अर्थ 'अनुमिति' मानकर 'अनुमितिवाद' की स्थापना की। आचार्य भट्टनायक ने 'निष्पत्ति' का अर्थ 'भक्ति' मानकर 'भुक्तिवाद' को स्वीकार किया वहीं अभिनवगुप्तपादाचार्य को 'निष्पत्ति' का अर्थ 'अभिव्यक्ति' ईप्सित था जिससे 'अभिव्यक्तिवाद ' अस्तित्व में आया । इनके अतिरिक्त अन्य आचार्यो ने भी इस प्रकार की रस–सूत्र व्याख्या प्रस्तुत की परन्तु उनमें चार यही व्याख्याएँ प्रसिद्ध हैं।

**काव्यप्रकाश एवम् अभिनव भारती में रस–सूत्र –विवेचन में भेद**

---

[72] काव्यप्रकाश, चतुर्थ उल्लास।

ISSN 0976-8645

यद्यपि 'उत्पत्तिवाद[73], अनुमितिवाद , भुक्तिवाद'[74] एवम् अभिव्यक्तिवाद[75] की अवधारणा काव्यप्रकाशकार ने अभिनव–भारती से ही की है तथापि अभिनवगुप्तपादाचार्य तथा मम्मटाचार्य के विवेचन मे कई स्थलों पर भेद–दर्शन होता हैं। जो आचार्य मम्मट की विरिष्ठ शैली के कारण ही हैं।
दोनों ही आचार्यों के भेद स्थल इस रूप में देखा जा सकता हैं।

## आचार्य भट्टलोल्लट तथा उनका उत्पत्तिवाद

आचार्य लोल्लट के 'उत्पत्तिवाद' जो वेदान्तदर्शन से प्रभावित हैं, उस आचार्य अभिनव ने अपनी अभिनव–भारती में इस प्रकार उदघृत किया हैं?'
'विभाव,अनुभाव तथा व्यभिचारिभावों का स्थायी भाव के साथ संयोग होने से रस की उत्पत्ति होती है। विभावादि में विभाव, स्थायिभावरूप चितवृत्ति की उत्पत्ति में कारण होते है। अनुभाव भी रसजन्य अनुभाव नहीं वरन् स्थायिभावों के ही पीछे उत्पन्न है। अत एव वे ही विवक्षित है। जिससे कि उनकी गणना रस के कार्यरूप में न होकर कारण–सामग्री के रूप में की जाती है। उसी प्रकार व्यभिचारिभाव भी स्थायिभावों के साथ संस्कार रुप में ही ग्राह्य हैं। इस प्रकार विभावादि से परिपुष्ट हुआ स्थायीभाव ही रस है तथा वह जब अपरिपुष्ट रहता हैं तब स्थायीभाव कहलाता हैं।

"तेन स्थाय्येव विभावानुभावादिभिरूपचितो रसः। स्थायी त्वनुपचितः।"

रस अनुकार्य रसमादि तथा अनुकर्त्ता नट दोनों में रहता हैं। तथा मुख्यरूप से अनुकार्य में रहता हैं। रामादि की रूपता की प्रतीति होने से नट में भी उसकी प्रतीति होती हैं। दण्डी प्रभृति आचार्य भी इसी सिद्धांत से सहमत हैं।

इस सिद्धांत के प्रतिपादनोपरान्त शकुक द्वारा 'उपचित रत्यादि स्थायिभाव ही रस है।' इस सिद्धांत के खण्डन के आठ हेतु प्रस्तुत किए जो इस प्रकार हैं–

1. रत्यादि स्थायी भावों का साक्षात्कारात्मक ज्ञान विभावादि से संयोग होने पर जो साक्षात्कारात्मक ज्ञान हैं वही रस हैं स्थायी भाव नहीं। अतः रस पृथक–पृथक है।
2. विभावादि के संयोग से पहले रत्सादिका जो ज्ञान होता हैं। वह तो उनका के उनका केवल शब्द द्वारा परोक्षात्मक ज्ञान होता है। उसे रस नहीं कहा जा सकता उसी प्रकार विभावादि के संयोग के पश्चात् रत्यादि की साक्षात्कारात्मक अनुभूति होती है जिसे स्थायिभाव नहीं कहा जा सकता क्योंकि प्रथम ज्ञान रसनात्मक तथा द्वितीय ज्ञान साक्षात्कारात्मक है। रसनात्मक ज्ञान साक्षात्कारात्मक नहीं है। अतः स्थायिभाव ही रस नहीं हो जाएगा।
3. यदि विभावादि से पहले ही रस की स्थिति मान ले तो फिर अन्य लक्षण की आवश्यकता नहीं रह जाएगी। तब रससूत्र भी औचित्यहीन हो जाएगा।
4. रत्यादि स्थायिभाव में न्यूनाधिक्य अर्थात् कभी सामान्य, कभी मन्द, कभी तीव्र इत्यादि प्रकार से होते हैं जबकि रस में तारतम्य का भेद नहीं पाया जाता ।
5. यदि हम रस की भाँति स्थायी में भी मात्रा का तारतम्य नहीं मानते हैं हास्य रस में स्थासिभावों की मात्रा में न्यूनाधिक्य के कारण छः भेद किए गए है वे नहीं होते।
6. यदि मात्रा–भेद से रस–भेद मानने लग जाए तब काम की जो दस अवस्थाएँ कही गई हैं उनमें मात्रादिके भेद से असंख्य रस और भावों की प्रतीति होने लगेगी , और इस प्रकार एक श्रृंगार के असंख्य भेद बन जाएँगे।
7. स्थायिभावों के अपचय को रस नहीं कहा जा सकता अपितु शोकादि स्थायिभावों का अपचय नहीं वरन् कालक्रम से ह्रासया अपचय ही होता हैं। तब बिना स्थायिभाव के अपचय से रसोत्पत्ति कैसे होगी।
8. इसी प्रकार रौद्ररस के स्थायिभाव क्रोध,वीररस का उत्साह, शृङ्गार का रति आदि का भी परिपोषणाभाव में उपचय नहीं अपितु ह्रास देखा गया हैं। किन्तु रसानुभूति में ह्रास या वृद्धि नहीं होती अतः स्थायिभाव रस नहीं हैं।

इस प्रकार अभिनवगुप्तापाचार्य ने आचार्य भट्टलोल्लट का मत प्रस्तुत किया । इसी प्रकरण को काव्य–प्रकाशकार ने संश्लिष्ट एवं सङ्क्षिप्त पदावली प्रस्तुत किया । वहाँ संयोग के तीन अर्न्तगत तीन भाव–सम्बन्धों की कल्पना की –

---

[73]वहीं
[74] वहीं
[75] वहीं




ISSN 0976-8645

प्रथम– स्थायिभावों के साथ विभावों का उत्पाद्य –उत्पादक सम्बन्ध।
द्वितीय–स्थायिभावों का अनुभावों के साथ गम्य–गमक–सम्बन्ध।
तृतीय–स्थायिभावों का व्यभिचारिभावों के साथ पोष्य–पोषक–सम्बन्ध।

उसी प्रकार निष्पत्ति के भी क्रमशः तीन अर्थ–उत्पत्ति, प्रतीति तथा पुष्टि माने गए हैं। काव्यप्रकाश में इस प्रकरण की व्याख्या सङ्क्षिप्त होने से जटिल बन जाती हैं। इससे यह सम्यक् ज्ञान नहीं हो पाता कि विभावादि से रस का सम्बन्ध क्रमशः कार्य–कारण रूप है अथवा कारण–कार्य रूप। यदि वह रस को कारण–सामग्री है तो वह किस रूप में हैं? जिस प्रकार अभिनव भारती में रस तथा स्थायिभाव के भेद–स्वरूप का प्रदर्शित किया गया है? उस प्रकार का उल्लेख काव्य–प्रकाश में अप्राप्य हैं। साथ ही अभिनव भारती में शङ्कुक द्वारा स्थायी को रस न मानने के जो 'अष्ट–हेतु ' दिए है उनका उल्लेख भी आचार्य मम्मट नहींकरते जिससे कि इस मत का सालोचनात्मक अध्ययन नहीं हो पाता ।

## आचार्य शङ्कुक का अनुमितिवाद

आचार्य शङ्कुक के अनुमितिवाद का स्वरूप अभिनवभारती में इस प्रकार उल्लिखित हैं–
'रस के कारणभूत विभावों, कार्य–रूप अनुभावों तथा सहचारी रूप व्यभिचारि–भावों को नट के द्वारा अभ्यस्त होने से कृत्रिम होने पर भी कृत्रिम न मानने से लिङ्ग सामर्थ्य–वशाद् अनुकर्त्ता नट में स्थित रूप से अनुमिति होने वाला तथा मुख्यरुप से रामादि में रहने वाले रत्यादि स्थायिभाव का अनुकरण रुप अर्थात् नटगत स्थायिभाव ही 'रस' है।
रसानुभूति में कारणभूत विभाव काव्य के द्वारा उपस्थित होते है। अनुभाव नट के अभ्यास से और व्यविचारी अपने कृत्रिम अनुभावों के अर्जन के द्वारा उपस्थित होते है। स्थायिभाव काव्य–बल से प्रतीत नहीं होता और पूर्वस्थित होता हैं। केवल विभावादि भावरुप लिंगो से नटगत रुपमें अनुमित होता हैं। वह भी रसमादिगत के अनुकरणात्मक रूप में अनुमित होता हैं। इसलिए अनुकरणात्मक होने से स्थायिभाव के स्थान पर 'रस' नाम से अभिहित किया जाता है।
सङ्क्षेप में कहा जाए तो स्थायिभावों की उपस्थिति अभिनय के द्वारा होती है तथा अभिनय अनुकरणात्मक होता हैं। अत एव उपचित स्थायिभाव का नाम 'रस' नहीं हैं अपितु अनुक्रियमाण स्थायिभाव का नाम 'नाम' हैं। इस प्रकार वह प्रतीति चित्रतुरग न्याय से नट में रामादि की होती हैं, जो सम्यक्, मिथ्या, सादृश्य तथा संशयात्मक इन सभी प्रतीतियों से भिन्न होती हैं।
शङ्कुक का मत न्यायदर्शन के अनुमानप्रमाण से अनुप्राणित हैं। इस मत के निरुपणोपरान्त इसके खण्डन हेतु आचार्य अभिनवगुप्त 'उपाध्याय' (सम्भवतः आचार्य भट्टतौत )के नाम विकल्प प्रस्तुत करते हैं। 'शङ्कुक का रसानुकरणवाद ' किसके दृष्टिकोण से है' इसी के चार उत्तर तथा उनका अभिनव भारती में खण्डन इस प्रकार दिया गया।

1. सामाजिकाभिप्रायेण – नट में पाई जाने वाली जिन बातों को अनुकरण रुप मानकर रस कहा जा सकता था उनमें से किसी में भी रस कहलाने की योग्यता नहीं है। तथा परन्तु रामगत प्रतीति को यहाँ किसी ने नहीं देखा अतः वह अनुकरण रुप नहीं हो सकती । द्वितीय तर्क यह है कि सामाजिक पुरुष रति आदि प्रसिद्ध कारणों का ही अनुमान कर सकता हैं अप्रसिद्ध कारणों का नहीं इसलिए सामाजिक की दृष्टि में नटगत रत्यादि अपने के अनुकरण रुप नहीं । अतः रत्यादि के अनुकरण को रस कहना उचित नहीं हैं।
2. नटभिप्रायेण– नट को भी इस प्रकार की प्रतीति नहीं हो सकती कि मैं रसम अथवा उसकी चित्तवृत्ति का अनुकरण कर रहा हूँ। और वह उसका अनुकरण कर भी नहीं सकता क्योंकि किसी के सामान करना अनुकरण कहलाता हैं और पुनः वह अनुकार्य के बिना नहीं किया जा सकता।
3. सामाजिक प्रतीत्यभिप्रायेण –वस्तुस्थिति के विवेचक व्याख्याताओं के अनुसार उन स्थायिभावो का अनुकरण नहीं हो सकता क्योंकि बाद में प्रतीत होने वाले को वस्तुत्त नहीं कहा जाता।
4. भरताभिप्रायेण– और न भरतनुनि का कोई वचन प्राप्त नहीं होता है कि 'स्थायिभाव का अनुकरण रस है।'

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani
ISSN 0976-8645

इस प्रकार शड्कुक के सिद्धान्त का खण्डन आचार्य अभिनवगुप्त सविस्तर करते है।। काव्यप्रकाश कार ने आचार्य शड्कुक के इस सिद्धान्त का प्रतिपादन तो अपने गन्थ में किया है परन्तु वह इतना स्पष्ट नहीं है। शड्कुक के मत की अन्य सभी बातें तो उनमें दी गई हैं परन्तु अनुकरणात्मक रत्यादि ही रस है, जो इस सिद्धान्त की प्रमुख बात थी वह उन्होंने स्पष्ट नहीं की जबकि अन्य आचार्यो ने इस मत का खण्डन ही इस बात पर किया हैं। शंकुक के मत का प्राण ही अनुकरणात्मकता है। जिसका उल्लेख किए बिना काव्यप्रकाश का यह प्रकरण सर्वथा अपूर्ण है। साथ ही पुनः इस मत के खण्डन हेतु दिए गए हैं जो अभिनव भारती में तो हैं परन्तु काव्यप्रकाश में उसका नितान्त अभाव हैं। जिससे आचार्य शंकुक क`मत का पूर्णरूप उपस्थित नहीं हो पाता । साथ ही अभिनव भारती में सांख्यमतानुसारणे मानी गाई रस की सुख–दुःख मोहत्मकता का खण्डन करते हैं जो काव्यप्रकाश में अप्राप्त हैं। भाषागत दुरूहता की समस्या तो यथावत् है ही।

**आचार्य भट्टनायक का भुक्तिवाद**

अभिनव में आचार्य भट्टनायक स्वयं के मत के प्रतिस्थापना से पूर्व उत्पत्तिवाद, अनुमितिवाद तथा अभिव्यक्तिवाद का खण्डन अनेक युक्तियों के द्वारा करते हैं। वे स्पष्ट करते है कि – रस न तो प्रतीत होता हैं न उत्पन्न होता है और न ही अभिव्यक्त होता हैं। इस प्रकार रस– विषयक अन्य मतो के खण्डनोपरसन्त जो सांख्य दर्शन से अनुप्राणित हैं ऐसे स्वमत–प्रतिस्थापन इस प्रकाश करते है–

‘‘इसलिए काव्य में दोषाभाव तथा गुणालड्कारमयत्व रूप लक्षण के कारण तथा नाटक में आड्गिक, वाचिक , सात्तिक एवम् आहार्य चार प्रकार के अभिनय , सामाजिक के अपने भीतर रहने वाले समस्त अज्ञानादि के निवारण करने वाले एवं विभावादि के साधारणीकरण रूप अभिधा के पश्चात् द्वितीय अंश पर होने वाले एवं भावकत्व व्यापार अर्थात् साधारणीकृत ,रस, अनुभव ,स्मृति आदि से भिन्न के रजोगुण तथा के मिश्रण के कारण दवीभाव, विस्तार तथा विकास रूप सत्वगुण के प्राधान्य से प्रकाश तथा आनन्दमय साक्षात्कार में विश्रान्ति रूप एवं परब्रह्म के आस्वाद–सदृश भोजकत्व व्यापार के द्वारा अनुभव किया जाता है।अर्थात् शब्द में अभिधा से अतिरिक्त भावाकत्व तथा भोजकत्व शक्ति भी रहती है। अभिधा से शब्दार्थ वाक्यार्थ आदि के विशेष व्यक्तित्व का निवारण अर्थात् साधारणीकरण किया जाता है तत्पश्चात् भोजकत्व शक्ति के द्वारा सामाजिक को रस का आस्वादन हाकता है।

अभिनवभारती में इस खण्डन को विस्तार पूर्वक दिया है जो सड्क्षेप में इस प्रकार हैं–

1. जिन युक्तियों द्वारा भट्टनायक ने भट्टलोल्लट
   के मत का खण्डन किया उन्हीं के द्वारा इनके मत का भी ख्ण्डन हो जाता हैं।
2. भट्टनायक ने शब्द के जो भावाकत्व तथा भोजकत्व व्यापार मानते हैं वे किसी भी प्रमाण से सिद्ध नहीं है और न ही अन्य आचार्यो द्वारा स्वीकार्य है। अतएव यह अप्रमाणित है।
3. आप रस की न उत्पत्ति मानते है, न अभिव्यक्ति और न ही प्रतीति । ऐसा संसार मे कोई पदार्थ नहीं हैं जिसकी न उत्पत्ति हो और नही अभिव्यक्ति हो और फिर भी संसार में सत्तावान बना रहे।

काव्यप्रकाश ने इस मत को ग्रन्थ में अनूदित करते हुए कहा हैं कि –

‘‘न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयत, नोप्द्यते, नाभिव्यज्यते अपितु काव्ये नाट्ये चाभिघातो द्वितीयेन विभावादिसाधरणीकरणात्मना भावकप्वव्यापारेण भाव्यमानः स्थायी , सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्त्वेन भोगेन भुज्यते’ इति भट्टनायकः।

भट्टनायक के अनुसार रस की न प्रतीति होती है न ही उत्पत्ति न ही अभिव्यक्ति। सांख्य के सिद्धान्त का अनुगमन करने वाले इस मत रसानिष्पत्ति की प्रक्रिया को दर्शाते हुए कहते हैं कि काव्य अथवा नाटक में अभिधा से भिन्न विभावादि के साधारणीकरणस्वरूप ‘भावकत्व’ नामक से साधारणीकृत स्थायी, सत्त्वोद्रेक से प्रकाश एवम् आनन्दमयी अनुभूति की स्थिति के सामान भोग द्वारा अर्थात् भोजकत्व व्यापार के द्वारा आस्वादित किया जाता है।

काव्यप्रकाश ने उत्पत्तिवाद इत्यादि के खण्डन में भट्टनायक द्वारा दी गई युक्तियों को नहीं किया जिस विशदता से वह अभिनव–भारती में दिया गया है। साथ ही भावकत्व तथा भोजकत्व व्यापार के विषय में काव्यप्रकाश में मात्र नामोल्लेख ही प्राप्त होता है जबकि स्पष्ट रूप से इनका निरूपण अभिनव भारती में प्राप्त है। तथा प्रपिपादन शैली भी सरल है। भट्टनायक के मत का खण्डन भी आचार्य ने युक्तियुक्त किया है। जबकि काव्यप्रकाश में इसका अभाव है। इस प्रकरण में सर्वाधिक महत्त्वशाली भाग खण्डन ही



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani
ISSN 0976-8645

है जिसके काव्यप्रकाश में न होने से मत समग्रता से उपस्थित नहीं होने पाता।

**आचार्य अभिपवगुप्तपाद का अभिव्यक्ति**

रस प्रक्रिया में उपादेयता के तारतम्य से ही, उत्पत्ति अनुमितिवाद, भुक्तिवाद तथा अभ्ज्ञिव्यक्ति, इन मतों का क्रम निर्धारित किया गया । अत एव हम रस– विवेचन की उस भूमि में प्रवेश करते है जहाँ उन्मुक्त उडान भर कर दिशाएँ खोजते हुए रस–विहत को एक गुहा–वासी विरक्त महात्मा ने पज्जर–बद्ध कर लिया ।

**साहचर्येण भिद्यन्ते सरूपावयवक्रियाः।।[6] इति**

विशिष्टभेदाद्भेदः इति हेलाराजीयेपि स्पष्टमवादि।अत एव "एको हि नारायण आसीत् इत्यादौ विशिष्टभेदमादायैवोपपत्तिः" इति शब्दकौस्तुभे [7] जगाद । एवं भूते [8] इति सूत्रभाष्ये "भूते इत्यच्यते कस्मिन् भूते? काले । नैव कालोधिकारोस्ति। एवं तर्हि धातेरिति वर्तते । धातौ भूते । धातोर्वै शब्दो न च शब्दस्य भूतभविष्यद्वर्तमानायां संभवोस्ति? शब्देसंभवादर्थे कार्यं विज्ञास्यते। कः पुनर्धात्वर्थः? क्रिया । क्रियायां भूतायाम्"[9] इति उवाच । अनेन भूतवर्तमानत्वादिकं क्रियानिष्ठमेवेति स्पष्टम् । अत एव वर्तमानादीनां द्योत्यतापि संगच्छते । एवं कालाः परिमाणिना [10] सूत्रभाष्योक्तं "येन मूर्तीनाम् उपचयापचयश्च लक्ष्यन्ते तं कालमित्याहुः। तस्यैव कयाचित्क्रियया युक्तस्याहरिति च भवति, रात्रिरिति च"[11] इति काललक्षणमपि क्रियायाः कालत्वे न विरुद्धम् । सूर्यादिक्रियायाः एव मनुष्याणामुपचयादिहेतुत्वात्। अतः नातिरिक्तः कालः क्रियैव इति दीक्षितादीनाम् आशयः।

**क्रियापरिच्छेदकः कालः**

केचन क्रियापरिच्छेदकः कालः इति अभिप्रयन्ति। क्रिया अनेकक्षणेषु संपद्यमाना काचिदेका भवति। क्षणाश्चायुगपद्भाविनः सक्रमाः। क्रमो हि कालधर्मः। अतः क्रिया कालशक्त्या अनुगृह्यते।आरम्भपरिनिष्पत्तिभ्यां समानेपि द्वे क्रिये चिरक्षिप्राभ्यां सम्पद्येते। द्वयोश्च क्रिययोः उदयानन्तरध्वंसित्वे समानेपि चिरेण कृतम् ,क्षिप्रं कृतम् इति प्रत्येकमनुगतोपि परस्परं विलक्षणःपरिच्छेदः क्रियायाः चिरत्वक्षिप्रत्वरूपपरिमाणविषयकं ज्ञानमेकमुपाधिभूतं संबन्धिनं विना नावकल्पते। यथाह भर्तृहरिः

**यथा तुलायां हस्ते वा नानाद्रव्यव्यवस्थितम्।**

**गुरुत्वं परिमीयेत कालादेवं क्रियागतिः।।[12]**

एकस्मिन् काले समवस्थिते एव तत्सहचारिण्यो नानाविधाः क्रियाः आप्यायन्ते। अतः स कालः हायनाख्यं प्रतिपद्यते। जहाति क्रियामिति हायनः। तथा च पाणीनीयं सूत्रम् हश्चव्रीहिकालयोः[13]। सूत्रेस्मिन् सूत्रकारेण लुप्तेपामागर्भं द्वयोरर्थयोः सहैव कर्तरि ञ्युट्-प्रत्ययस्य व्युत्पत्तिः अनुशिष्टा । व्रीहिः बीजभूतः सहावस्थितमुदकम् उपजहत् सत् हायन इति व्यपदिश्यते। भर्तृहरिरप्याह क्रियाभेदाय कालस्तु [14] इति । एवं क्रियायाः परिच्छेदकः कालः इत्यत्र कालाः परिमाणिना[15] इति सूत्रभाष्यमपि प्रमाणत्वेनोपादीयते। तद्धि "येन मूर्तीनाम् उपचयापचयश्च लक्ष्यन्ते तं कालमित्याहुः। तस्यैव कयाचित्क्रियया युक्तस्याहरिति च भवति, रात्रिरिति च"[16] इति भगवद्भाष्यकाराः निराहुः। तद्व्याख्यायां कैयटेन व्याख्यातं "तरुतृणलताप्रभृतीनां कदाचिदुपचयः, अन्यदात्वपचयः। स प्रत्ययान्तराविशेषेपि यत्कृतः स कालः इत्यर्थः। यद्यैवं तस्यैकत्वात्कथमहरादिविभाग इत्याह तस्यैवेति। परोपाधिक एव सर्वस्य भेद"[17] इति। अनेन भाष्येण व्याख्यानेन च उपाधिभेदेन कालस्यभेदत्वात् क्रियायाः परिच्छेदकः काल इति विज्ञायते। अत्र च प्रमाणं वाक्यपदीयं वचनम् -

**कलाभिः पृथगर्थाभिः प्रविभक्तं स्वभावतः।**

**केचिद्बुध्यनुसंहारलक्षणं ते प्रचक्षते।।[18] इति**





**शक्तिविशेषः कालः**

भर्तृहरिः शक्तिविशेषः कालः इति अभिप्रैति । विश्वात्मैक एव परब्रह्मवाच्यः सत्यो भावः। स एव नानाविधकार्यकारणतया अनन्तशक्तित्वेन व्यवह्रियते। तथा च क्रमिकांश्चक्रभ्रमवत्परावर्तमानान् भावान् प्रकाशयन् कलयति भूतानि इति काल इत्युच्यते।स विभुः स्वतन्त्रः च। अत एव स्वातन्त्र्यशक्तिः कालः इति वाक्यपदीये सिद्धान्तितम्। कालाख्या स्वातन्त्र्यशक्तिः ब्रह्मणःइति तत्रभवतःभर्तृहरेरभिप्रायः। कालाख्येन हि स्वातन्त्र्येण सर्वाः परतन्त्राः जन्मवत्यः शक्तयः समाविष्टाः कालशक्तिवृत्तिम् अनुपतन्ति। प्रतिभावं वैश्वरूपस्य प्रतिबन्धाभ्यनुज्ञाभ्यां शक्त्यवच्छेदेन क्रमवान् इव अवभासते।सर्वेषां विकाराणां कारणान्तरेष्वपि अपेक्षावतां प्रतिबन्धजन्मनाम् अभ्यनुज्ञया सहकारिकारणं कालः। कालशक्तेः प्रतिबन्धशक्तिः, अभ्यनुज्ञाशक्तिः, क्रमशक्तिः, समवायशक्तिः, जराशक्तिश्चेति पञ्च सहकारिण्यः शक्तयः। तासु प्रतिबन्धाभ्यनुज्ञे मुख्ये शक्ती स्तः। यथाह वाक्यपदीये

**प्रतिबन्धाभ्यनुज्ञाभ्यां वृत्तिर्या तस्य शाश्वती।**

**तया विभज्यमानोसौ भजते क्रमरूपताम् ।।[19] इति**

**क्रियातिरिक्तःकालः**

क्रियातिरिक्तः कालः इति आशेते हरदत्तः। वर्तमाने लट् [20] इति सूत्रव्याख्यावसरे अधिश्रयणादिः अधःश्रयणपर्यन्तः ओदनफलावच्छिन्नो विततरूपो व्यापारनिचयो पचेरर्थः। एवं सा क्रिया यावता कालेन निवर्तते स कालः वर्तमानः । तद्योगात् वर्तमानो धात्वर्थः इत्याह । अनेन व्याख्यानेन हरदत्तमते क्रियातिरिक्तः कालः इत्यवगम्यते ।

**क्षणधारारूपः कालः**

सर्वतन्त्रस्वतन्त्रः नागेशभट्टः क्षणधारारूपः कालः इति अभिप्रैति । "क्षणो नाम कालस्य तद्धारारूपस्य अपकर्षावधिभूतः पूर्वापरांशशून्यः। क्रमस्तु तत्प्रवाहाविच्छेदरूपः। मुहूर्ताहोरात्रादिकं सर्वमपि बुद्धिसमाहाररूपमेव। स च कालः भावमात्रस्योत्पत्तिस्थितिनाशहेतुः। शरदादिरूपेण आम्रादीनां पुष्पफलप्रसवशक्तीः प्रतिबध्नाति। वसन्तादिरुपेण च ताः शक्तीः अनुजानातीति तस्य त्रितयहेतुता। घटीयन्त्रसदृशीभिः वसन्तादिप्रवृत्तिभिः सकलाः मूर्तीःतत्तदवस्थारूपेण प्रतिक्षणं परिणामैः कलयतीति कालः इत्युच्यते। तत्क्षणसमूहस्य वसन्ताद्याख्या तु क्रियाभेदादेव औपाधिकी।प्रसिद्धपरिमाणा सूर्यक्रियैव कालः इति तन्नोचितम्। यतः क्रियायाः त्रिक्षणावस्थायित्वेन क्षणव्यवहारानापत्तेश्च। वर्तमाने लट् इति सूत्रभाष्यस्थक्रियापदस्य तत्परिच्छेदकालपरत्वमेव । तदीयकालस्य पर्वतादिस्थितौ आत्मसत्तायाश्च आरोपः"[21] इति नागेशभट्टस्य आशयः।

**कालस्य एकत्वं नित्यत्वं विभुत्वं च**

कलावतां सावयवानाम् अनित्यानां भावानामवच्छेदक एकोपि कालः नियतसूर्यादिपदार्थोदयाद्यवधिपरिग्रहेण मुहूर्तमासादिविभागावस्थां प्राप्नोति। एक एव कालः व्यवहारे क्षणमासादिरूपैःऔपाधिकभेदं प्राप्नोति। परापरचिरक्षिप्रादीनां ज्ञानं सर्वेषां सर्वत्र समानं भवति। अतः व्यापकः कालः।अकृतकत्वात् नित्यश्च सः। महाभाष्यकारेणापि कालः नित्योभ्यधायि।यथा नक्षत्रेण युक्तः कालः[22] इति सूत्रभाष्ये "नित्ये हि कालनक्षत्रे"[23] इत्यादिवाक्येन । कैयटोप्याह कालस्तु नित्यो व्यापी च[24] ।

नित्यो विभुश्च कालोयम् अनुमानेन ज्ञेयःइति वैयाकरणाः। यथावादि भगवद्भाष्यकारेण वर्तमाने लट् सूत्रे भाष्ये "सूक्ष्मो हि भावानुमितेन गम्यः"[25] इति। भर्तृहरिरपि कालस्य अनुमितत्वमेव स्वीकरेति

 ISSN 0976-8645

। उदयास्ताभ्यां समानेपि द्वे क्रिये सम्बन्धपरिच्छेदकान्तरं विना चिरक्षिप्राभ्याम् अनुमातुं शक्ये। कालानुमाने अपरोपि हेतुः –

**क्रिययोरपवर्गिण्योर्नानार्थसमवेतयोः।**
**संबन्धिना विनैकेन परिच्छेदः कथं भवेत्।[26] इति**

**कालस्य त्रैविध्यम्**

अभिन्नेन कालेन व्यवहर्तुमशक्यत्वात् लोकव्यवहारे कालस्य क्रियोपाधिकाः भूतभविष्यद्वर्तमानाः त्रयः भेदाः।यथाह-

**तस्याभिन्नस्य कालस्य व्यवहारे क्रियाकृतः।**
**भेदा इव त्रयःसिद्धा यां लोको नातिवर्तते।।[27] इति**

**निष्कर्षः**

भाष्याद्यवलोकनेन वैयाकरणानां निकाये क्रियापि कालः, क्रियापरिच्छेदकः कालः, शक्तिविशेषः कालः,क्रियातिरिक्तः कालः, क्षणधाररूपः कालः इति विभिन्नानि मतानि दरीदृश्यन्ते। तथापि नागेशातिरिक्ता अन्ये वैयाकरणाः कालः एकः विभुः नित्यश्च अनुमानगम्यः इति सङ्गिरन्ते ।

**पादटिप्पणी**

1. अष्टा. 3.2.123
2. महा.भा. 3अ. 2 पादः. 2आ.123सू. पृ.
3. वै.सि.भूषणम्.पृ.91-92
4. अष्टा. 3.2.123
5. महा.भा. 3अ. 2 पादः. 2आ. 123सू. प्रदीपः.पृ261
6. वा.प. 3 काण्डम्. का.सं.80-81
7. श.कौ.466
8. अष्टा. 3.2.84
9. महा.भा. 3अ. 2 पादः. 2आ.84सू. पृ.234
10. अष्टा. 2.2.5
11. महा.भा. 2अ. 2 पादः. 1आ.5सू. पृ.166-167
12. वा.प. 3 काण्डम्. का.सं.28
13. अष्टा. 3.1.148
14. वा.प. 3 काण्डम्. का.सं.02
15. अष्टा. 2.2.5
16. महा.भा. 2अ. 2 पादः. 1आ.05सू. पृ.166-167
17. महा.भा. 3अ. 2 पादः. 2आ. 123सू. प्रदीपः.पृ.166-167



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani ISSN 0976-8645

18. वा.प. 3 काण्डम्. का.सं.57
19. वा.प. 3 काण्डम्. का.सं.30
20. अष्टा. 3.2.123
21. वै.सि.ल.म. द्वि.भा.पृ.839-841
22. अष्टा. 4.2.1
23. महा.भा.4अ.2 पा.1आ.2सू. पृष्ठ.सं 175
24. महा.भा.4अ.2पा.1आ.2सू. उद्योतःपृष्ठ.सं 176
25. महा.भा.3अ.2पादः2आ.123सू.पृ.265
26. वा.प. 3 काण्डम्. का.सं.27
27. वा.प. 3 काण्डम्. का.सं. 48

**सन्दर्भग्रन्थसूची**

1. पाणिनीयः अष्टाध्यायी-सूत्रपाठः, संपादकः आचार्य पं. सत्यनारायणशास्त्री खण्डूडि,प्रकाशकः –कृष्णदास अकादमी,वाराणसी-1985

2. व्याकरणमहाभाष्यम्,प्रदीपोद्योतसहितम्,संस्कर्ता - गुरुप्रसादशास्त्री, प्रकाशकः – राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली -2006

3. वैयाकरणसिद्धान्तलघुमञ्जूषा,द्वितीयो भागः, प्रकाशकः- चौखम्बा संस्कृत सीरिस ओफिस वाराणसी,

4. शब्दकौस्तुभम्,संस्कर्तारौ विन्ध्येश्वरी प्रसाद द्विवेदी,गणपति शास्त्री मोकाटे च, प्रकाशकः- चौखम्बा संस्कृत सीरिस ओफिस वाराणसी, 1991

5. वाक्यपदीयम् ,तृतीयकाण्डम्,द्वितीयो भागः, व्याख्याद्वयोपेतम्, संपादकः –पद्मश्रीः पण्डितश्रीरघुनाथशर्मा, प्रकाशकः –संपूर्णानन्दसंस्कृतविश्वविद्यालयः,वाराणसी 1998

6. सर्वदर्शनसंग्रहः,श्रीमत्सायणमाधवाचार्यविरचितः,अभ्यंकरोपाह्ववासुदेवशास्त्रिविरचितया दर्शनाङ्कुराभिधया व्याख्यया समेतः, प्राच्यविद्यासंशोधनामन्दिरम्, निर्णयसागरमुद्रणायलः, पुण्यपत्तनम्-1924

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani

Paper Received- 08/02/2018 Paper Published- 22/02/2018

# प्रयोगधर्मी एवं क्रान्तिकारी कवि –हर्षदेव माधव

**राधावल्लभ शर्मा**
साहित्य विभाग, वेदव्यास परिसर. रा.सं.सं., बलाहर, हिमाचलप्रदेश

****************************************************************************************

**प्रमुखशब्द**-प्रयोगधर्मी, हर्षदेव माधव, अर्वाचीन, कवि।

**शोधसारः**

अर्वाचीन संस्कृत साहित्य के मेरुदण्ड के रूप में आचार्य हर्षदेव माधव को उल्लिखित किया जाये तो कोई विस्मय की बात नहीं होगी। जिस मुकाम पर आज वो हैं, वे किसी परिचय के मोहताज़ नहीं हैं। क्या लिखूँ उनके बारे में, कहाँ से शुरु करूँ, जो स्वयं लेखनी के एकछत्र सम्राट् हैं, पुरोधा हैं, जिनका शब्दशिल्प अनूठा है, शब्दों के जो बाज़ीगर हैं, जिनकी संवेदना मानवीय चिन्तन की उर्वरा भूमि है, जिनकी प्रयोगधर्मिता रमणीयता रूपी ओस की बूँदों के समान है।

आधुनिकता के पर्याय कहे जाने वाले इस सर्जक ने सतत संस्कृत साहित्य को पुष्पित एवं पल्लवित किया है। आपकी कवनशीलता वन्दनीय है, नमस्य है।

नया, नया, हमेशा कुछ नया उनकी कविताओं में प्रतिबिम्बित एक सुमधुर नाद है। आपकी कविताओं में उत्साह का उद्घोष है। आपकी कविताओं का संसार निरा नूतन है, अभिनव है, गतिशील है। आप तो सृष्टि-दृष्टि वाले हैं।

****************************************************************************************

आचार्य आनन्दवर्धन कहते हैं – **सहस्रों वाचस्पति भी यदि प्रयत्नपूर्वकं संसार का निरूपण करते रहें, तो उनके शब्दों से यह संसार चुक नहीं सकता, इसी तरह यह कविता का संसार है। हमारे संसार की तरह ही यह भी नई नई कविताओं के द्वारा नये-नये रूपों मे निरूपित किया जाता रहा है और यह भी कभी चुकने को नहीं आता**[77]।

पाश्चात्य कवि टी. एस. इलियट कहते हैं –

**काव्य रचना निर्वैयक्तीकरण की प्रक्रिया है जिसका अर्थ है – कवि के निजी अस्तित्व एवं संवेगों से मुक्ति। सफल कवि होने के लिए यह आवश्यक नहीं है कि उसकी मानसिक शक्ति भी समृद्ध हो, आवश्यकता इस बात की है उसका मन अधिक से अधिक भावों और संवेदनाओं का सफल माध्यम बन सके**[78]।

इन्हीं भावों और संवेदनाओं का मिश्रण माधव की कविताओं में झलकता है। मानवीय संवेदनाओं के संवाहक हैं हर्षदेव माधव। यह संवेदना साहित्यधर्मी और लोकधर्मी है। यह संवेदना उन्हें आधुनिकतावाद की ओर एवं उसके समीपस्थ ले जाती है। आधुनिकतावाद की इस कसौटी पर उनके छन्द एवं उनकी शैली एकदम खरे उतरे हैं। विदेशी छन्दों को भारतीय ज़मीं पर उतारने का सम्पूर्ण श्रेय माधव को ही जाता है। विश्व साहित्य की क़तार में संस्कृत को खडा करने का भी सम्पूर्ण श्रेय माधव जी को ही है। वैश्वीकरण के इस दौर में संस्कृत की साख को बनाये रखने में माधव की कविताएँ अग्रगण्य हैं। जापान देश में प्रचलित हाइकू तथा तान्का नामक छन्द, अंग्रेजी साहित्य के एजरा पाउन्ड, सॉनेट तथा मोनो इमेज नामक छन्द एवं दक्षिण कोरिया के सीजो नामक छन्द को संस्कृत में प्रयोग कर साहित्य जगत् में अभूतपूर्व क्रान्ति का सूत्रपात आपने किया है।

---

77 ध्वन्यालोक – 4/10

78 काव्यदर्शन-विमर्श – पृ.सं. - 132



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani

स्वयं हर्षदेव कहते हैं – "पुष्पस्य एक्सरेच्छविरस्ति मे कविता" अर्थात् मेरी कविता पुष्प की एक्सरे छवि है। भाव-सौन्दर्य की अद्भुत पराकाष्ठा इन पंक्तियों में परिलक्षित होती है। आगे वे कहते हैं – संस्कृत के वर्तमान कवि के रूप में मैं क्षुब्ध हूँ, खिन्न हूँ, प्राचीन संस्कृति की भव्यता और अर्वाचीन सभ्यता की वेदना मेरी काव्यरचनाओं में प्रवाहित है। स्वप्नों और शब्दों के निर्मक्षिक ध्वंसावशेषों में मैं खो गया हूँ। मेरी लेखनी में वेदना, व्यथा, तथा अस्तित्वसंघर्ष स्याही के रूप में है? जैसा कि मैं मानता हूँ –

**मम स्वप्नानि**
**मोहनजोदडो गृहम्**
**को वसेत् तत्र।**[79]

संस्कृत कविता में कल्पनावाद, अतिवास्तववाद, घनवाद, प्रतीकवाद, यथार्थवाद इत्यादि वादों को उजागर कर माधव ने संस्कृत कविता के अभिनव स्वरूप को प्रकाशित किया है। आधुनिकतावाद की एक झाँकी देखिए –

समुद्र के स्वरूप पर कवि की उपमा है –

**समुद्रः**
**जिप्सीयुवतिपृष्ठदेशसमोऽनावृत्तः**
**समुद्रः**
**हब्सीयुवतिनेत्रप्रतिभः श्यामः**
**समुद्रः**
**होनोलुलुसुन्दरीहस्तसन्निभो मसृणः**[80]।

कहाँ पहुँच गई संस्कृत कविता। खुले गगन में उन्मत्त विहार कर रही है -संस्कृत कविता।

प्रतीकाभिव्यक्ति, सङ्केताभिव्यक्ति, गणितीय प्रयोगों द्वारा कविता सम्पादन, प्रतिच्छाया काव्य तथा पिरामिड काव्य द्वारा कविता रचना ये सभी उनकी काव्यशैली के अनुपम उदाहरण हैं। संस्कृत कविता में इन सभी अभिनव आयामों अथवा विधाओं के वे प्रवर्तक हैं। कहीं कहीं ऐसा लगता है कि माधव की कविताओं में अप्रस्तुतविधान का अधिकांश प्रयोग होता है। परन्तु, यह अभिनव प्रयोग है। वास्तव में नूतन को ग्रहण करने के लिए पुरातन पृष्ठभूमि का त्याग करना ही श्रेष्ठ होता है।

भाव-वैषम्य, भाव-शबलता और वक्रोक्ति की त्रिवेणी संगम का एक उदाहरण द्रष्टव्य है –

**अलकनन्दे!**
**मयि स्पन्दते**
**विषुवियसलावारसः**
**त्वयि**
**वेनिसनगरजलम्**[81]।

पारम्परिकता और आधुनिकता का सुन्दर समन्वय माधव की कविताओं की संजीवनी है। **पुराणमित्येव न साधु सर्वम्** इस कालिदास-वचन को उन्होंने कतई नकार दिया है। कई बार ऐसा लगता है कि माधव विश्व-यात्रा पर निकले हो और जहाँ उनको जो अच्छा लगा उन्होंने वह वर्णन कर दिया। यही तो कविता की शाश्वतता है। कवि का विपुल दर्शन यही तो है। कविता का संसार यही तो है, बिल्कुल असीम, नश्वर। कविता के इस असीम कलेवर में माधव का कवि-हृदय एकदम व्यवस्थित रूप से बैठता है।

अलकनन्दा नामक काव्यसंग्रह में बिम्बवाद का अद्भुत प्रयोग प्रस्तुत किया गया है। अपनी छाया को बैलगाडी और पैरों को उसमें जुते बैल कहकर हर्षदेव माधव देह और अवचेतन के सम्बन्ध को उजागर करते हैं। फिर इन्हीं पैरों को घडी के काँटों से उपमा देकर वह देह और काल के सम्बन्ध को इंगित करते हैं।

---

79 संस्कृत वाङ्मय का बृहद् इतिहास – पृ.सं. – 204 (सप्तम खण्ड)

80 वहीं – पृ.सं. - 205

81 संस्कृत साहित्य – बीसवीं शताब्दी – पृ.सं. - 164

हाथ को नागफनी और देह को धरती में उपमित कर मनुष्य के व्यक्तित्व का एक अलग चित्र रचते हैं और अन्त में वे ही हाथ अग्नि हो जाते है जिससे कवि आहुति देना चाहता है।

**स्वच्छायाशकटं कर्षतः**
**पदबलीवर्दौ**
**घटिकायन्त्रकण्टकौ भूत्वा**
**चलतः मम चरणौ**
**थुवरसदृशौ हस्तौ स्तः**
**मम शरीरस्य**
**उषरभुवि**
**अयं हस्तोऽस्ति अग्निः**
**हस्ताय स्वाहा[82]।**

बिम्बवाद की आभा समेटे हुए लोकजीवन को भली-भाँति प्रदर्शित करते हुए माधव यहाँ भारतीय दर्शन के स्वरूप को चित्रित करते हैं। इसी प्रकार माधव ने बंगाल के बाउल गीतों को मुक्त छन्द के संस्कृत काव्य में तराशकर निखारा है। माधव की कुछ कविताएँ ग्राफों, मानचित्रों अथवा चित्राकृतियों के रूप में लिखी गई है। ये कविताएँ आधुनिक भावबोध के साथ-साथ चित्र काव्य का भी नवावतार कही जा सकती है। नई भूमि की तलाश में कवि माधव सर्वदा नूतन विधानों के साथ प्रकट होते हैं। ऐसा कर जाते हैं कि आधुनिकता का समावेश उसमें हो जाये।

माधव के बारे में आचार्य राधावल्लभ त्रिपाठी जी का यह मन्तव्य देखिए – **मेरे कनिष्ठ समकालीनों मे कम से कम दो ऐसे हैं जो संस्कृत में एकदम ही अलग तरह की कविताएँ लिख रहे हैं। लीक से बहुत हटकर, उन दोनों में से एक है हर्षदेव माधव[83]।**

नये शब्दों को गढना, नये शब्दों को कविता में उतारना, सामान्य जन का उसको समझना, अन्य भाषाओं के शब्दों को कविता में पिरोना इन्हीं सब तत्त्वों के साथ-साथ भावबोध को ले चलती हुई सुन्दर अभिव्यञ्जना के साये में पलती है माधव की कविताएँ।

सम-सामयिक घटना और गहरी संवेदनशीलता के साथ अनुभव की प्रामाणिकता और यथार्थानुभूति के परिप्रेक्ष्य में **आतङ्कवादः** शीर्षक से लिखी गई कविता सुन्दर निदर्शन है। इस कविता में निर्मम और जघन्य दानवीय प्रवृत्ति के विरुद्ध कवि का ओजस्वी प्रतिरोध स्वर मुखरित हुआ है। अन्याय एवं शोषण के खिलाफ उसकी आवाज बुलंद हुई है। आपके मुक्त छन्दों में लय को छोड़ने और तोड़ने की बजाय उसके नैरन्तर्य की साधना का प्रत्यय होता है। उसकी गतिशीलता प्रमाणित होती है। समस्त सामाजिक समस्याएँ, अनुभूतियाँ और सामान्य वर्ग की चेतना माधव जी की कविता के साथ जुड़ी हुई है।

तब ही तो आचार्य अभिराज राजेन्द्र मिश्र कहते हैं –

**नव्यसंवेदनैः काव्यर्वचोभङ्गिसमन्वितैः।**
**हर्षदो वागधिष्ठात्र्या हर्षदेवो न संशयः[84]।।**

सामाजिक चेतना, विडम्बन शैली, नव चेतना, विषय नावीन्य समकालिकता, नव-विधा, परम्परावाद, आधुनिकतावाद का समन्वय, यथार्थबोध व्यक्तिवाद और नवार्थसन्धान ये सभी आवश्यक तत्त्व हर्षदेव माधव की कविताओं में परिलक्षित होते हैं।

**तव स्पर्शे स्पर्शे** काव्य संग्रह में **रेड लाइट एरिया** जैसे विषयों पर माधव ने अपनी कलम चलाई है। कहते हैं – वेश्याएँ पिञ्जरे में सारिका के समान क़ैद है, यहाँ वसन्त का उन्माद नहीं है, अर्थसंवेदना से रहित यहाँ मौज़ूद है – शब्दराशि। मानवीय संवेदना को भलीभाँति महसूस किया गया है। मानवता के साथ-साथ भावबोध की अभिव्यञ्जना की प्रसूति भी यहाँ होती है।

---

82 अलकनन्दा – पृ.सं. - 66

83 संस्कृत साहित्य – बीसवीं शताब्दी – पृ.सं.-189

84 निष्क्रान्ताः सर्वे – पृ.सं. - 221



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani ISSN 0976-8645

**अत्र सन्ति पुष्पाणामामन्त्रणानि**
**किन्तु**
**सुरभेर्मादकत्वं नास्ति।**
**अत्र सन्ति**
**पञ्जरबद्धानां सारिकाणां कलानि**
**किन्तु**
**वसन्तोन्मादो नास्ति।**
**शब्दाः सन्ति अर्थसंवेदनरहिताः**
**जलमस्ति चित्रितम्**
**उद्यानमस्ति – प्रफुल्लत्वरहितम्**
**तृष्णावने विहरन्ति**
**काञ्चनपार्श्वमृगचर्मवत्यो हरिण्यः**
**अधुना**
**रामः पञ्चवटीं विहाय गतः**
**अत्र सन्ति**
**निशाचराणां सञ्चारः[85]।**

सामाजिक वास्तवाद के अनूठे शिल्पी हैं हर्षदेव माधव। सामाजिक प्रश्नों को आपने कविता का विषय बनाया है।

समाज का वास्तविक स्वरूप **आय-व्यय पत्रक्रम** कविता में उकेरा गया है –

| | | |
|---|---|---|
| **आयः** | - | **व्ययः** |
| श्रमिकेभ्यः | - | भ्रष्टाचारे |
| अकिञ्चनेभ्यः | - | उत्कोचे |
| सर्वकारसेवकेभ्यः:- | | सर्वकारप्रधानविदेशप्रवासेषु |
| शोषितेभ्यः | - | योजनानां कर्गदेषु |
| दुःखितेभ्यः | - | कार्यालयेषु |
| सामान्यजनेभ्यः - | | वाहनेषु[86] |

गणितीय प्रयोगों के द्वारा आम जन की बात को इस कविता में रेखाङ्कित किया गया है।

मानव चेतना द्वारा प्रकट किया गया वैयक्तिक सत्य ही सही मायनों में अस्तित्ववाद को जन्म देता है। अस्तित्ववाद को दर्शाती हुई एक ऐसी कविता जिसमें कवि अपने अस्तित्व को अलकनन्दा में प्रदर्शित करता हुआ उसकी तरङ्गों में अपने आप को समर्पित कर देता है। जहाँ अलकनन्दा की धारा में उसके प्रणय-निवेदित अश्रु विद्यमान है। वहीं दूसरी ओर मीन का उछलना और लहरों का तरङ्गित होना उसके श्वास और धड़कन है। समुद्र से दूर मिलन के लिए उत्कंठित उसी की तृषा मानो कवि की अपनी कामनाएँ हैं –

**हे अलकनन्दे!**
**कतिपया मे श्वासास्ते वक्षसि सन्ति**
**मम कानिचिदश्रूणि**
**प्रवणरहितानि**
**त्वन्नेत्रपृष्ठे निहितानि सन्ति**
**क्वचिन्मे रक्तं**
**अद्यापि त्वत्स्वप्नधमनिषु प्रवहति**
**तव हस्ते स्पन्दते मे विश्वासमीनः**

---

85 तव स्पर्शे स्पर्शे – 100/147

86 भावस्थिराणि सौहृदानि – पृ.सं. - 91

**ओष्ठयोस्ते निलीयते मे तृषा**
**पश्य, त्वदस्तित्वतले**
**निहितमस्ति मे सर्वस्वम्[87]।**

अभिव्यक्ति से आकार के निर्माण में दत्तचित्त कवि आकारवाद को जन्म देता है। विविध अभिव्यक्तियाँ विभिन्न आकारों को जन्म देकर तत्तद् आनन्द पाठक को प्रदान करती है। अभिव्यक्ति और आकार में यहाँ तादात्म्य सम्बन्ध प्रतिफलित होता है। नवीन कथ्य और शिल्प प्रयोगों के द्वारा आकारवाद को और मजबूती प्रदान की है हर्षदेव माधव ने। प्रस्तुत है इस वाद में एक कविता –

**हा**
**धिक्!**
**श्यामलः**
**पर्वतोऽयं**
**घनीभूतः**
**शोकसदृशः**
**जड़त्वसाक्षात्कार इव**
**मृत्योरनुभूतिक्षणसदृशः**
**भूतकाल-ध्वंसवैभव-प्रतिमः**
**यक्षविप्रयोग-विषादग्रस्तो विषण्णः**
**दुष्कृत्य जातपापैर्मलिनशरीरः पश्चातापग्रस्तः**
**प्रणष्टुमिच्छन्नपि स्वं जीवितं धारयति बलात्**
**बत! धृतराष्ट्रवद् जीविताशापीडितोऽयं वराको दीनदीनः[88]।**

यहाँ शब्दों की आकृति पर्वत के आकार में परिवर्तित होकर तज्जन्य अभिव्यक्ति की प्रतीति कराती है। रसानुभूति की यह नूतन प्रक्रिया है जिसमें कवि अपने को समाहित करता हुआ पाठक को कविताजन्य फल प्रदान करता है।

नारी संवेदना, नारी शोषण, नारीवादी चिन्तन के परिप्रेक्ष्य में माधव की कविताएँ नितान्त रूप से सत्य को उजागर करती है। यौन-शोषण, बलात्कार, छीटाकांशी को प्रतिध्वनित करती हैं ये कविताएँ –

**भाति ते भारतम्** कविता में देखिए एक बानगी –

**यत्र नार्यः सहन्ते विपत्संहर्तिं**
**निर्दयं दह्यमाना जनैर्ज्ञातिभिः।**
**भित्तयो नैव शृण्वन्ति तासां कथां**
**शक्तिभक्तिच्युतं निर्दयं भारतम्[89]।।**

मातृत्व का मखौल उड़ाया जा रहा है। मातृदेवो भव की परम्परा दम तोड़ गई है।

**यस्य वात्सल्यभावेन पूर्णं शुभं**
**ग्रामे ग्रामे गृहं वा पुरे सर्वदा।**
**प्रेषिता वृद्धलोका हि वृद्धाश्रमं**

---
87 वहीं – पृ.सं. - 20
88 निष्क्रान्ताः सर्वे – पृ.सं. - 38
89 भाति ते भारतम् – श्लोक सं. – 28



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani ISSN 0976-8645

**मातृदेवो भवेति भ्रमो भारते[90]।।**

नारी सम्भोग की विवशता भी इनकी कविताओं में झलकती है। पुरुष के द्वारा नारी का शोषण आज भी जारी है। कभी वह त्यागी गई, कभी निकाली गई, कभी ठगी गई और कभी छोड़ी गई। नारी की व्यथा कथा इनके काव्य में खूब उजागर हुई है।

**"गृहिणी"** कविता में देखिए नारी की वेदना को –

**गृहं प्रकाशयितुं**
**गृहिणी**
**भवति दीपशिखा।**
**गृहिण्यां निहितमस्ति**
**अलिखितं रामायणम्**
**अवाचितं गीतारहस्यम्।**
**अश्रुभिः**
**स्वयमेव वर्धिता**
**गृहिणी**
**तुलसीरूपा दृश्यते**
**पातिव्रत्य दीपप्रकाशे[91]।**

सामान्य को विशिष्ट बनाकर प्रस्तुत करने वाले माधव रससिद्ध कवि हैं। **पीनो देवदत्तो दिवा न भुङ्क्ते** इस लक्षणा वाक्य को उन्होंने बखूबी कविता में पिरोकर सामाजिक विद्रूपताओं की तरफ संकेत किया है –

**देवदत्तो जले वसन्नपि**
**करोति वैरं मकरेण**
**काँचगृहे स्थित्वा पाषाणगुटिकाम् अन्यत्र**
**पुष्पेषु विकसन्नपि कण्टकै प्रीतिं करोति**
**अस्मत्टोपीं धृत्वा उच्छालयति ताम् कदापि**
**आपणं गत्वा, स विक्रीणीत आत्मानम्।**
**स्नानगृहं गत्वा, शिश्नदेवो भवति चित्रपटं स्मारं स्मारम्**
**मन्दिरे समभ्यर्च्य मस्जिदे निगूढो भवति**
**शान्तिमन्त्रणां कृत्वा, रथ्यासु प्रसारयत्यातङ्कम्**
**स्वरोटिकां पाचयितुम्**
**इदमेव कारणमस्ति**
**पीनो यत् देवदत्तो दिवा न भुङ्क्ते[92]।**

बिम्बवाद के तो हर्षदेव माधव कुशल चितेरे हैं। वे स्वयं कहते हैं – **मोनोइमेज (बिम्बवाद)** एक पहिये की साईकिल चलाने जैसा खतरों से भरा प्रयोग है, बिम्ब में रूढता नहीं आनी चाहिए, केवल अभिधा बिम्ब की बाधक है –

उदाहरण प्रस्तुत है –

**कृषीवलः स्वभाग्यं वपति**
**किन्तु दुर्भाग्यं प्रोहति[93]।**

---
90 वहीं – श्लोक सं. - 75
91 पुरा यत्र स्रोतः – पृ.सं. - 84
92 भावस्थिराणि सौहृदानि – पृ.सं. - 109
93 निष्क्रान्ताः सर्वे – पृ.सं. - 131

**श्यामवर्णानां काकानां कलकलेषु**
**निमग्नाः श्वेतभित्तयः**
**मलिनवस्त्रबद्धायां**
**असंख्यालिकशपथकलुषितायां**
**भगवद्गीतायां**
**दूषितं सत्यम्[94]।**

असंख्य असत्य शपथों से भगवद्गीता का सत्य भी कलुषित हो गया है। काले कोट पहने वकीलों के वचनों से श्वेत दीवारें कोलाहल से युक्त हो गई है। न्यायालय का खाका यहाँ खींचा गया है।

व्यावहारिक शब्दों का प्रयोग भी माधव ने अपनी कविताओं में साधिकार किया है। **भाति ते भारतम्** में ऐसे प्रयोग बहुल है –

कोमि, टेंक, वेल्लनी, उल्लु, लल्लु, डॉक्टर, मांसार्बुदम् (Cancer), ओजः क्षय (Aids), निरोध (Condoms), बाँम-स्फोट, सेक्स, टी.बी., श्यामधन, सम्मार्जनी इत्यादि।

एक जगह सिमसिमायते शब्द की प्रस्तुति भी दर्शनीय है –

**म्लानमुस्तातृणकल्पाः मे रोमाङ्कुराः**
**कम्पन्ते वात्यासारक्षुब्धा इव।**
**नेत्रयोः सिमसिमायते तीव्रातपे**
**दह्यमानपल्वलजलसदृशः स्वप्नः[95]।।**

प्रयोगधर्मी कवि के रूप में हर्षदेव माधव ने आधुनिक संस्कृत साहित्य को गतिशील बनाया है। प्रत्येक विधा में लिखना, नये-नये शब्दप्रयोग, विस्तृत पटल पर चिन्तन, ये सब उनकी जादूगरी है। प्रेयसी और प्रेमी के संवाद को सॉनेट छन्द के माध्यम से आपने संवादात्मक शैली के दायरे में और अधिक बढ़ोतरी की है। **पुष्पं परन्तु** नामक सॉनेट में प्रिया को आशंका है कि प्रिय भ्रमर द्वारा भुक्त पुष्प के समान उसकी देह को ही चाहता है और आनन्द के उपरान्त उसे त्याग देता है परन्तु माधव कहते हैं – वास्तव में भ्रमर को तो पलभर का सुख मिलता है परन्तु पुष्प का तो जीवन ही सफल हो जाता है।
यथा –

**प्रिया -** **सत्यं नहि प्रियतमो ननु वञ्चकस्त्वं**
**गुञ्जारवेण भ्रमसि भ्रमरोऽसि कान्त।**
**चाटुशतं वदसि षट्पद! पुष्पकर्णे**
**चुम्बितुमिच्छसि कथं कुसुमस्य गात्रम्।।**
**किन्तु प्रयच्छति यदा हृदयं प्रसूनं**
**त्वं लुब्धको झटिति चोरयति सुगन्धम्**
**स्वार्थं विचारयसि विस्मरसि च स्नेह-**
**मन्यत्र भोक्तुमथ यासि च पुष्पदेहम्।।**

**प्रिय -** **व्यर्थाधिक्षिप्तं इह हे रमणि! मधूपः**
**पुष्पं परन्तु सखि! वञ्चयतीति सत्यम्।**
**आकर्षयत् मधुकणेन हि मूर्खभृङ्गं**
**प्राप्नोति तद्विनिमयेन प्रिये! त्वदधिकम्।।**
**किञ्चित् सुखं हि लभते मधूपस्तु मूढः**

[94] पुरा यत्र स्रोतः – पृ.सं. - 20

[95] वहीं – पृ.सं. - 30





**पुष्पं परन्तु सफलं भवतीति पश्य[96]।।**

हाइकू छन्द माधव का प्रिय छन्द है। उत्कट भावाभिव्यक्ति इस छन्द से प्रदर्शित होती है। गागर में सागर की उक्ति को चरितार्थ करने वाले ये हाइकू पाठक के मन पर गहरी छाप छोड़ जाते हैं। एक ही हाइकू के कई अर्थ निकाले जा सकते हैं, इतनी है हाइकू की विशिष्ट क्षमता, एक हाइकू देखिए हमारे आस-पास का –

**आसन्दी रिक्ता**
**कार्यालये शरीरं**
**रुग्णं राष्ट्रस्य[97]।**
**कार्यालयस्य**
**व्यस्ता मक्षिकाः श्रान्ताः**
**पञ्चवादने[98]।**

भारत में कार्यालयों की चिन्ताजनक स्थिति का सचित्र वर्णन यहाँ किया गया है। पाँच बजने का इन्तजार, चाय-नाश्ते में समय की बर्बादी, गप लगाते कर्मचारी। ये सब इस भारत देश की बीमारी है। कवि का अन्तर्मन यहाँ व्यथित हो चुका है।

**अलकनन्दा** की तरंगे, **आसीञ्च मे मनसि** का सुगम संगीत, **मृगया** की गति, **मृत्युशतकम्** का निर्विवाद सत्य, **कालोऽस्मि** का रहस्य, **कल्पवृक्ष** की कल्पना, **मनसो नैमिषारण्य** की शान्ति, **तव स्पर्शे स्पर्शे** की कोमल अनुभूति, **कणक्याक्षिसं माणिक्यनुपूरम्** की पायल की झङ्कार, **भाति ते भारतम्** का सौन्दर्य, **निष्क्रान्ताः सर्वे** की चिरन्तता ये सब हमारे जीवन का प्राण है।

यह अतिशयोक्ति नहीं है कि श्री माधव बीसवीं शताब्दी के आधुनिकतावादी कवियों में कनिष्ठिकाधिष्ठित हैं। उनका काव्य संसार अपूर्व है। समस्त मानव समुदाय के कल्याण हेतु माधव का काव्य तीर्थवत् उपकारी तथा सहृदयहृदयह्लादकारी है। ऐसे कविश्रेष्ठों से यह भारतभूमि गौरवान्वित है।

**सन्दर्भग्रन्थसूची**

1. **ध्वन्यालोक** – व्याख्याकार – आचार्य विश्वेश्वर, ज्ञानमण्डल लिमिटेड, वाराणसी, प्रथम संस्करण – 1962।
2. **काव्य-दर्शन-विमर्श** – आचार्य राममूर्ति त्रिपाठी, ज.रा.रा.सं.वि.वि., प्रथम संस्करण – 2008।
3. **संस्कृत वाङ्मय का बृहद् इतिहास (सप्तम खण्ड)** – आचार्य बलदेव उपाध्याय, उत्तरप्रदेश संस्कृत संस्थान, लखनऊ, प्रथम संस्करण, 2001।
4. **संस्कृत साहित्य – बीसवीं शताब्दी** – राधावल्लभ त्रिपाठी, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली, प्रथम संस्करण – 1999।
5. **अलकनन्दा (काव्यसंग्रह)** – हर्षदेव माधव, पार्श्व पब्लिकेशन, अहमदाबाद, 1990।
6. **निष्क्रान्ताः सर्वे** - हर्षदेव माधव, संस्कृत साहित्य अकादमी, गाँधीनगर, 1997।
7. **तव स्पर्शे स्पर्शे (काव्यसंग्रह)** – हर्षदेव माधव, पार्श्व पब्लिकेशन, अहमदाबाद, 2004।
8. **भावस्थिराणि सौहृदानि (काव्यसंग्रह)** - हर्षदेव माधव, पार्श्व पब्लिकेशन, अहमदाबाद, 2004।

[96] तव स्पर्शे स्पर्शे – पृ.सं. - 12

[97] ऋषेः क्षुब्धे चेतसि – 32/313

[98] वहीं – 32/315

9. **भाति ते भारतम्** – हर्षदेव माधव, श्रीमती सविता दाश पब्लिकेशन, उडीसा, 2007।

10. **ऋषेः क्षुब्धे चेतसि** – पार्श्व प्रकाशन, अहमदाबाद, 2004।

Paper Received- **11/01/2018** Paper Published- **22/02/2018**

# कालिदासीयकाव्येषु वक्रोक्तिचिन्तनम्

**अनुराधामल्लिक्**

शोधच्छात्रा, राष्ट्रियसंस्कृतसंस्थानम्, गुरुवायूरपरिसरः, केरलम्

*****************************************************************************************

**प्रमुखशब्दाः-**साहित्यशास्त्र, कुन्तकः, षड्सम्प्रदायाः, वक्रोक्तिः।

**शोधसारः-** कविविहितस्य शब्दगुम्फनात्मकस्य कर्मविशेषस्य काव्यम् इति संज्ञा प्रसिद्धा अस्ति। तच्च गद्य-पद्य-उभयरूपेण त्रिधा विभक्तम्। तेषु कदाचित् गद्यभागे पद्यत्वं विद्योतते, क्वचित् च पद्यभागे पद्यत्वधर्मः लुप्तः वर्तते इत्येवं गद्यपद्यतारतम्यस्य साधारणपद्धत्यतिरिक्ता काचन सरणिः विज्ञायते। सा एव सरणिः श्रीमता कुन्तकाचार्येण पूर्वाचार्याणाम् अर्थात् भरत-भामह-दण्डि-वामन-आनन्दवर्धनादीनां मतानि पर्यालोच्य काव्याकाव्यविभेदकत्वेन स्वीये वक्रोक्तिजीवितनामके ग्रन्थे वक्रोक्तिनाम्ना निरूपिता। यद्यपि कुन्तकाचार्यात् पूर्वमपि विभिन्नैः कविभिः काव्यशास्त्राचार्यैश्च प्रकारान्तरेण बीजरूपेण वा वक्रोक्तिविषयकः विचारः विहितः तथाऽपि काव्यजीवितरूपेण वक्रोक्तिनाम्नः तत्त्वस्य निरूपणं विवेचनं च सर्वप्रथमं दशमशताब्द्यां श्रीमता कुन्तकाचार्येण एव विहितम् अस्ति।

*****************************************************************************************

कविविहितस्य शब्दगुम्फनात्मकस्य कर्मविशेषस्य काव्यम् इति संज्ञा प्रसिद्धा अस्ति। तच्च गद्य-पद्य-उभयरूपेण त्रिधा विभक्तम्। तेषु कदाचित् गद्यभागे पद्यत्वं विद्योतते, क्वचित् च पद्यभागे पद्यत्वधर्मः लुप्तः वर्तते इत्येवं गद्यपद्यतारतम्यस्य साधारणपद्धत्यतिरिक्ता काचन सरणिः विज्ञायते। सा एव सरणिः श्रीमता कुन्तकाचार्येण पूर्वाचार्याणाम् अर्थात् भरत-भामह-दण्डि-वामन-आनन्दवर्धनादीनां मतानि पर्यालोच्य काव्याकाव्यविभेदकत्वेन स्वीये वक्रोक्तिजीवितनामके ग्रन्थे वक्रोक्तिनाम्ना निरूपिता। यद्यपि कुन्तकाचार्यात् पूर्वमपि विभिन्नैः कविभिः काव्यशास्त्राचार्यैश्च प्रकारान्तरेण बीजरूपेण वा वक्रोक्तिविषयकः विचारः विहितः तथाऽपि काव्यजीवितरूपेण वक्रोक्तिनाम्नः तत्त्वस्य निरूपणं विवेचनं च सर्वप्रथमं दशमशताब्द्यां श्रीमता कुन्तकाचार्येण एव विहितम् अस्ति।

## वक्रोक्तिपरिचयः

स्वभावविरुद्धस्य चमत्कारयुक्तस्य, उक्तविशेषस्य वक्रोक्तिरित्यर्थः काव्यशास्त्रविशारदैः अङ्गीक्रियते। तदेवोक्तं कुन्तकाचार्येण –

**कविव्यापारवक्रत्वप्रकाराः संभवन्ति षट्।**





**प्रत्येकं बहवो भेदास्तेषां विच्छित्तिशोभिनः।।** इति[99]

अस्यार्थस्तु – कवीनां व्यापारात्मिकायां काव्यक्रियायां यद् वक्रत्वम् अर्थात् प्रसिद्धप्रस्थानव्यतिरेकिभावः, तस्य वक्रतायाः विच्छित्तिशोभिनः वैचित्र्यभङ्गीभ्राजिष्णवः इत्यादिप्रकारेण यद्यपि बहवः भेदाः वर्तन्ते तथाऽपि मुख्यतया षट् एव भवन्ति इति। अनेन इदं बोधयति यद् वक्रोक्तिर्नाम कविव्यापारात्मकस्य काव्यस्य प्रसिद्धप्रस्थानव्यतिरेकभावः अर्थात् वैचित्र्यता इति।अन्ये अपि आचार्याः वक्रोक्तिविषये विचारं प्रत्यपादयन्। यथा –

१. वामनाचार्यः *उन्मिमीलकमलं सरसीनां कैरवं च निमीमील मुहूर्तात्* इत्युदाहरणकथनेन वक्रोक्तिम् अलङ्कारेषु परिगणय्य *सादृश्यात् लक्षणा वक्रोक्तिः*[100] इत्यवदन्।

२. आनन्दवर्धनाचार्यः ध्वन्यालोके *उत्कृष्टा सङ्घटना एव वक्रोक्तिः* इति कथयति इति मनोरथः व्याख्याम् अकरोत्।

३. भामहाचार्यास्तु सर्वेषु अलङ्कारेषु अनुस्यूततया वक्रोक्तिः अवश्यं भवेत् इति तदभावे अलङ्काराः मनः विनोदयितुम् अशक्ताः भवेयुः इति वक्रोक्तेः प्राधान्यम् अङ्गीचकार।

४. आचार्यमम्मटस्तु सर्वे अलङ्काराः अतिशयोक्तिमूलकाः इति, अतिशयोक्तिरेव वक्रतां जनयति इति भावयामास। अतिशयः, वक्रता, चारुत्वम् इत्येते शब्दाः मम्मटस्य मते पर्यायभूताः भवन्ति।

५. आचार्यः दण्डी *भिन्नं द्विधा स्वभावोक्तिः वक्रोक्तिश्चेति वाङ्मयम्*[101] इत्यादिकथनपुरस्सरं स्वभावोक्तिर्नाम यथास्थितम् उपवर्णनम्, वक्रोक्तिरित्युक्ते वक्रतया अर्थात् चमत्कारबन्धुरतया वस्तुनः वर्णनम् इति वक्रोक्तिविषये अवदत्।

एतत् सर्वमालोच्यमाने इदं स्पष्टं ज्ञायते यद् आचार्यः कुन्तकः वक्रोक्तिं विशालतमं विधाय, उत्तमकाव्यस्य आवश्यकानि सकलानि लक्षणानि वक्रोक्तौ सन्निवेशितवान् इति। किञ्च अकथयन् यत् वक्रतापदस्य सौन्दर्यम् इत्यर्थो वेदितव्यः। तदर्थं कविभिः समुचितः यत्नः कार्य इति।

एषा वक्रोक्तिः पूर्वोक्तरूपेण प्राधान्येन षोढा भवति। ताश्च यथा – वर्णविन्यासवक्रता, पदपूर्वार्धवक्रता, प्रत्ययवक्रता, वाक्यवक्रता, प्रकरणावक्रता, प्रबन्धवक्रता चेति। एतेषु षट्सु प्रकारेषु प्रमुखकाव्येषु दृश्यमानान् कांश्चन प्रकारान् सोदाहरणं विव्रियते।

## वर्णविन्यासवक्रता

**वर्णविन्यासवक्रत्वम्**[102] इत्यादिना वर्णविन्यासवक्रतायाः स्वरूपं वर्णयति आचार्यः कुन्तकः। तथा च वर्णानां विन्यासः वर्णविन्यासः, अक्षराणां विशिष्टन्यसनं तस्य वक्रत्वं वक्रभावः, प्रसिद्धप्रस्थानव्यतिरेकिणा वैचित्र्येण उपनिबद्धः संनिवेशविशेषविहितः तद्विदाह्लादकारी शब्दशोभातिशयः प्रथमः प्रकारः। अयञ्च वर्णविन्यासः कालिदासीयकाव्येषु बहुत्र दृश्यते। यथा -

---

[99] वक्रोक्तिजीवितम् १.१८

[100] काव्यालङ्कारसूत्राणि ४.८

[101] काव्यादर्शः २.३६३

[102] वक्रोक्तिजीवितम् १.१९

महाकविकालिदासप्रणीते कुमारसंभवे तत्र तत्र वर्णविन्यासवक्रता दृश्यते। द्वितीये सर्गे तारकासुरपराजितानां देवेन्द्र-वरुण-यम-आदित्यादि देवानां परमेश्वरशरणगमने भगवतः परमेश्वरस्य स्तवने –

**आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना।**

**आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे।।**[103]

इत्यस्मिन् श्लोके चतुर्षु अपि पद्येषु पुनः पुनः तकार-मकार-नकाराणाम् आवृत्तिः दृश्यते। एवञ्च यः अक्षराणां विशिष्टन्यसनं वर्णविन्यासः प्रथमः प्रकारः प्रोक्तः वक्रतायाः स च प्रकारः प्रकृते श्लोके दृश्यते। यश्च काव्ये वैभवातिशयमपि बिभर्त्ति।

एवमेव रघुवंशेऽपि बहुषु स्थलेषु वर्णविन्यासवक्रता दृश्यते। तत्र एकम् उदाहरणं प्रथमसर्गे वैवस्वतमनुवर्णने दृश्यते।

**वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।**

**आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव।।**[104]

इत्यस्मिन् श्लोके ओंकारः यथा सर्वैः विद्वद्भिः पूज्यते सर्ववेदानाम् अग्रे कथ्यते तथैव वसुधायां नृपवंशस्य प्रवर्तयिता स श्रीमान् वैवस्वतो मनुरेवास्य सुमहतः रघुवंशस्य प्रथमः पुरुष आसीत् इति वर्णनसमये मनुः, नाम, माननीयः, मनीषिणाम् इत्येवंरूपेण मकार-नकारयोः आवृत्तिः दृश्यते या च वर्ण्यमानार्थानुकूलतां भजन्ती सहृदयहृदयान् आह्लादयन्ती वर्णविन्यासवक्रतां निर्दिशति।

## पदपूर्वार्धवक्रता

**पदपूर्वार्धवक्रता**[105] इत्यादिना पदस्य सुबन्तस्य तिङन्तस्य वा यत् पूर्वार्धं प्रातिपदिकलक्षणं धातुलक्षणं वा तस्य वक्रता वक्रभावः अर्थात् विन्यासवैचित्र्यं पदपूर्वार्धवक्रता इति व्यपदिशति आचार्यः कुन्तकः। तत्र पदपूर्वार्धवक्रतायाः बहवः प्रकाराः वर्तन्ते। यथा – रूढिवैचित्र्यवक्रता, पर्यायवक्रता, विशेषणवक्रता, संवृतिवक्रता, वृत्तिवैचित्र्यवक्रता, लिङ्गवक्रता, क्रियावैचित्र्यवक्रता इत्येवमादिरूपेण। एतेषु प्रकारेषु पर्यायवक्रता कालिदासीयकाव्येषु तत्र दृश्यते। सा च कीदृशी इत्युक्ते – यत्र अनेकशब्दाभिधेयत्वे वस्तुनः किमपि पर्यायपदं प्रस्तुतानुगुणत्वेन प्रयुज्यते तत्र पर्यायवक्रता ज्ञेया।

तत्र रघुवंशे तृतीयसर्गे –

**हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यम्बक एव नापरः।**

**तथा विदुर्मां मुनयः शतक्रतुं द्वितीयगामी न हि शब्द एष नः।।**[106]

---

103 कुमारसंभवम् २.१०

104 रघुवंशम् १.११

105 वक्रोक्तिजीवितम् १.१९

106 रघुवंशम् ३.४९





इत्यस्मिन् श्लोके अनेकेषु पदपूर्वार्धवक्रतायाः भेदेषु पर्यायवक्रता दृश्यते। अत्र पितुः दिलीपमहाराजस्य अश्वमेधीययज्ञस्य अश्वम् अपहरन्तम् इन्द्रं तिरस्कुर्वतः रघोः प्रश्नोत्तरं यच्छति देवेन्द्रः यद् अस्मिन् संसारे यथा पुरुषोत्तमशब्दः नारायणमेव बोधयति, यथा च महेश्वरशब्दः त्रिनेत्रं शङ्करमेव बोधयति, तथा शतक्रतुशब्दः मामेव बोधयति, एष द्वितीयगामी शब्दः नास्ति इति। अत्र यद्यपि -

**इन्द्रो मरुत्वान् मघवान् बिडौजाः पाकशासनः।**

**वृद्धश्रवाः सुनासीलः, पुरुहूतः पुरन्दरः।।**[107]

इत्येवमादिरूपेण नानाविधपर्यायशब्दसत्वे अपि शतक्रतुशब्दस्य प्रयोगः अभिधेयार्थस्य अन्तरङ्गस्थितिप्रकाशनाय विहितः इति ज्ञायते। यस्मात् शतं क्रतवः यस्य असौ शतक्रतुः इतिकथनेन शतं यज्ञाः केवलम् इन्द्रस्य एव संपन्नाः, यस्मात् कारणात् सः देवेन्द्रपदवीं लब्धवान्। अतः स्वपदरक्षणाय एव महाराजदिलीपस्य अश्वम् अपहृतवान् इत्यर्थप्रतिपादनाय शतक्रतुशब्द एव उचितः इति वक्रता स्फुटति अत्र।

अपि च कुमारसंभवे प्रथमसर्गे यथा –

**स कृत्तिवासास्तपसे यतात्मा गङ्गाप्रपातोत्थितदेवदारु।**

**प्रस्थं हिमाद्रेर्मृगनाभिगन्धि किञ्चित् क्वणत्किन्नरमध्युवास।।**[108]

अस्य श्लोकस्यार्थस्तु दक्षरोधात् स्वशरीरत्यागानन्तरं प्रियतमावियुक्तः भगवान् शङ्करः समाधिम् आप्तुम् हिमाद्रेः प्रस्थं किञ्चित् अध्युवास इति। तथा च सः कृत्तिवासाः चर्माम्बरः, यतात्मा नियतचित्तः, पशुपतिः शिवः तपसे हिमाद्रेः गङ्गायाः प्रपतनस्थाने उत्थितदेवदारुस्थाने कुत्रचित् उवास इति। अत्र सत्सु अपि शङ्करस्य –

**ईश्वरः शर्व ईशानःशङ्करश्चन्द्रशेखरः।**

**भूतेशः खण्डपरशुः गिरीशो गिरिशो मृडः।**

**मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः।।** [109]

इति बहुषु पर्यायपदेषु कृत्तिवासाः इति शब्दः प्रयुक्तः महाकविना। तत्रैव वक्रतासौन्दर्यं परिदृश्यते। यतः कृत्तिः वासः यस्य सः कृत्तिवासाः इति व्युत्पत्तिः। अनेन च तपसः परिकरणभूतम् अजिनधारणमपि उक्तं भवति। एवञ्च तपोऽवस्थायां शब्दोऽयमेव उचित इति धिया महाकविना अस्य शब्दस्यैव प्रयोगेन पर्यायवक्रतया वर्ण्यमाने विषये सौन्दर्यं वर्धितम्।

## प्रत्ययवक्रता

**वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः**[110] इत्यादिना पदपरार्द्धवक्रतात्वेन अभिधीयमानां प्रत्ययवक्रतां विवृणोति आचार्यः कुन्तकः। वक्रभावस्य अन्योऽपि प्रभेदः विद्यते यश्च प्रत्ययाश्रयः। वक्रतायाः

---

107 अमरकोशः १.१.४२

108 कुमारसंभवम् १.५४

109 अमकरोशः १.३१,३२

110 वक्रोक्तिजीवितम् १.१९

अयं प्रकारः मेघदूते महाकविना बहुधा आश्रितः दृश्यते। तत्रापि उत्तरमेघे बहुषु स्थलेषु प्रत्ययवक्रता दृश्यते। यथा –

**शेषान्मासान् विरहदिवसस्थापितस्यावधेर्वा**
**विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः।**
**मत्सङ्गं वा हृदयनिहितारम्भमास्वादयन्ती**
**प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः।।**[111]

इत्यस्मिन् श्लोके यक्षप्रियतमायाः यक्षस्य विरहे शेषान् मासान् भुवि देहलीदत्तपुष्पैः गणनया विन्यस्यन्त्याः अथवा प्रियतमसङ्गं हृदयारम्भम् आस्वादयन्त्याः इति शतृप्रत्ययः पदमध्ये वर्ण्यमानविप्रलम्भशृङ्गारस्य अतीत-अनागतां स्थितिं विहाय वर्तमानविरहावस्थां सूचयति। एवञ्च वर्तमानकालाभिधायिशतृप्रत्ययः अत्र विन्यस्यन्ती इत्यत्र, आस्वादयन्ती इत्यत्र च प्रयुक्तः यश्च पदमध्ये सौन्दर्याभिव्यक्त्या पाठकान् रञ्जयति।

एवमेव रघुवंशे सप्तमे सर्गे –

**कश्चिद्द्विषत्खड्गहृत्तोत्तमाङ्गः सद्यो विमानप्रभुतामुपेत्य।**

**वामाङ्कसंसक्तसुराङ्गनः स्वं नृत्यत्कबन्धं समरे ददर्श।।**[112]

अत्र इन्दुमत्याः पाणिग्रहणे संपन्ने तत्र स्वयंवरे समागतानां नृपाणाम् ईर्ष्यया मार्गे राजकुमारजेन सह जातयुद्धावस्थां वर्णयति कविः। अर्थस्तु द्विषतः कृपाणेन छिन्नशिराः कश्चिद् भटः सद्यः देवत्वं प्राप्य सुराङ्गनासहितः सन् युद्धे नृत्यन्तं निजं रुण्डम् अवलोकयामास इत्यर्थः। अत्र नृत्यत् कबन्धम् इत्यत्र शतृप्रत्ययस्य प्रयोगः दृश्यते यश्च शत्रोः दुर्गतिं च प्रदर्शयति राज्ञः प्रभावं च प्रदर्शयति काव्यस्य शोभां च वर्धयति।

**वाक्यवक्रता**

**वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।**

**यत्रालंकारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति।।**[113]

इत्यादिना वाक्यवक्रतायाः स्वरूपं भेदञ्च वर्णयति आचार्यः कुन्तकः। अर्थस्तु पदसमुदायभूतस्य वाक्यस्य भङ्गिभणितवैचित्र्यम्, अन्यः अर्थात् पूर्वोक्तवक्रताव्यतिरेकी समुदायवैचित्र्यनिबन्धः इति। एषा वाक्यवक्रता सहस्रधा भिद्यते अर्थात् बहुप्रकारं भेदम् आसादयति। निष्कृष्टस्तु योऽयं वाक्यस्य वक्रभावः बहुप्रकारः, अस्मिन् अलङ्कारवर्गः सर्वोऽपि अन्तर्भविष्यति। वक्रतायाः अस्य प्रकारोऽपि कविकुलगुरोः काव्येषु दृश्यते। आदौ यथा कुमारसंभवे प्रथमे सर्गे एव सहजवस्तुविमर्शः दृश्यते यथा –

**कपोलकण्डू करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणाम्।**

---

[111] मेघदूतम्, उत्तरमेघः २९

[112] रघुवंशम् ७.५१

[113] वक्रोक्तिजीवितम् १.२०





**यत्र स्रुतक्षीरतया प्रसूत सानूनि गन्ध सुरभीकरोति।।**[114]

इति हिमाद्रौ गजैः गण्डस्थलकण्डू अपनेतुं घर्षितानां सरलद्रुमाणां सम्बन्धिया करिकपोलघर्षणात् क्षरितानि क्षीराणि येषां तेषां भावः तत् तथा हेतुनोत्पन्नः गन्धः सानूनि सुरभीकरोति इति वर्णयति। अत्र हि सुगन्धः वायुः हिमाद्रौ प्रसरति इति भङ्ग्या महाकविना करिकपोलकण्डूयनादिक्रियया वर्णनं सहजवस्तुनः सौन्दर्यं प्रकाशयति इति सहजवस्तुविमर्शः प्रकृते दृश्यते। अत एव महाकविना अपि अत्र अलङ्कारपरिकल्पना न कृता वर्तते।

अपि च रघुवंशे आदावेव -

**त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।**

**यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्।।**

**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।**

**वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।।**

**रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।**[115]

इति रघुवंशस्थानां नृपतीनां वर्णनसमये ये सत्पात्रेभ्यो दातुमेव अर्थसञ्चयं कृतवन्तः, बहुभाषणे अनृतमपि स्यादिति हेतोः मितमेव भाषन्ते स्म, ये पुण्ययशोलाभाय दिग्विजयं कृतवन्तः, सुतार्थमेव स्त्रीपरिणयं कृतवन्तः, ये बाल्यावस्थायां सर्वाः विद्याः अधीतवन्तः, ये युवावस्थायां धर्मानुसारेण भोग्यसुखं सेवितवन्तः, वृद्धवयसि सर्वभोगनिवृत्ताः ऋषिव्रतम् आश्रितवन्तः, ये अन्तकाले योगमार्गेण शरीरं त्यक्त्वा मुक्तिं लब्धवन्तः, तेषां रघूणामन्वयं वक्ष्ये इति रघुवंशनृपतीनां सहजस्वभाववर्णने कस्यापि अलङ्कारस्य अपेक्षा नास्ति। तथा च प्रकृते सहजवस्तुविमर्शः सन्निविष्टः महाकविना।

**प्रकरणवक्रता**

**वक्रभावः प्रकरणे प्रबन्धे वास्ति यादृशः।**

**उच्यते सहजाहार्यसौकुमार्यमनोहरः।।**[116]

इत्यादिना प्रकरणवक्रतायाः प्रबन्धवक्रतायाः च स्वरूपं वर्णयति आचार्यः कुन्तकः। वक्रभावः विन्यासवैचित्र्यं प्रकरणे यादृग् विद्यते प्रबन्धे वा नाटकादौ, सः सहजाहार्यसौकुमार्यमनोहरः। निष्कृष्टस्तु सहजम् – स्वाभाविकम्, आहार्य – व्युत्पत्त्युपार्जितम्, सौकुमार्यम् – रामणीयकम्, तेन मनोहरः – हृदयहारी भवेत् इति। अस्याः वक्रतायाः नवभेदाः वर्तन्ते। ताश्च – पात्रप्रवृत्तिवक्रता, उत्पाद्यलावण्यवक्रता, उपकार्योपकारकवक्रता, आवृत्तिवक्रता, प्रासङ्गिकप्रकरणवक्रता, प्रकरणरसवक्रता, अवान्तरवस्तुवक्रता, नाटकान्तर्गतनाटकवक्रता, सन्ध्यङ्गविनिवेशवक्रता इत्येताः। एषु षट्प्रकारेषु प्रकरणरसवक्रता मेघदूते उत्तरमेघे अत्यन्तरमणीयतया प्रतिपादिता कविकुलगुरुणा।

यथा –

---

[114] कुमारसंभवम् १.९

[115] रघुवंशम् १.७,८,९

[116] वक्रोक्तिजीवितम् १.२१

**श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं**

**वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।**

**उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्**

**हन्तैकस्मिन्क्वचिदपि न ते चण्डि सादृश्यमस्ति।।**[117]

इत्यस्मिन् श्लोके विप्रलम्भशृङ्गारस्य पराकाष्ठा दृश्यते। वस्तुतः यक्षयक्षिण्योः आदर्शप्रेम्णा समस्तमानवानां चेतोभिः अनुभूयमानविप्रलम्भस्यावस्था एव काव्यस्य आधारतले सुचित्रिता कविना। यद्यपि बहुषु स्थलेषु विप्रलम्भशृङ्गारस्य निष्पत्तिः कविना प्रदर्शिता तथाऽपि प्रियतमां यक्षिणीं प्रति सन्दिश्यमानाय मेघाय स्वीयावस्थावर्णने यक्षस्य वचनेषु तत्प्रतिबिम्बते। सः वदति यद् – प्रियङ्गुलतासु शरीरं तर्कयामि, चकितहरिणीनां प्रेक्षणे ते दृष्टिपातः, चन्द्रे मुखकान्तिम्, बर्हिणां बर्हसमूहेषु केशान्, स्वल्पासु नदीनां वीचिषु भ्रूविलासान् उत्पश्यामि। हे चण्डि, तथाऽपि मनोनिवृत्तिः नास्ति। कस्मिन्नपि वस्तुनि तव सादृश्यं नास्ति इति वर्णयति। अतः न निर्वृणोमि इति विप्रलम्भस्य पराकाष्ठां वर्णयति अत्र कविः।

**<u>प्रबन्धवक्रता</u>**

प्रबन्धवक्रताविषये आचार्यः कुन्तकः एवं लिखति यत् – कुत्रिचिन्महाकविविरचिते रामकथोपनिबन्धे नाटकादौ पञ्चविधवक्रतासामग्रीसमुदायसुन्दरं सहृदयहारि महापुरुषवर्णनम् उपक्रमे प्रतिभासते। परमार्थतस्तु विधिनिषेधात्मकधर्मोपदेशः पर्यवस्यति, रामवद्वर्तितव्यं न रावणादिवत् इति। सा इयं प्रबन्धवक्रता रसपरिवर्तनवक्रता, समापनवक्रता, कथाविच्छेदवक्रता, आनुषङ्गिकफलवक्रता, नामकरणवक्रता, कथासाम्यवक्रता इत्येवंरूपेण षोढा भवति। तत्र कुमारसंभवस्य मूलकथा महाभारते, लिङ्गमहापुराणे, शिवपुराणे, स्कन्दपुराणे च समुपलभ्यते। विशिष्टरूपेण स्कन्दपुराणे शिवपुराणे च महर्षिणा वेदव्यासेन जगन्मङ्गलाय भगवतः शङ्करस्य भगवत्याः पार्वत्याः चरितम् उपनिबद्धम्। तत्र भगवतः विभूतिवर्णनसमये महातेजस्विनः कुमारस्य चरितमपि प्रकाशितं भवति। यद्यपि पुराणेषु कथावस्तुनः लक्ष्यं रसालङ्कारादियोजनं नास्ति, अपि तु कथावस्तुभिः भगवतः विभूतिमाहात्म्यप्रकाशनमेव येन जीवानां परमात्मनिः रतिः जायेत तथाऽपि काव्ये कवेः लक्ष्यं पुरुषार्थचतुष्टयनिबन्धनपूर्वकं रसाभिव्यक्तिनिबन्धमेव पारमार्थिकत्वं भवति।

अतः इतिवृत्तवशा आयाताम् स्थितिं परित्यज्य रसानुगुणं कथावस्तुनः योजना विधातव्या इति आलङ्कारिकैरपि अङ्गीकृतम्। एवञ्च कुमारसंभवस्य मूलकथा यद्यपि शिवपुराणेन स्कन्दपुराणेन च सामञ्जस्यं भजते तथाऽपि शिवपुराणे स्कन्दपुराणे च भक्तिसंस्थापनं मुख्यहेतुः। परन्तु कुमारसंभवमहाकाव्ये रसभावादियोजना कविना अभीष्टा। यद्यपि वाच्यवाचकरूपेण कुमारसंभवे प्रधानरसः शृङ्गार एव तथाऽपि उद्देश्यदृष्ट्या व्यङ्ग्यार्थमुखेन अनुशीलयामश्चेत् वीररसप्रधानं महाकाव्यमिदम् इति ज्ञातुं शक्नुमः। एवञ्च प्रकृते रसपरिवर्तनरूपवक्रता दृश्यते। एवमन्येषु काव्येषु अपि दृश्यते। यथा रघुवंशस्य मूलकथा रामायणात् इति आलङ्कारिकैः अभिप्रेते सति रामायणस्य शान्तरसप्रधाने रघुवंशे वीररसः प्रधानो दृश्यते इत्येवं न केवलं कविकुलगुरोः काव्येषु अपि च अन्येषु अपि महाकविनां काव्येषु रसपरिवर्तनरूपवक्रता अवश्यं दृश्यते एव।

**<u>उपसंहारः</u>**

[117] मेघदूतम् उत्तरमेघः ४३





एवं न केवलं महाकविना कालिदासेन अपि च अन्यैरपि बहुभिः कविभिः स्वीयकाव्येषु वक्रतायाः सन्निवेशः कृतः वर्तते। एवञ्च सर्वतः आलोच्यमाने इदं सम्यक् ज्ञातुं शक्यते यद् महाकविमङ्खकचार्यस्य अभिप्रायानुसारम् इयं वक्रता न श्वपुच्छतुल्या, किन्तु चन्द्रकलासदृशी। तथा च वक्रोक्तिः नाम केवलम् उक्तगता वक्रता एव न, तस्यां वक्रतायां चमत्कारित्वमपि अवश्यं स्यात्। एवञ्च सहृदयहृदयानन्द-सन्धायिनी पदभावसङ्घटना वक्रोक्तिः, सा च वैदग्ध्यभङ्गी इति यत् कुन्तकस्य वचनम्, तत् सार्थकम् आप्नोति। अत एव खलु शृङ्गारप्रकाशे अपि भोजराजः –

**वक्रत्वमेव काव्यानां परा भूषेति भामहः।**

**श्लेषः पुष्णाति सर्वासु प्रायो वक्रोक्तिषु स्थितम्।।**[118] इति प्रत्यपादयत्।

**सन्दर्भग्रन्थसूची-**


1. मेघदूतम् – डा. दयाशंकर शास्त्री – चौखम्बा सुरभारती प्रकाशन, वाराणसी-2012
2. मेघदूतम् – पं. थानेशचन्द्र उप्रेती – परिमल पब्लिकेशन्स ,27/28 ,शक्ति नगर,दिल्ली -2014
3. कुमारसम्भवं महाकाव्यम् – चौखम्बा कृष्णदास अकादमी,वाराणसी-1118
4. रघुवंशम्- डा. श्रीकृष्णमणि त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी- 2000
5. रघुवंशम् – डा. श्रद्धा शुक्ला, निर्माण प्रकाशन,दिल्ली- 32 , 1998
6. वक्रोकतिजीवितम् -पं. परमेश्वरदीन पाण्डेय- चौखम्बा सुरभीरती प्रकाशन्, वारणसी-2013
7. काव्यालङ्कारसारसङ्ग्रहः – डा. रमण कुमार शर्मा – विद्यानिधि प्रकाशन्, खजूरी खास दिल्ली -2001
8. काव्यादर्शः- शिव नारायण शास्त्री, परिमल पब्लिकेशन्स, दिल्ली-2009


[118] शृङ्गारप्रकाशः दशमप्रकाशः पृ.४५४

Paper Received- 13/01/2018 Paper Published- 22/02/2018

# उपमालङ्कारस्य सामान्यपरिचयः

**अनुपमामल्लिक्**

शोधच्छात्रा, श्रीसदाशिवपरिसरः, राष्ट्रियसंस्कृतसंस्थानम्, पुरी परिसरः

*****************************************************************************

**प्रमुखशब्दाः-**उपमा, अर्थालङ्कारः, अप्पयदीक्षितः।

**शोधसारः-** उपालङ्कारस्तु एकः अर्थालङ्कारः वर्तते। यत्र उपमानोपमेययोः सहृदय-हृदयाह्लादकत्वेन चारु-सादृश्यम् उद्भूतस्य उल्लसति व्यङ्ग्यमर्यादां विना स्पष्टं प्रकाशते तत्र उपमालङ्कारः। अस्याः लक्षणकथनवेलायां श्रीमान् अप्पय्यदीक्षितः कुवलयानन्दे कथयति यद् –

उपमा यत्र सादृश्यलक्ष्मीः उल्लसति द्वयोः।
हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते।।[119] इति।

अस्यार्थस्तु – यत्र = काव्ये, सादृश्यलक्ष्मीः = चमत्कृतिजनकता, उल्लसति = अधिकं प्रकाशते, द्वयोः = उपमानोपमेययोः, तत्र उपमा इत्यर्थः ज्ञेयः। निष्कृष्टार्थस्तु यत्र धर्मधर्मिणोः चमत्कृतिजनकताविशिष्टसादृश्यम् अधिकं प्रकाशते तत्र उपमारूपोऽलङ्कारः वर्तते इति ज्ञेयः। सादृश्यस्य लक्षणं तु रुद्रटाचार्यः एवं वदति – अन्योन्यधर्मवत्त्वं तु स्पष्टं सादृश्यमुच्यते इति। अत्र वर्ण्यम् उपमेयं न्यूनगुणम्, अवर्ण्यम् उपमानम् अधिकगुणम् इति ज्ञेयम्। तत्र दृष्टान्तं दर्शयति हे कृष्ण ते कीर्त्तिः हंसीव स्वर्गङ्गाम् अवगाहते इति। अस्यार्थः – हे कृष्ण, ते = तव कीर्त्तिः, हंसीव = वरटेव, स्वर्गङ्गाम् = नाकनदीम्, अवगाहते = प्रविशति। तत्र मज्जतां मुखेभ्यः प्रसरणादिति भावः। अत्र कृष्णेत्यस्य अविद्यमानवत्त्वे हंसीवशब्दात् परस्य तव इति पदस्य ते इत्यादेशः। अत्र तावद् इवार्थसादृश्ये निरूपितत्वसंसर्गेण हंस्यादेः अन्वयः।।

*****************************************************************************

अलंकरोतीति अलंकारः, अलंक्रियतेऽनेनेति वा अलंकारः। उभयथापि अलंकरणसाधनम् अलंकार इति अभीष्यते। अलंकाराणामपि काव्ये महन्महत्त्वम्। अत एव खलु **न कान्तमपि निर्भूषं विभाति वनिताननम्** [120] इत्युक्तं भवति। गुणगौरवसम्पन्नाऽपि वनिता यथा सालङ्कारैव शोभते, न तथाऽलंकारविहीना। एवमेव शब्दार्थयोः सौन्दर्याधायकं तत्त्वम् अलंकारः। अलंकारः शब्दार्थयोर्न केवलं सौन्दर्यमेव समेधयति, अपि तु तत्र चमत्कृतिमपि आदधाति। सैव चमत्कृतिः क्वचिद् उपमादिरूपेण, क्वचिद् अतिशयोक्त्या, क्वचिद् वक्रोक्त्या, क्वचिच्च केवलं शब्दसाम्यमूलकेन अनुप्रासेन द्योत्यते। यद्यपि काव्यात्मरूपेण नास्य महत्त्वम्, तथापि शब्दार्थशरीरस्य बाह्यसौन्दर्यवर्धनेन समं रसादीनपि पोषयति। अलंकारस्य तादृशं महत्त्वं यथा शरीरेऽलंकाराणां वस्त्रादीनां वा, यथा सकलगुणसमन्वितोऽपि मानवो निर्वसनो न शोभते, अलंकाररहिता नारी यथा न शोभते, तथैवालंकारहीनं काव्यम्। उद्घोष्यते चैतत्-

119 कुवलयानन्दः १.६

120 काव्यालङ्कारः १.१३





**अलङ्काररहिता विधवैव सरस्वती।**[121]

हिन्दीभाषायामपि अलङ्कारविषये विवेचनं कृतवता प्रथमाचार्येण श्रीमता केशवेन एवम् उक्तं दृश्यते –

**“जदपि सुजाति सुलच्छिनी सुबरन सरस सुवृत्त।**

**भूषण बिनु न बिराजई कविता,बनिता, मित्त।”**

## अलंङ्कार लक्षणम्

अलंङ्कारतत्त्वज्ञ आचार्यो दण्डी काव्यादर्शे अलंकारं लक्षयति-

**काव्याशोभाकरान् धर्मान् अलंङ्कारान् प्रचक्षते।।**[122]

वामनः- **सौन्दर्यमलंकारः** [123] इति अभिदधत् काव्यशास्त्रगतं सर्वमपि सौन्दर्यम् अलंकारशब्देन परिगृह्णाति। स दोषगुणालंकार हानादानाभ्याम्[124] इति दोषाणां परित्यागात् गुणानाम् अलंकाराणां चोपादानेन काव्ये सौन्दर्यरूपोऽलंकारो जायते।

मम्मटोऽलंकारं लक्षयति-

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।।**[125]

विश्वनाथश्चालंकारं लक्षयति-

**शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।**
**रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ।।**[126]

अलंकारा अङ्गदादिवत् शब्दार्थयोः शोभावर्धकाः, रसादीनां चोपकर्तारः। प्रसादादिगुणवत् अलंकारा न अपरिहार्याः, अतएवैते अस्थिरा धर्मा उच्यन्ते।

## उपमालङ्कारः

उपालङ्कारस्तु एकः अर्थालङ्कारः वर्तते। यत्र उपमानोपमेययोः सहृदय-हृदयाह्लादकत्वेन चारु-सादृश्यम् उद्भूतस्य उल्लसति व्यङ्ग्यमर्यादां विना स्पष्टं प्रकाशते तत्र उपमालङ्कारः। अस्याः लक्षणकथनवेलायां श्रीमान् अप्पय्यदीक्षितः कुवलयानन्दे कथयति यद् –

उपमा यत्र सादृश्यलक्ष्मीः उल्लसति द्वयोः।
हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते।।[127] इति।

अस्यार्थस्तु – यत्र = काव्ये, सादृश्यलक्ष्मीः = चमत्कृतिजनकता, उल्लसति = अधिकं प्रकाशते, द्वयोः = उपमानोपमेययोः, तत्र उपमा इत्यर्थः ज्ञेयः। निष्कृष्टार्थस्तु यत्र धर्मधर्मिणोः चमत्कृतिजनकताविशिष्टसादृश्यम् अधिकं प्रकाशते तत्र उपमारूपोऽलङ्कारः वर्तते इति ज्ञेयः। सादृश्यस्य लक्षणं तु रुद्रटाचार्यः एवं वदति – अन्योन्यधर्मवत्त्वं तु स्पष्टं सादृश्यमुच्यते इति। अत्र वर्ण्यम् उपमेयं

121 अग्निपुराणम्

122 काव्यादर्श २.१

123 काव्यालंकारसूत्र १.२

124 काव्यादर्शः १.३

125 काव्यप्रकाशः ८.६७

126 साहित्यदर्पणः १०.१

127 कुवलयानन्दः १.६

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani
ISSN 0976-8645

न्यूनगुणम्, अवर्ण्यम् उपमानम् अधिकगुणम् इति ज्ञेयम्। तत्र दृष्टान्तं दर्शयति हे कृष्ण ते कीर्त्तिः हंसीव स्वर्गङ्गाम् अवगाहते इति। अस्यार्थः – हे कृष्ण, ते = तव कीर्त्तिः, हंसीव = वरटेव, स्वर्गङ्गाम् = नाकनदीम्, अवगाहते = प्रविशति। तत्र मज्जतां मुखेभ्यः प्रसरणादिति भावः। अत्र कृष्णेत्यस्य अविद्यमानवत्त्वे हंसीवशब्दात् परस्य तव इति पदस्य ते इत्यादेशः। अत्र तावद् इवार्थसादृश्ये निरूपितत्वसंसर्गेण हंस्यादेः अन्वयः। सादृश्यस्य प्रयोजकत्वसंसर्गेण स्वर्गङ्गावगाहनाश्रयत्वे साधारणधर्मे, तस्य च स्वरूपसंबन्धेन कीर्तौ इति सादृश्यस्य निपातार्थतया नामार्थं प्रति साक्षात्संबन्धेन विशेष्यत्वे विशेषणत्वेन च बाधकाभावात्। अत्र शाब्दबोधं ब्रवीति आचार्यः जयदेवः – हंसीनिरूपितसादृश्यप्रयोजक-स्वर्गङ्गाकर्मकावगाहनाश्रयत्ववती कीर्तिः इति।

एवम् अस्या उपमायाः चत्वारोऽवयवाः सन्ति। ते च उपमानम्, उपमेयम्, साधारणधर्मः, उपमावाचकश्चेति। तत्राधिकगुणवत्वेन प्रसिद्धम् उपमानं चन्द्रादि। प्रकृते वर्ण्यमानं मुखादि उपमेयम्। आह्लादकत्वादिकं साधारणो धर्मः। इवादि शब्दाः सादृश्यवाचकाः। सादृश्यं च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। इयञ्च उपमा –

वर्ण्योपमानधर्माणाम् उपमावाचकस्य च।
एकद्वित्र्यनुपादानैर्भिन्ना लुप्तोपमाष्टधा।।[128]

इत्युक्तरीत्या पूर्णा, लुप्ता इति तत्रापि लुप्ता अष्टधा इति च बहुधा वर्तते। तथा च संक्षेपतः उपमा द्विविधा – पूर्णा, लुप्ताचेति । यत्र चतुर्णाम् अपि उपमा-अवयवानाम् उपादानं तत्र पूर्णोपमा। उदाहरणं यथा -

गुणदोषौ बुधो गृह्णन् इन्दुक्ष्वेडाविवेश्वरः ।
शिरसा श्लाधते पूर्वं परं कण्ठे नियच्छति ॥[129]

अत्र बुधः उपमेयम्, ईश्वरः उपमानम्, इव शब्दो वाचकः, साधारणधर्मस्तूपमानोपमेययोः न एकः, किन्तु उपमानगतयोः चन्द्रगरलयोः उपमेयगतयोः गुणदोषयोः च बिम्बप्रतिबिम्बभावेन अभेद-अध्यवसायात्, तथा उपादानज्ञानयोः गृह्णन् इत्येकपद-उपादानेन अभेदाध्यवसायात् च साधारणधर्मता परिकल्प्यते। तस्मादत्र पूर्णोपमैव। इयञ्च पूर्णोपमा प्रधानतया श्रौती आर्थी रूपेण द्विधा भवति। उभयमपि पुनः वाक्य-समास-तद्धितगतरूपेण त्रिधा भवति। तथा च पूर्णोपमा षोढा इति मम्मटाचार्याणाम् आशयः।

अपरा च लुप्तोपमा। उपमानोपमेयसाधारणधर्मवाचकानां चतुर्णां मध्ये एकस्य, द्वयोस्त्रयाणां वा अनुपादानात् अप्रयोगात् लुप्तोपमा भवति। अवयवलोपाद् लुप्ता इति अन्वर्थसंज्ञा। वर्ण्यम् उपमेयम्, अवर्ण्यमुपमानम्। अस्याः लुप्तोपमायाः एकोनविंशतिभेदाः सन्ति। ते च धर्मलोपे पञ्च, उपमानलोपे द्वौ, इवादिवाचकलोपे षट्, धर्मवाचकयोर्लोपे द्वौ, धर्म-उपमानयोः लोपे द्वौ, इवादिवाचक-उपमेययोः लोपे एकः, पूर्वोक्तानां त्रयाणाम् अपि लोपे एकः इत्येवं रूपेण एकोनविंशतिभेदाः वर्तन्ते।

आचार्य मम्मटः ६६ अलंकारान् लक्षयति। तेषु अलंकारेषु उपमालंकारः एवं लक्षितः।

**साधर्म्यमुपमा भेदे**

समानैर्बहुभिर्धर्मैः संबन्धः साधर्म्यम्, तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वमुपमेति निर्गलितार्थः। भेदग्रहणमनन्वयव्यवच्छेदाय।

एवञ्च मम्माटाचार्याणां मतानुसारम् उपमा सामान्यतः द्विधा। तत्र पूर्णोपमा षोढा, लुप्तोपमा च एकोनविंशतिः इत्येवंरूपेण पञ्चविंशतिभेदाः ।

**पूर्णा लुप्ता च**

[128] कुवलयानन्दः १.७

[129] कुवलयानन्दः पुटम् ५



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani
ISSN 0976-8645

उपमानोपमेयसाधारणधर्मोपमाप्रतिपादकानामुपादाने पूर्णा, एकस्य द्वयोस्त्रयाणां वा अनुपादाने लुप्ता।

**साग्रिमा।**

**श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा।।**[130]

यथेववादिशब्दा यत्परास्तस्यैव श्रुत्यैवोपमानताप्रतीतिरिति यथेववादिशब्दसत्त्वे श्रौती। तथैव तत्र तस्यैव इत्यनेन इवार्थे विहितस्य च वतेरुपादाने सदृशतुल्यादिशब्दयोगे-

**सरसिजमिदमाननं च तस्याः सममिति चेतसि संमदं विधत्ते।।**[131]

इत्यादौ प्रकृताप्रकृतत्वपर्यालोचनया एव उपमेयोपमानताप्रतीतिरित्यार्थी। तद्वत् तेन तुल्यम् इत्यादिना विहितस्य वतेः स्थितौ आर्थी। इवेन नित्यसमासो विभक्त्य लोपश्च इत्यनेन नित्यसमासे इवशब्दयोगे समासगा। समासानुशासनप्रयोजनंत्व ग्निरिव रराज इत्यादौ। क्रमेणोदाहरणम्-

1. **वाक्यगतश्रौती उपमा**

स्वप्नेऽपि समर्पु त्वां विजयश्रीनं मुञ्चति।
प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा।।[132]

2. **वाक्यगतार्थी उपमा**

चकितहरिणलोललोचनायाः क्रुधि तरुणारुणतारहारिकान्ति।
सरसिमिदमाननं च तस्याः सममिति चेतसि सम्मदं विधत्ते।।[133]

3. **समासगतश्रौती उपमा**

अत्यायतैनियमकारिभिरुद्धतानां दिव्यैः प्रभाभिरनपायमयैरुपायैः।
शौरिर्भजैरिव चतुर्भिरदः सदा यो लक्ष्मीविलासभवनैर्भुवनं वभार।।[134]

4. **समासगत आर्थी उपमा-**

अवितथमनोरथपथनेषु प्रगुणगरिमगीतश्रीः।
सुरतरुसदृशः स भवानभिलषणीयः क्षितीश्वर न कस्य।।[135]

5. & 6. **तद्धितगतश्रौती - तद्धितगतार्थी-**

गाम्भीर्यगरिमा तस्य सत्यं गङ्गाभुजङ्गवत्।
दुरालोकः स समरे निदाघाम्बररत्नवत्।।[136]

एवं काव्यप्रकाशे आचार्येण मम्मटेन एतानि उदाहरणानि षण्णामपि उपमालङ्कारभेदानां प्रदर्शितानि।

*************

[130] काव्यप्रकाशः ८.३६

[131] काव्यप्रकाशः ३९३

[132] काव्यप्रकाशः ३९३

[133] काव्यप्रकाशः ३९४

[134] काव्यप्रकाशः ३९५

[135] काव्यप्रकाशः ३८६

[136] काव्यप्रकाशः ३९७

**सन्दर्भग्रन्थसूची-**

1. बृहद् अलङ्कार मीमांसा, नागेशचन्द्र पाण्डेय, प्रतिभा प्रकाशन, शक्ति नगर, दिल्ली, १९७५.
2. अलङ्कारशास्त्रस्येतिहासः, डॉं जगदीशचन्द्र मिश्र, चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९८५.
3. अलङ्कारनुशीलन, डॉं राजवंशसहाय हीरा, चौखम्बा विद्याभवन, वाराणसी-229009.
4. अलङ्कारसार समीक्षण, श्रीबालकृष्णभट्टप्रणीत, डॉं वृजेश कुमार शुक्ल, नागपब्लिशर्स, जवाहर नगर, दिल्ली, १९९५ .
5. काव्यालङ्कारसारसङ्ग्रहः ,विद्यानिधि प्रकाशन् – रमण कुमार शर्मा .डा –खजूरी खास दिल्ली -२००१
6. काव्यादर्शःदिल्ली ,परिमल पब्लिकेशन्स ,शिव नारायण शास्त्री -, २००९.





Paper Received- **07/01/2018** Paper Published- **22/02/2018**

# आचार्यमम्मट मतानुसार ध्वनिनिरूपण।

**स्वीटी**
शोधच्छात्रा, वेदव्यास परिसर, हिमाचल प्रदेश।

*************************************************************************************

**प्रमुखशब्द-**साहित्यशास्त्र, मम्मट, ध्वनि, षड्सम्प्रदाय।

**शोधसार-** भारतीय साहित्य में काव्यशास्त्र एक सुप्रतिष्ठित शास्त्र है जिसके सिद्धान्त का प्रतिपादन विक्रम के आरम्भकाल से होता चला आ रहा है । काव्यशास्त्र काव्यसौन्दर्य की परख करनेवाला शास्त्र है । आरम्भ में इसके लिए मुख्यरूप से " काव्यालंकार " शब्द का प्रयोग होता था । काव्यशास्त्र के लिए मुख्यरूप से (१) काव्यालंकार (२) काव्यशास्त्र (३) अलंकार शास्त्र (४) साहित्य शास्त्र (५) क्रियाकल्प । क्रियाकल्प इन सभी नामों में अधिक प्राचीन है।जैसा कि वाल्मीकि रामायण के उत्तरकाण्ड में देखने को मिलता है - यहा काव्यविद काव्यरस को ग्रहण करने में समर्थ व्यक्ति है तथा क्रियाकल्प का आशय है काव्यसौन्दर्य की परीक्षा में समर्थ व्यक्ति - " **क्रियाकल्पविदश्चैव तथा काव्यविदो जनान् ।**"१

*************************************************************************************

काव्य में वह कौन सा तत्त्व है जिसकी सत्ता होने पर काव्य में काव्यत्व विद्यमान है । अर्थात् काव्य की आत्मा के रुप में किस तत्त्व को स्वीकार किया जाए । इसके लिए काव्यशास्त्र में छः सम्प्रदायों का आविर्भाव हुआ जिन्होंने काव्य के आत्मतत्व के रुप में अलग अलग तत्त्व को स्वीकार किया है जो निम्न हैं -

(१). रस सम्प्रदाय - इसके प्रवर्तक भरत मुनि हैं । इन्होंने रस को काव्य की आत्मा के रूप में स्वीकार किया है

(२). अलंकार सम्प्रदाय - इसके प्रवर्तक आचार्य भामह हैं । इनके अनुसार काव्य का मूलभूत जीवनाधायक तत्व अलंकार ही है। रुद्रट, दण्डी, उद्भट एवं प्रतिहारेन्दुराज आदि अनेक आचार्य इस सम्प्रदाय के अन्तर्गत आते हैं ।

(३). रीति सम्प्रदाय - इसके संस्थापक आचार्य वामन हैं ।इनका प्रमुख सिद्धान्त ' **रीतिरात्मा काव्यस्य** '२

(४). वक्रोक्ति सम्प्रदाय - इसके संस्थापक आचार्य कुन्तक हैं ।इनके अनुसार वक्रोक्ति ही काव्य की आत्मा है ।

(५). ध्वनि सम्प्रदाय - इस सम्प्रदाय के संस्थापक आनन्दवर्धनाचार्य माने जाते हैं ।इनके मत में काव्य की आत्मा ध्वनि है[137] ' **काव्यस्यात्मा ध्वनिः** ' 3।

(६). औचित्य सम्प्रदाय - इसके संस्थापक आचार्य क्षेमेन्द्र हैं । इन्होंने औचित्य को काव्य की आत्मा के रुप में स्वीकार किया है।

इन सभी सम्प्रदायों में ध्वनि सम्प्रदाय अधिक प्रबल एवं महत्वपुर्ण सम्प्रदाय रहा है । इस सम्प्रदाय के विरोध में वैयाकरण , साहित्यक , वेदान्ती , नैयायिक सभी ने आवाज उठायी , किन्तु अन्त में

---

१. वाल्मीकिरामायण, उत्तरकाण्ड ९४-७
२. काव्यालङ्कारसूत्र, १-२-६
३. ध्वन्यालोक

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani 0976-8645

काव्यप्रकाशकार आचार्य मम्मट ने प्रबल युक्तियों द्वारा उन सब का खण्डन कर ध्वनि सिद्धान्त को पुनः स्थापित किया । इसी कारण आचार्य मम्मट 'ध्वनिप्रतिष्ठापक परमाचार्य ' के रुप में विभूषित किये जाते हैं ।इन्होंने काव्यप्रकाश प्रथमोल्लस में ध्वनि की आंशिक रुप से चर्चा प्रारम्भ करते हुए चतुर्थोल्लास में इसके भेदोपभेद का विस्तार पूर्वक विवेचन किया है। जिसकी चर्चा आगे की जा रही है।

आचार्य मम्मट ने काव्य के तीन भेद बताये हैं। जो इस प्रकार हैं -

१. ध्वनि ( उत्तम काव्य )

२. गुणीभूत व्यंग्य (मध्यम काव्य )

३. चित्र काव्य ( अधम काव्य )

**ध्वनि -**

ध्वनि पद की व्याख्या चार प्रकार से की गयी है। (१) अधिकरणप्रधान - **' ध्वन्यतेऽस्मिन्निति ध्वनिः '**४ यह उत्तम काव्य का वाचक है। (२) करणप्रधान -' **ध्वन्यतेऽनयेति ध्वनिः '** ५यह व्यञ्जनाशक्ति का बोधक होता है। (३) [138]भावप्रधान -**' ध्वननं ध्वनिः '**६ यह रसादि की प्रतीति का बोधक होता है। (४) कर्मप्रधान - **' ध्वन्यते इति ध्वनिः '**७ यह रसादि व्यङ्गय का वाचक होता है।

**" इदमुत्तममतिशयिनि वयङ्गये वा[139]च्याद् ध्वनिर्बुधैः कथितः '**८ जहाँ व्यङ्गयार्थ वाच्यार्थ की अपेक्षा अधिक चमत्कारक हो उसे ध्वनि कहते हैं। यहाँ ध्वनि पद अधिकरणप्रधान होता है।

सर्वप्रथम् आचर्य मम्मट ने दो भेद बताये हैं। लक्षणामूलाध्वनि और् अभिधामूलाध्वनि ।

**अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद् ध्वनौ।**
**अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् ॥**९

**(१). लक्षणामूलाध्वनि -** लक्षणामूलाध्वनि में वाच्यार्थ विवक्षित नहीं होत है क्योंकि लक्षणा मुख्यार्थ के बाध में ही होती है इसलिए इसका दूसरा नाम अविवक्षितवाच्यध्वनि है। इसके दो भेद हैं -

**(क). अर्थान्तरसंक्रमितवाच्यध्वनि -** जहाँ वाच्यार्थ का सीधा वाच्यतावच्छेदकरुपसे अन्वय नही बनता वहाँ शब्द अपने सामान्य अर्थ को छोडकर विशिष्टअर्थ को बोधित करता है | यथा - **त्वामस्मि वच्मि -----**।१० यहाँ
समान्य वचनादि की परिणति उपदेश में हो रही है।

**(ख). अत्यन्ततिरस्कृतवाच्यध्वनि -** वाच्यार्थ के अनुपपद्यमान होने से अत्यन्त तिरस्कृत हो जाता है अर्थात जहाँ शब्द अपने मुख्य अर्थ को छोडकर अर्थान्तर से परिणत हो जाता है वहाँ वाच्य के अत्यन्ततिरस्कृत

---

४.साहित्यदर्पण च० परि० पृ० १२९
५. तथैव
६. तथैव
७. तथैव
८. काव्यप्रकाश प्र० परि०,श्लो० ४ ,सूत्र-२,
९. काव्यप्रकाश च० परि०, श्लो० २४, सूत्र- ३९
१०. काव्यप्रकाश च० परि०, श्लो० २४, उदा०
११. तथैव



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani 0976-8645

होने के कारण अत्यन्ततिरस्कृतवाच्यध्वनि होती है। यथा - **उपकृतं बहु तत्र किमुच्यते------**।११ यहाँ कोई अपकृत व्यक्ति अपकार करने वाले के प्रति विपरीत लक्षणा से कह रहा है।

**(२). अभिधामूलाध्वनि -** जहाँ वाच्यार्थ की प्रतीति के अनन्तर व्यङ्गयार्थ की प्रतीति हो रही हो तो वहाँ अभिधामूलाध्वनि होती है ।इसका दूसरा नाम वि वक्षितान्यपरवाच्यध्वनि है। **अत्र हि वाच्योऽर्थो स्वरुपं प्रकाशयन्नेव [140] व्यंग्यार्थस्य प्रकाशकः । यथा प्रदीपो घटस्य ।**१२ इसके भी दो भेद हैं - **कोऽप्यलक्ष्यक्रमव्यङ्गयो लक्ष्यव्यङ्गयक्रमः परः ।**१३

**(क). असंलक्ष्यक्रमव्यङ्गयध्वनि -** जहाँ वाच्य तथा व्यङ्गयार्थ में पौर्वापर्यभाव की प्रतीति न हो रही हो अर्थात वाच्य एवं व्यङ्गय का क्रम होने पर भी अतिशीघ्रतावश क्रम का ज्ञान न हो तो वहाँ असंलक्ष्यक्रमव्यङ्गय होता है। जिस प्रकार कमल के सौ पत्तों को एक साथ रखकर सूई चूभोने पर उन पत्रों का भेदन तो क्रम से होता है परन्तु ऐसा प्रतीत होता है कि वह एक साथ सौ पत्तों के पार पहुँच गई है। इसी प्रकार रस की अनुभूति में विभावादि क्रम होने पर भी प्रतीति न होने से रसादि को असंलक्ष्यक्रमव्यङ्गयध्वनि कहा गया है। रसादि अर्थात् रस और उसके समान विशेषरूप से आस्वाद योग्य -रसाभास, भाव , भावाभास , भावशान्ति , भावोदय , भावसन्धि और भावशबलता भी इस असंलक्ष्यक्रमव्यङ्गयध्वनि के अन्तर्गत है। संख्या में अनन्त होने के कारण रसादि को एक भेद माना गया है।

**(ख). संलक्ष्यक्रमव्यङ्गयध्वनि - " अनुस्वानाभसंलक्ष्यक्रमव्यङ्गयस्थितिस्तु यः "**१४ संलक्ष्यक्रमध्वनि को अनुस्वानाभध्वनि भी कहते हैं।वयङ्गय का क्रम लक्षित होने के कारण ही इसे अनुस्वानाभध्वनि कहते हैं।घंटे को बजाने के बाद जो मधुर ध्वनि कुछ देर तक होती रहती है उसी को अनुस्वान कहते हैं ।जिस प्रकार इस अनुस्वान में पहले के ठंकार के बाद पौर्वापर्य स्पष्ट प्रतीत होता है उसी प्रकार प्रकृत ध्वनि में पहले वाले वाले वाच्यार्थ के साथ पौर्वापर्य स्पष्ट प्रतीत होता है। जिस प्रकार ठनाके की अपेक्षा अनुस्वान् मधुर होता है उसी प्रकार इसमे वाच्यार्थ की अपेक्षा व्यङ्गयार्थ भी चमत्कारी होता है ।इस संलक्ष्यक्रमव्यङ्गयध्वनि के तीन मुख्य भेद हैं - (१) शब्दशक्त्युत्थ (२) अर्थशक्त्युत्थ (३) उभयशक्त्युत्थ।

**(१). शब्दशक्त्युत्थ -** जहाँ शब्द से वस्तु अथवा अलङ्कार प्रधानरूप से प्रतीत होते हैं , वहाँ क्रम से वस्तुध्वनि एवं अलङ्कारध्वनि कहलाता है ।इसप्रकार शब्दशक्त्युत्थ के दो भेद हुए- **१. वस्तुध्वनि २. अलङ्कारध्वनि**।

**(२). अर्थशक्त्युत्थ -** अर्थशक्त्युत्थध्वनि के सर्वप्रथम् तीन भेद किये गये हैं - **(क) स्वतःसम्भवी** - जो केवल काव्य में ही नहीं पाया जाता अपितु उचितरूप से बाहरसंसार में भी होता है। यथा- घटपटादि। **(ख) कविप्रौढोक्तिसिद्ध** - जो बाहर संसार में न होने पर भी कवि [141]की प्रतिभामात्र से निर्मित होता है।यथा- कौओं को सफेद करने वाली चन्द्रिका ।**(ग) कविनिबद्धवक्तृप्रौढोक्तिसिद्ध** - जो नाटाकादि में कविकल्पित पात्रों का वक्ता के द्वारा प्रतिभामात्र से निर्मित होता है। इन तीनों भेदों में वस्तुध्वनि तथा अलङ्कारध्वनि दो भेद होकर कुल ६ भेद हो जाते है। यह ६ भेद व्यङ्गय और व्यञ्जक दोनों से द्विगुणित होकर १२ भेद हो जाते हैं।

**(३). उभयशक्त्युत्थ - " वाक्ये द्वयुत्थः "**१५ उभयशक्त्युत्थध्वनि केवल वाक्य में होता है इसलिए इसका केवल एक वाक्यगत भेद होता है।

---

१२. साहित्यदर्पण च० परि० पृ० १२९
१३. काव्यप्रकाश च० परि०, श्लो० २५, सूत्र- ४१
१४. काव्यप्रकाश च० परि०, श्लो० ३७, सूत्र- ५२
१५. काव्यप्रकाश च० परि०, सूत्र- ५७
१६. काव्यप्रकाश च० परि०, सूत्र- ६२

अर्थान्तरसंक्रमितध्वनि से लेकर अर्थशक्त्युत्थध्वनि तक कुल १७ भेद हुए ।इनका वाक्यगत और पदगत दो भेद होकर कुल ३४ भेद हुए। और वाक्यगत उभयशक्त्युत्थ को मिलाकर कुल ३५ भेद हुए ।इनमें अर्थशक्त्युत्थ के पद एवं वाक्य के अतिरिक्त प्रबन्धगत भेद भी होते हैं इसलिए उनको जोड देने पर कुल ३५+१२=४७ भेद हो जाते हैं ।

**" भेदास्तदेकपञ्चाशत् "**१६ इन ४७ भेदों में असंलक्ष्यक्रमव्यङ्गय का एक ही भेद है इसका पुनः **पदांश , वर्ण , रचना तथा प्रबन्धगत** भेद होने पर कुल ४७+४=५१ ध्वनिभेद हुए ।
इन ५१ ध्वनि के मुख्यभेदों को परस्पर मिलाने पर तीन प्रकार का संकर तथा एक प्रकार की संसृष्टि से कुल १०४५५ ध्वनि भेद हुए ।

इसप्रकार हम कह सकते हैं कि आचार्य मम्मट ने गवेषणा एवं विवेचन शैली की उत्कृष्टता से ध्वनि-सिद्धान्त को सुदृढतम बना दिया है । इन्होंने ध्वनि का विस्तृतरूप प्रदर्शित करते हुए रस को ध्वनि की संज्ञा प्रदान कर " ध्वनिरात्माकाव्यस्य " के सिद्धान्त की पुष्टि की है अर्थात रस कभी वाच्य नहीं होता । क्योंकि वह अलौकिक एवं विलक्षण होने के कारण व्यञ्जना के द्वारा ही अभिव्यक्त होता है । अतः रस ध्वनि है और काव्य की आत्मा को रस मानना भी ध्वनि का पोषक है ।इसप्रकार आचार्य अभिनवगुप्त के ध्वनि-सम्प्रदाय को स्थिरता एवं सुदृढता आचार्य मम्मट ने प्रदान किया है ।

**सन्दर्भ ग्रन्थ सूची**


१. काव्यप्रकाशः,नागेशभट्टविरचितोद्द्योतयुतगोविन्दठक्कुरविरचित प्रदीपसमेतः, उपाध्यायः,आचार्य श्रीशिवजी, सम्पूर्णानन्द- संस्कृत- विश्वविद्यालयः, वाराणसी, २००२ ।
२. काव्यप्रकाशः, कविचन्द्रविश्वनाथकृतविवरणटीकोपेत, षडंगी, सुरेन्द्रनाथ, न्यु भारतीय बुक कारपोरेशन, २००२ ।
३. काव्यप्रकाशः,महेश्वराचार्यकृत आदर्श संस्कृतटीकोपेतः, उप्रैति, पं. थानेशचन्द्र, परिमल पब्लिकेशन्स, २००३ ।
४. काव्यप्रकाशः, सोलह टीकाओं सहित, मोहन, डाँ ज्योत्सना, नाग प्रकाशक, ११ए./यू.ए. जवाहर नगर, दिल्ली- ११००१६, १९९८ ।
५. काव्यप्रकाशः, सिंह, डाँ सत्यव्रत, चौखम्बा विद्या भवन, २०१२ ।
६. काव्यप्रकाशः(सुधा सागर) टीका, दीक्षित, भीमसेन, चौखम्बा संस्कृत सीरीज कार्यालय, १९२४ ।
७. काव्यप्रकाशः, आचार्य, मम्मट, भण्डारकर ओरियन्टल रिसर्च इन्स्टीट्यूट, १९८३ ।
८. काव्यप्रकाशः, आचार्य, मम्मट, परिमल प्रकाशन, दिल्ली २०१२ ।
९. भाषा विज्ञान, तिवारी, डाँ भोलानाथ, किताब महल, १८-बी, न्याय मार्ग, अशोक नगर इलाहाबाद, २०१६।







१०. Mammata Kavyaprakasa,edited with an Introduction,English Translation and Notes, A.B. Gajendragadkar, Populatr Prakashan,Bombay, 1970.
११. भाषा विज्ञान, सिंह, डाँ. कर्ण, साहित्य भण्डार, सुभाष बाजार, मेरठ-२, २०१५ ।
१२. शब्दार्थमीमांसा, शास्त्री, डाँ गौरीनाथ/ चतुर्वेदी, श्री मिथिलेश, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी-२२१००२ १९९२ ।
१३. संस्कृत शास्त्रों का इतिहास, उपाध्याय, आचार्य बलदेव, चौखम्बा विद्याभवन, वाराणसी, १९९४ ।
१४. संस्कृत काव्यशास्त्र का इतिहास, काणे, पी. बी./शास्त्री डाँ. इन्द्रचंद्र,स्मोतीलाल बनारसीदास, दिल्ली, २०१५ ।
१५. साहित्यदर्पण , मोतीलाल बनारसीदास, शालिग्राम, शास्त्रि, विश्वनाथकृत् , कविराज, दिल्ली , .२०१

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani
ISSN 0976-8645

Paper Received- 11/01/2018 Paper Published- 22/02/2018

# हिमाचलीयोपभाषाया: उत्पत्ति:

योगेश-अत्रि:
संस्कृतप्राध्यापकः, शेरला, पत्रालयः–जाबली, कसौली, सोलन, हिमाचलप्रदेशः

**********************************************************************************

**प्रमुखशब्दाः**-हिमाचलप्रदेशः, उपभाषा, भाषा, पहाड़ी।

**शोधसारः-** उत्तरभारते बहूनि राज्यानि सन्ति। तत्र बह्व्य: भाषा: प्रचलन्ति तथापि हिमाचलप्रदेशे 'पहाड़ी' इति उपभाषाऽस्ति। प्रकृते शोधपत्रे अस्याः भाषायाः उत्पतिविषये विमर्शस्तावत् प्रस्तूयते।

**********************************************************************************

'पहाड़ी' इति उपभाषायामपि सिरमौरी, बघाटी, क्योंथली, कुल्लवी, मण्डयाली, चम्बयाली, कहलूरी इत्यादिभाषाणां प्रचलनमस्ति। उत्तरभारतस्य हिमाचलप्रदेशे भूभागे डॉ. ग्रियर्सनमहोदयस्य Linguistic Survey Of India इत्याख्ये ग्रन्थानुसारं क्योंथली, बघाटी, कुल्लई च प्रसिद्धा वर्तते[142]। 'डॉ. ग्रियर्सनमहोदयानुसारेण भारतस्य भाषावर्गीकरणसमये पर्वतीयभाषां 'पहाड़ी' इति नाम प्रदत:। 'पहाड़ी' इत्यस्य त्रयो भेदा: कृता: सन्ति। (क) पूर्वी पर्वतीया भाषा (पूर्वी पहाड़ी) (ख) मध्यपर्वतीयभाषा (मध्यपहाड़ी) (ग) पश्चिमी पर्वतीयभाषा (पश्चिमी पहाड़ी) च। आर्यभाषापरिवारस्य पूर्वीपर्वतीयभाषां **नेपाली** इत्युच्यते। इयं नेपालदेशे उच्चार्यते। मध्यपर्वतीयभाषां गढ़वालीति। पश्चिमपर्वतीयभाषां जौनसारबाबर:, चम्बा, पश्चिमकश्मीरं, शिमलाया: उच्चस्थराज्यस्य कुल्लू, मण्डी, सुकेतश्चेत्यत्र जनै: उच्चार्यन्ते[143]।' एकविंशतिशताब्द्यां हिमाचलप्रदेशे या उपभाषा उच्चार्यते, सा पश्चिमीया पर्वतीया उपभाषा वर्तते। **पहाड़ी** शब्दस्याऽर्थोऽस्ति यत्पर्वतीयभाषा अर्थात् पर्वते भव: पर्वतीय:, पर्वते जनै: उच्चार्यमाणा या भाषा। लक्षणाऽर्थे द्वितीयाऽर्थ: पर्वतस्य भाषा। शब्दोऽयं रूढ:, एतदर्थं एवमर्थ: प्रकटित:। पहाड़ी इति कथनेन केवलं पर्वतीयोपभाषायारवबोधो जायते नान्यथा। हिमाचलीयोपभाषाया: उत्पत्तिविषये पक्षद्वयं वर्तते। प्रथमपक्ष:, द्वितीयपक्षश्च। प्रथमपक्षे तु खशदरदपैशाच्या:, द्वितीयपक्षे तु शौरसेनी अपभ्रंशात् पर्वतीयभाषाया: उत्पत्तिं स्वीकुर्वन्ति[144]।

**प्रथम: पक्ष:** - डॉ. ग्रियर्सनमहोदयस्याऽभिमतमस्ति यत् वर्तमानपर्वतीयक्षेत्रे सर्वेभ्य: पूर्वं मध्यएशियात: भारतस्योत्तरभागे विदेशय: खशा आगता:, किञ्चिद् कालानन्तरं गुर्जरजाते: जना अत्रैव विदेशादागता:। खशगुर्जरा: आर्यभाषां वदन्ति स्म, किन्तु भारतीयार्यभाषा नासीत्। खशगुर्जराणां सन्तति: उत्तरभारतस्य वर्तमानकनैतखशजना:। राजपूतगुर्जरजना: तस्य कालस्य आगन्तुकगुर्जरजात्या सम्बद्धा: सन्ति।

[142] Linguistic Survey of India,Vol-९.Part-४ Page no.-३७५
[143] Linguistic Survey of India,Vol-९.Part-४ Page no.-१
[144] द्रष्टव्यः, पहाड़ी भाषा व्याकरण, पृ.१७. सम्पा.मौलू राम ठाकुर, हिमाचल कला संस्कृति भाषा अकादमी शिमला।



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani
ISSN 0976-8645

खशभाषामुत्तरपश्चिमक्षेत्रस्य निवासिन: पिशाचानां भाषा पैशाची इत्यत: सम्बद्धा मन्यन्ते[145]।' तथा च पैशाचीं शीना (दरद) जाते: भाषा मन्यते। तस्य मूलकेन्द्रस्थानं कश्मीरस्योत्तरे गिलगितमस्ति। डॉ. ग्रियर्सनमहोदयानुसारं पर्वतीयभाषाया: मूलाधार: दरदपैशाची एव। संस्कृतवाङ्मये खशानां महत्त्वपूर्णं स्थानं वर्तते। श्रीमद्भागवतपुराणे खशानां नाम भारतस्योत्तरपश्चिमदिशि यवनै: साकमागतम्। विष्णुपुराणानुसारं ऋषिकश्यपस्य पत्नीद्वयं खशा, क्रोधवशा च। खशात: यक्षोत्पन्ना:, ते सन्ततय: खशेति नाम्ना प्रसिद्धम्। कश्मीर: तेन सम्बद्ध:। द्वितीयपत्न्या: क्रोधवशात: पिशाचा: पिशिताशी वा उत्पद्यन्ते। मार्कण्डेयपुराणे खशानां शकजात्या सह पर्वतीयनिवासिनां रूपेषु समागतम्। एते अवेदज्ञानत्वात् म्लेच्छा: कथिता:। एतदतिरिच्य भरतस्य नाटयशास्त्रे, वराहमिहिरस्य वृहत्संहितायां, कल्हणस्य राजतरंगिणौ, खशानामुल्लेख: व्यापकरूपेण वर्तते। उपर्युक्तसन्दर्भानुसारं भारतस्योत्तरपश्चिमक्षेत्रं खशानां निवासस्थानं, य: हिन्दुकुशपर्वतस्य समीपे मन्यते। एते क्षत्रियत्वे सति आर्यनियमस्य विपरीतं भोजनवासव्यवहारव्यवस्थादिकारणेन भ्रष्टा: कथिता:[146]। एतदर्थं पिशाचा अप्युक्ता:। खशानां कृतेऽपरं नाम 'दरद' इत्यस्यार्थ: संस्कृते 'पर्वत:' विद्यते। डॉ. ग्रियर्सनमहोदयस्याभिमतं स्वीकृत्य सुप्रसिद्धो भाषावैज्ञानिक: डॉ. सुनीतिकुमारचटर्जीमहोदय: पर्वतीयभाषाया: मूलाधार: खश उपभाषा दरदपैशाची उपभाषा वा स्वीकरोति तथा च राजस्थानी इत्यस्य रूपान्तरभाषेयम्।

**द्वितीयपक्ष:** - डॉ. उदयनारायण तिवारीमहोदयस्य 'भोजपुरी भाषा और साहित्य' इत्याख्ये ग्रन्थे पर्वतीयभाषा शौसेनी प्रसूता मन्यते[147]। डॉ. धीरेन्द्र वर्मामहोदया: डॉ. चटर्जीमहोदयस्य भौगोलिकवर्गीकरणानुसारमेव पर्वतीयभाषां भारतीयार्यभाषासु स्पष्टत: कस्मिंश्चिद्वर्गविशेषे न स्थापयन्ति, किन्तु 'हिन्दी भाषा का इतिहास' इत्याख्ये स्वीये ग्रन्थे पर्वतीयभाषाया: सम्बन्ध: शौरसेनीप्राकृतात् स्वीकुर्वन्ति। डॉ.भोलानाथतिवारीमहोदया: पहाड़ी भाषासमूहस्य भेदद्वयं विहितवन्त:। पश्चिमीपहाड़ी, माध्यमिकी पहाड़ी चेति। इमे हिन्दीभाषाया: पञ्च उपभाषासु अन्यतरे भवत: तथा च उत्पत्त्याधारे पश्चिमीहिन्दीराजस्थानीगुजरातीभि: साकं शौरसेनीद्वारा उद्भूता मन्यते, किन्तु 'नेपाली' पर्वतीयभाषाऽन्तर्गते न समायाति। डॉ. गोविन्दचातकमहोदया: 'मध्य पहाड़ी का भाषाशास्त्रीय अध्ययन' इत्याख्ये ग्रन्थे डॉ. ग्रियर्सनसुनीतिकुमारचटर्जीमहोदययो: विचाराणां विरोधं कुर्वन्तो वदन्ति यत् पर्वतीयभाषाया: मूलाधार: दरदपैशाचप्राकृतादस्तीति नास्ति। तन्मते तु मध्यपहाड़ी (गढ़वाली) उपभाषाया: सम्बन्धोऽस्ति चेत्तर्हि स: शौरसेन्यपभ्रंशादस्ति। डॉ. ग्रियर्सनमहोदयोऽपि शौरसेन्यपभ्रंशाद् पर्वतीयभाषां सम्बद्धां मनुते, किन्तु शौरसेनीं मूलाधारत्वेन नाऽङ्गीकरोति। आधुनिकभारतीयार्यभाषाणां मध्यकालीनार्यभाषाभ्य: सम्बन्धे स्थापिते कृते सति नागरापभ्रंशस्य आवन्त्यशाखाया: व्युत्पत्ते: सङ्केत:

[145]द्रष्टव्यः, पहाड़ी भाषा व्याकरण, पृ.१७-२०.सम्पा.मौलू राम ठाकुर, हिमाचल कला संस्कृति भाषा अकादमी शिमला।
[146]द्रष्टव्यः, पहाड़ी भाषा व्याकरण, पृ.१७. सम्पा.मौलू राम ठाकुर, हिमाचल कला संस्कृति भाषा अकादमी शिमला।
[147]द्रष्टव्यः, पहाड़ी भाषा व्याकरण, पृ.२०. सम्पा.मौलू राम ठाकुर। भोजपुरी भाषा और साहित्य, डॉ. उदयनारायण तिवारी।

लभ्यते। किन्तु विषयेऽस्मिन् डॉ. ग्रियर्सनमहोदयो नियतनिर्णयं कर्तुं न पारयति। नागरापभ्रंशस्यावन्त्या एका शाखा। नागरापभ्रंशः गुजरातस्य तद्समीपवर्तीप्रदेशस्य चाऽपभ्रंश आसीत्। तत्राऽद्यापि नागरब्राह्मणानां व्यावहारिकी भाषा। नागरापभ्रंशस्य प्रसूता अपरशाखा अपि सन्ति। यथा उत्तरमध्यपञ्जाबस्य टक्कः, दक्षिणपञ्जाबस्योपनागरः, गुजरातस्य गौर्जरः, पश्चिमहिन्द्याः जननी शौरसेनी। इत्थं डॉ. ग्रियर्सनमहोदयः शौरसेनीपर्वतीयभाषयोः मध्ये मार्गान्वेषणाय विवशोऽस्ति। तथापि मूलरूपेण पर्वतीयभाषा दरदपैशाच्याः प्रसूता मन्यते। मध्यकाले च पर्वतीयभाषा राजस्थानस्य प्राकृतादपभ्रंशाद् वा प्रभावितेति स्वीकरोति।

दरदपैशाची पर्वतीयभाषायाः मूलाधारो नास्ति। 'पैशाच्याः क्षेत्रं पश्चिमे कश्मीरपर्यन्तं, निःसन्देहश्च कश्मीरीभाषा पैशाचीप्रसूता'। पर्वतीयभाषायाः प्रकृतिविषये सर्वेषां विदुषां एकस्मिन्विचारे सहमतिस्तु वर्तते। पर्वतीयभाषायाः सम्बन्धः स्पष्टतया राजस्थानीति उपभाषातोऽस्ति। एतस्य मूलकारणं उभयोः भाषाभाषिणोः निवासिनां खशगुर्जरसमानपूर्वजाः भवितुमर्हन्ति इति विचारं स्मृतिपथि संस्थाप्य डॉ. गोविन्दचातकमहोदयेन उच्यते यत् 'वास्तविकरूपेण राजस्थान्याः उद्गमः शौरसेनी तस्या एव पर्वतीयरूपं मध्यपहाड़ी स्त्रोतोऽस्ति।' मतमेतत्समर्थयन् डॉ. कृष्णलालहंसमहोदयः स्वीये 'निमाड़ी और उसका साहित्य' इत्याख्ये ग्रन्थे वदति यत् 'शौरसेनी अपभ्रंशाद् पश्चिमीहिन्दीराजस्थानीगुर्जरपर्वतीयभाषाणां विकासो जातः। एतासु गुर्जरराजस्थानीपर्वतीयभाषाः नागरापभ्रंशात् सम्बन्धितोऽस्ति[148]।' भाषावैज्ञानिकतथ्यानुसारमभिज्ञायते यत् शौरसेनी पर्वतीयभाषायाः मूलभाषा। तद्मूलं संस्कृतमिति।

मन्येऽहं खशदरदपैशाची शौरसेनी चेत्यनयोः मूलस्वरूपं संस्कृतमेव इति सुस्पष्टं कृतमस्ति योगेश अत्रिणा लिखिते शोधप्रबन्धे **(हिमाचलप्रदेशस्य सोलनशिमलासिरमौरमण्डलेषु प्रचलितभाषासु संस्कृतप्रभावः** (। स्वतन्त्रताऽनन्तरं अस्य प्रदेशस्य कोऽपि स्वतन्त्रलिपिः नाऽसीत्। एतदर्थं सर्वैः विद्वद्भिः संस्कृतहिन्दीभाषाभ्यः समानः एव पर्वतीयभाषायाः लिपिः देवनागरी चिता। निष्कर्षतः इदं वक्तुं शक्यते यत् समस्तभारतीयभाषाणां उत्पत्तिः संस्कृतादेवाऽभवत्। संस्कृतभाषैव पर्वतीयभाषायाः मूलाऽस्ति।

**सन्दर्भग्रन्थसूची**

१. ठाकुर मौलू राम, पहाड़ी भाषा व्याकरण, हिमाचल कला संस्कृति भाषा अकादमी शिमला, 2008.
२. शर्मा डा. ओम प्रकाश, संस्कृत प्रभावित महासुवी एवं सिरमौरी लोक गाथाएं, सत्यम् पब्लिशिंग हाउस, नई दिल्ली, 2011.
३. पहाडी –हिन्दी शब्दकोश, हिमाचल कला, संस्कृति एवं भाषा अकादमी, शिमला, 1989
४. सिंह वीणा, संस्कृत में अव्यय, नार्दर्न बुक सेंटर, नई, दिल्ली, 2012.
५. शास्त्री चारुदेव, व्याकरण महाभाष्य (प्रथम नवाह्निक), मोतीलाल बनारसीदास, नई दिल्ली, 1994.
६. भाषा विज्ञान, सिंह, डॉ. कर्ण, साहित्य भण्डार, सुभाष बाजार, मेरठ, 2015.
७. शब्दार्थमीमांसा, शास्त्री, डॉ गौरीनाथ/ चतुर्वेदी, श्री मिथिलेश, सम्पूर्णानन्दसंस्कृत विश्वविद्यालय, वाराणसी-1992.
८. संस्कृत शास्त्रों का इतिहास, उपाध्याय, आचार्य बलदेव, चौखम्बा विद्याभवन, वाराणसी,1994.

[148] द्रष्टव्यः, पहाड़ी भाषा व्याकरण, पृ. २१. सम्पा.मौलू राम ठाकुर, हिमाचल कला संस्कृति भाषा अकादमी शिमला।





Paper Received- **11/01/2015** Paper Published- **22/02/2018**

# देशभाषिकशब्देषु विकृतयः

**गायत्री शर्मा**
शोधछात्रा, राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसरः बलाहरः, हिमाचलप्रदेशः।

************************************************************************************

**प्रमुखशब्दाः**-भाषा, देशभाषिकः, शब्दः, पहाडी, देशिशब्दाः, संस्कृतम्।

**शोधसारः** सुविदितमस्ति यदस्माकं लोकयात्रा वाग्देव्याः कृपया सम्भवति। उक्तञ्च काव्यादर्शे वाचामेव प्रसादेन लोकयात्रा प्रवर्तते। क्षेत्रफलस्य दृष्ट्या भारतं दीर्घं राज्यमस्ति। अद्यावधि पर्यन्तं एतस्य एकैव भाषा नास्ति अपितु भौगोलिकदृष्ट्या बह्व्यः भाषाः सन्ति। यथा पहाड़ी, हरियाणवी, पञ्जाबी, तमिल, तेलगु, हिन्दी, मराठी प्रभृतयः। देशे दैनन्दिनव्यवहारे भाष्यमाणा भाषा व्याकरणनिबन्धनरहिता युक्ता वा स्यात्। सर्वाः देशिभाषासु अन्तर्निहिताः सन्ति। इत्याशयकुसुमनिवेदनार्थमत्र शोधपत्रमिदं प्रस्तूयते।

************************************************************************************

ऋग्वेदेऽपि भाषायाः विविधरूपता तथा च पृथक्पृथक् स्थितिः दृश्यते सा मानवस्य जीवने समाविश्य जीविता तिष्ठति। तथा च ऋग्वेदे समाम्नायते-

**'तां मा देवा व्यदधुः पुरुत्रा,**
**भूरिस्थात्रां भूर्यावेशयन्तीम्[149]।।'**

तस्य कालस्य भाषा संस्कृनिष्ठा, वर्तमानकालस्य देशिभाषाऽधिकांशरूपेण अपभ्रंशस्वरूपा (विकारयुक्ता) वर्तते। एतदर्थं सर्वे देशिशब्दाः संस्कृतशब्दकोषे सन्निवेशं कर्तुं न शक्यन्ते। भाषायाः लघुतमः अर्थपूर्णा ऐकिकी शब्द एव। शब्दादेव भाषाज्ञानं जायते। अस्मिन् जगति यदि शब्दस्य प्रकाशो न स्यात् तर्हि त्रिषु लोकेष्वन्धकार एव भवेत्। उक्तं महाकविना दण्डिना –

**'इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते[150]।।'**

अनादि अनन्तः शब्दः एव ब्रह्म। तेनैव लोकस्य व्यवहारः घटपटादिरूपेण विवर्तते। तथोक्तं वाक्यपदीये

**'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः[151]।।'**

[149] ऋग्वेदम् १०.१२५.३.
[150] दण्डिः – काव्यादर्शः, १.४. परिमल पब्लिकेशन्स दिल्ली।
[151] भर्तृहरिः - वाक्यपदीयम् १-१.

1. संस्कृतव्याकरणे शब्दपदयोः विभिन्नतास्ति। मूलशब्दं प्रातिपदिकमुच्यते[152]। यथा रामौ इत्यत्र राम मूलशब्दः, औप्रत्ययं योजयित्वा रामौ इति पदं निष्पद्यते[153]। देशभाषिकशब्देषु प्रायः अधिकतया विभक्तिरहितशब्दानां प्रयोगः दरीदृश्यते लोके। संस्कृते तथा न[154]। अत एव संस्कृतशब्दकोषे विभक्तिरहितशब्दानां प्रयोगाः न करणीयाः।
   यथा गुणः < गुण। पापम् < पाप।

2. निरुक्ते चत्वारि पदानि सन्ति[155]। हिमाचलस्य देशिपर्वतीयभाषायाः शब्दानामपि चत्वारः विभागाः कर्तुं शक्यन्ते। किन्तु ते प्रायः अधिकांशरूपेण विकृतावस्थायां श्रूयन्ते।

3. देशिभाषायां लस्योच्चारणं ळकाररूपे श्रूयते। देहली<देउळ,दे/दयोळ। अर्गलिका<आगळ, आगोळ। कालः<काळ। तालुः<ताळु। छलम्<छळ,छोळ। कुलम्<कुळ। ऋग्वेदे डकारस्य स्थाने ळ उच्चार्यते। अग्निमीळे पुरोहितम्..... इत्यत्र ईड् स्तुतौ धातुः वर्तते।

4. शुक्लयजुर्वेदे ध्वनिपरिवर्तनं विकृतिः वा दृश्यते। यस्य स्थाने जकारः, षस्य स्थाने खकारः इत्यादयः। तथैव प्रवृत्तिरियं देशिभाषायामपि प्राप्यते। यथा यात्रा<जातरा। यजमानः< जजमान। संयोगः< संजोग। सूर्यः< सूरज,सूर्जा। एतादृशान् शब्दान् स्वीकर्तुं शक्यते किन्तु भारतस्य विद्वान्सः परस्परं यदा वदन्ति (सीमितक्षेत्रं परित्यज्य) तदा ते यस्थाने यकार एव, षस्थाने षकार एव उच्चार्यते। अनेन सुस्पष्टमिदं यत् शुक्लयजुर्वेदस्य प्रभावः सीमितक्षेत्रेऽस्ति। अत एव एतादृशान् विकृतवर्णान् अपि न स्वीकरणीयाः।

5. **शषोः सः**[156] इति नियमेन शकारषकारयोः सकारो भवति। हिमाचलस्य बिलासपुरे अयं ध्वनिः श्रूयते। शनिः <सनि। शोकः < सोग। ऋषिः <ऋसि। मूषकः < मूसा। दोषः/षी <दोस/सी। नखः नस।

6. **प्रायः देशिभाषायां** नस्य स्थाने णकारः श्रूयते।
   लिखनम्< लिखणा। दर्शनम्< देखणा। दानम्< दाण। चालनी< चालणु/णो। पानीयम्< पाणि/णी। रानी< राणी।

7. देशिभाषायां मूर्धन्यध्वनयः विकृतरूपेण श्रूयन्ते बाहुल्येन च दृश्यन्ते। डध्वनिः ड़काररूपे लब्धः। गुडः < गुड़।

---

152 अर्थवदधातुरप्रत्ययः प्रातिपदिकम्। कृत्तद्धितसमासाश्च।
153 सुप्तिङन्तं पदम्।
154 नाविभक्तिकं पदं प्रयुञ्जीत्। नापि केवला प्रकृतिः प्रयोक्तव्याः। नापि केवलः प्रत्ययः।
155 चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च।
156 प्राकृत प्रकाशः, श्री वररुचि,२.४३, पृ. ४५।





8. **मध्यव्यञ्जनस्य लोपः श्रूयते।**
   पृष्ठम्< पीठ। राहुः <राउ।
   कुत्रचित् मध्यव्यञ्जनं पूर्णं श्रूयते। जन्म<जनम।

संस्कृतवाङ्मये व्युत्पन्नाव्युत्पन्नरूपयोः बहवः शब्दाः सन्ति। यदि एताः शब्दाः देशिभाषासु सन्ति तान् निःसङ्कोचभावेन स्वीकरणीयाः, विकृताः न। संस्कृते ये अप्रसिद्धाः शब्दाः यथा जंगलम् <जंगल, फालः < फाल किन्तु संस्कृतनिष्ठाः तान् निःसङ्कोचभावेन स्वीकरणीयाः, विकारयुक्ताः न। भारते विविधक्षेत्रेषु प्रयुज्यमाणा भाषा देशिभाषाऽस्ति। जनाः स्वव्यवहारकाले तत्समतद्भवदेशीविदेशीशब्दानां प्रयोगः बाहुल्येन कुर्वन्ति। आधुनिके युगे देशभाषिकभाषासु बहवः संस्कृतशब्दाः सन्ति, केवलं तेषां शब्दानाम् अन्वेषणस्य आवश्कताऽस्ति। तादृशान् शब्दान् शब्दकोषे स्वीकर्तुं शक्यन्ते किन्तु अवधानं स्यात् विकृतयुक्ताः शब्दाः न भवेयुः। महाभाष्ये उक्तम्-

**एकः शब्दः सम्यक् प्रयुक्तः स्वर्गे लोके कामधुक् च भवति।**

**सन्दर्भग्रन्थसूची-**

1. पहाडी –हिन्दी शब्दकोश, हिमाचल कला, संस्कृति एवं भाषा अकादमी, शिमला, 1989
2. काव्यादर्शः, परिमल पब्लिकेशन्स, दिल्ली, 2011.
3. ठाकुर मौलू राम, पहाड़ी भाषा व्याकरण, हिमाचल कला संस्कृति भाषा अकादमी शिमला, 2008.
4. शर्मा डा. ओम प्रकाश, संस्कृत प्रभावित महासुवी एवं सिरमौरी लोक गाथाएं, सत्यम् पब्लिशिंग हाउस, नई दिल्ली, 2011.
5. शास्त्री चारुदेव, व्याकरण महाभाष्य (प्रथम नवाह्निक), मोतीलाल बनारसीदास, नई दिल्ली, 1994.
6. सिंह वीणा, संस्कृत में अव्यय, नार्दर्न बुक सेंटर, नई, दिल्ली, 2012.
7. भाषा विज्ञान, सिंह, डॉ. कर्ण, साहित्य भण्डार, सुभाष बाजार, मेरठ, 2015.
8. शब्दार्थमीमांसा, शास्त्री, डॉ गौरीनाथ/ चतुर्वेदी, श्री मिथिलेश, सम्पूर्णानन्दसंस्कृत विश्वविद्यालय, वाराणसी-1992.
9. संस्कृत शास्त्रों का इतिहास, उपाध्याय, आचार्य बलदेव, चौखम्बा विद्याभवन, वाराणसी,1994.

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani
ISSN 0976-8645

Paper Received- 19/01/2018 Paper Published- 22/02/2018

# संक्रान्तिविचार

**आशुतोष कुमार झा**
आ. सं. महाविद्यालय, रमौली, दरभंगा, बिहार।

*******************************************************************************************

**प्रमुखशब्दा-** अयन, सौर, रवि, सङ्क्रान्ति।

**शोधसार-** मनुष्य के लिए चार कालमान व्यवहारिक माने गये हैं। **''चतुर्भिर्व्यवहारो{त्र सौरचान्द्रार्क्षसावनैः।[1]''** उसमें से सौरमान का प्रयोजन बताते हुए कहा गया है कि **''सौरेण द्युनिशोर्मानं षडशीतिमुखानि च । अयनं विषुवच्चैवं संक्रान्तेः पुण्यकालता ।।[2]''** सौरदिन की गणना सूर्य के एक अंश के भोगकाल के द्वारा किया जाता है। **''रवेश्चक्रभोगो{र्कवर्ष प्रदिष्टं द्युरात्रं च देवासुरणां तदेव।[3]''** जब सूर्य $30^0$ का भोग कर लेता है तब एक सौरमास पूर्ण होता है। सौरमास का गणना संक्रान्ति के द्वारा किया जाता है। एक संक्रान्ति से अगले संक्रान्ति तक का काल सौरमास कहलाता है। **''ऐन्दवस्तिथिभिस्तद्वत् संक्रान्त्या सौर उच्यते।[4]''** मेषादि द्वादशराशि के भ्रमण के क्रम में एकराशि से दूसरे राशि में संक्रमण को अर्थात सूर्य के दूसरे राशि में प्रवेश करने को संक्रान्ति कहा जाता है। **''रवेः संक्रमणं राशौ संक्रान्तिरिति कथ्यते।''** कुल 12 राशि होने के कारण संक्रान्ति की संख्या भी द्वादश होती है। इसमें सूर्य जिस राशि में प्रवेश करता है उसे उसराशि के संक्रान्ति के नाम से जाना जाता है। मेषादि द्वादस संक्रान्तियों को अलग अलग नाम से जाना जाता है। सूर्यसि(ान्त में मेषादि संक्रान्ति का नाम इस प्रकार बताये गये हैं।

*******************************************************************************************

**'' तुलादेः षडशीत्यंशैः षडशीतिमुखं दिनम् ।**
**भचतुष्टयमेवं स्याद् द्विस्वभावेषु राशिषु ।।**
**भचक्रनाभौ विषुवत्द्वितीयं समसूत्रगम् ।**
**अयनद्वितयं चैव चतस्रः प्रथितास्तु ताः ।।**
**तदन्तरेषु संक्रान्तिद्वितयं द्वितयं पुनः ।**
**नैरन्तर्यात्तु संक्रान्त्योर्ज्ञेयं विष्णुपदीद्वयम् ।।[5]''**

भगोल के मध्य में एक ही व्यास पर स्थित दो विषुवत् संक्रान्ति ;मेष-तुलाद्ध होता है ठीक उससे $90^0$ के दूरी पर दो अयन संक्रान्ति ;कर्क-मकरद्ध होता है। इन चारों संक्रान्ति के ठीक बाद आने वाली चारों संक्रान्ति विष्णुपदी संक्रान्ति कहलाती है। विष्णुपदी संक्रान्ति के ठीक बाद वाले चारों संक्रान्ति को षडशीतिमुख के नाम से जाना जाता है जो कि तुला राशि के $86^0$ - $86^0$ अंश के अन्तराल पर अवस्थित होता है। दोनों विषुवत् संक्रान्ति एवं दोनों अयन संक्रान्ति चरराशि में चारों विष्णुपदी संक्रान्ति स्थिर राशि में एवं चारों षडशीतिमुख संक्रान्ति द्विस्वभाव राशियों में स्थित होती हैं।

सूर्य की एक राशि से दूसरे राशि में संक्रान्ति तब होती है जब सूर्य बिम्ब का केन्द्र अगली राशि के आरम्भ बिन्दु पर होता है। सूर्य बिम्ब की पूर्वी किनारा जब अगली राशि के आरम्भ बिन्दु पर होती है तब से लेकर सूर्य बिम्ब के पश्चिमी किनारा को राशि के आरम्भ बिन्दु तक आने तक का काल पुण्यकाल कहलाता है, अर्थात सूर्य बिम्ब का अग्रिम राशि के प्रारम्भिक बिन्दु को पार करने में जितना समय लगता है वह समय पुण्यकाल के नाम से जाना जाता है। जब सूर्य बिम्ब का केन्द्र अग्रिमराशि के आरम्भिक बिन्दु पर होता है तब सूर्य का आध पश्चिमी भाग पूर्वराशि में एवं आध पूर्वी भाग परराशि में होता है



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani
ISSN 0976-8645

यह स्थिति संक्रान्ति की स्थिति होती है। चुकि सूर्य बिम्ब का मान लगभग 32 कला के बराबर है। अतः सूर्य को अग्रिम राशि में प्रवेश करने में सामान्यतया 32 घटी के बराबर लगता है। चुकि संक्रान्ति पुण्यकाल की मध्य स्थिति है अतः संक्रान्ति के समय से 16 घटी पूर्व एवं 16 घटी पर पुण्यकाल माना जाता है। स्पष्ट गणना के लिए सि(ान्तग्रन्थों में त्रैराशिक विधि का प्रयोग किया गया है। संक्रान्तिकालिक सूर्य की दैनिक गति यदि 60 घटी में होती है तो सूर्य बिम्ब के सामान गति कितने घटी में? प्राप्तसमय पुण्यकाल होता है। पुण्यकाल = ;सूर्य बिम्ब का मान ˜ 60 घटीद्ध ÷ सूर्य की दैनिक गति

**'' षष्टिघ्ना भुक्तिफहृता रविबिम्बकला भवन्ति नाड्यस्ताः।**

**संक्रान्तीनां कालः पुण्योर्तो न चाद्यन्तात् ।।[6]''**

मुहूर्त्तचिन्तामणि में सभी संक्रान्ति के लिए अलग- अलग पुण्यकाल का उल्लेख किया गया है। कर्क संक्रान्ति, वृष, सिंह, वृश्चिक, कुम्भ संक्रान्तियॉ जिस समय हो उससे पहले की 16 घटी पुण्यकाल माना गया है परन्तु बाद के 16 घटी को पुण्यकाल नहीं माना गया है। तुला और मेष संक्रान्ति में पूर्व के 16 घटी तथा पर के 16 घटी मिलाकर कुल 32 घटी या पूर्व के 8 घटी तथा पर के 8 घटी को मिलाकर कुल 16 घटी का पुण्यकाल कहा गया है। मिथुन, कन्या, धनु, मीन, मकर इन संक्रान्तियों में पूर्व के 16 घटी को पुण्यकाल न मानकर बाद के 16 घटी को पुण्यकाल माना गया है।

**''याम्यायने विष्णुपदे चाद्या मध्यास्तुलाजयोः ।**

**षटशीत्यानने सौम्ये परा नाडयो{तिपुण्यदा ।। [7]''**

संक्रान्ति के समय के अनुसार पुण्यकाल का निर्धरण करते हुए मनिषियों ने कहा है कि विष्णुपदा और षडशीतिमुख संक्रान्ति में यदि आधेरात से पहले संक्रान्ति हो तो पहले दिन का उत्तरा( तथा आधेरात के बाद संक्रान्ति होने पर दूसरे दिन का पूर्वा( पुण्यकाल होता है। यदि संक्रान्ति ठीक अ(रात्री में हो तो पूर्व तथा पर दोनों दिन पुण्यकाल कहा गया है। कर्क और मकर संक्रान्ति के लिए अलग व्यवस्था कही गयी है। कर्क संक्रान्ति यदि सूर्योदयकाल में हो तो उदय दिन में पुण्यकाल होता है, सूर्योदय से पहले संक्रान्ति होने पर पूर्व के दिन में पुण्यकाल होता है। मकर संक्रान्ति यदि सूर्यास्तकाल के बाद हो तो अगला सम्पूर्ण दिन पुण्यकाल होता है। यदि मकर संक्रान्ति सूर्यास्तकाल में हो तो सूर्यास्त से पुर्व का सम्पूर्ण दिन पुण्यकाल होता है।

**''सूर्योदयसंध्यायां यदि याम्यायनं भवेत् । तदोदयादहः पुण्यं पूर्वाहः परतो यदि ।।**

**सूर्यास्तमनवेलायां यदि सौम्यायनं भवेत् । तदोपेयादहः पुण्यं पराः परतो यदि ।।**

**प्रागर्ध्दरात्रात्पूर्वो पूर्ववद्विष्णुपादयोः । षड्शीतिमुखीचैव परतश्चेत्परे{हनि ।।[8]''**

हमारे मनिषियों ने एक सौरवर्ष में होने वाले द्वादशसंक्रान्तियों का सूक्ष्मरूप से अध्ययन कर संक्रान्ति की स्थिति से इस प्रकृति पर होने वाले प्रभाव के बारे में बताया है।

**भिन्न भिन्न नक्षत्रों में होने वाले संक्रान्ति का जातक पर प्रभाव- ''घोरार्कसड्.क्रमणमुग्ररवौ हि शूद्रान् ध्वाड्.क्षी विशो लघुविधौ च चरर्क्षभौमे ।**

**चौरान् महोदरयुता नृपतीन् ज्ञमैत्रे मन्दाकिनी स्थिरगुरौ सुखयेच्च मन्दा ।।[9]“**

घोरा- यदि सूर्य संक्रान्ति रविवार के दिन हो तथा मघा, भरणी या तीनों पूर्वा नक्षत्रों में से कोई नक्षत्र हो तो उस संक्रान्ति को घोरा कहा जाता है। घोरा नामक संक्रान्ति शूद्रों के लिए सुखदायक होती है। ध्वाड्.क्षी- यदि सूर्य संक्रान्ति सोमवार के दिन हो तथा हस्त, अश्विनी,पुष्य या अभिजित नक्षत्रों में से कोई नक्षत्र हो तो उस संक्रान्ति को ध्वाड्.क्षी कहा जाता है। ध्वाड्.क्षी नामक संक्रान्ति वैश्यों के लिए सुखदायक होती है।

महोदरी- यदि सूर्य संक्रान्ति मंगलवार के दिन हो तथा स्वाती, पुनर्वसु, श्रवण, धनिष्ठा शतभिषा नक्षत्रों में से कोई नक्षत्र हो तो उस संक्रान्ति को महोदरी कहा जाता है। महोदरी नामक संक्रान्ति चोरों के लिए सुखदायक होती है। मन्दाकिनी- यदि सूर्य संक्रान्ति बुध्वार के दिन हो तथा मृगशिरा, रेवती, चित्रा या अनुराध नक्षत्रों में से कोई नक्षत्र हो तो उस संक्रान्ति को मन्दाकिनी कहा जाता है। मन्दाकिनी नामक संक्रान्ति क्षत्रियों के लिए सुखदायक होती है।

मन्दा- यदि सूर्य संक्रान्ति गुरूवार के दिन हो तथा रोहिणी या तिनों उत्तरा नक्षत्रों में से कोई नक्षत्र हो तो उस संक्रान्ति को मन्दा कहा जाता है। मन्दा नामक संक्रान्ति ब्रा“मण के लिए सुखदायक होती है। मिश्रा- यदि सूर्य संक्रान्ति शुक्रवार के दिन हो तथा विशाखा या कृतिका नक्षत्र हो तो उस संक्रान्ति को मिश्रा कहा जाता है। मिश्रा नामक संक्रान्ति पशु के लिए सुखदायक होती है। राक्षसी- यदि सूर्य संक्रान्ति शनिवार के दिन हो तथा मूल,ज्येष्टा, आर्द्रा या आश्लेषा नक्षत्रों में से कोई नक्षत्र हो तो उस संक्रान्ति को राक्षसी कहा जाता है। राक्षसी नामक संक्रान्ति चाण्डालों के लिए सुखदायक होती है।

शास्त्रकारों ने कुल 15 नक्षत्रों को समसंज्ञक 6 नक्षत्रों को बृहतसंज्ञक तथा 6 नक्षत्रों को जघन्यसंज्ञक कहा है।

**’’समं मृदुक्षिप्रवसुश्रवो{ग्निमघात्रिपूर्वास्त्रपभं बृहत्स्यात् ।**

**ध्रुवद्विदैवादितिभं जघन्यं सार्पाम्बुपार्द्रानिलशाक्रयाम्यम् ।।[10]“**

इनमें से यदि जघन्यनक्षत्रों में संक्रान्ति हो तो 15 मुहूर्त्त, बृहदसंज्ञक नक्षत्रों में संक्रान्ति हो तो 45 मुहूर्त्त और यदि समसंज्ञक नक्षत्रों में संक्रान्ति हो तो 30 मुहूर्त्त संक्रान्ति कहा गया है। बृहदसंज्ञकनक्षत्रों में संक्रान्ति होने से अन्न का भाव सस्ता होता है। जघन्यनक्षत्रों में संक्रान्ति होने से अन्नादि पदार्थो का भाव महॅगा होता है तथा समसंज्ञक नक्षत्रों में संक्रान्ति होने से अन्नादिक पदार्थो के भाव पर कोई असर नही होता है। संक्रान्ति जिस नक्षत्र में होता है उस नक्षत्र से जन्मनक्षत्र तक गणना करने पर प्रथम तीन नक्षत्र अशुभ उसके बाद के क्रम से 6 नक्षत्र शुभ, 3 नक्षत्र अशुभ, 6 नक्षत्र बृ(िकारक, 3 नक्षत्र हानिकारक तथा अन्तिम के 6 नक्षत्र लाभकारी कहा गया है।

**भिन्न भिन्न करण में होने वाले संक्रान्ति का जातक पर प्रभाव -**

**’’बालवे कौलवे नागे तैतिले करणे यदि । उत्तिष्ठन्सड्.क्रमत्यर्कस्तदा लोकः सुखी भवेत् ।।**
**गरे बवे वणिग्विष्टौ किंस्तुघ्ने शकुनौ व्रजेत् । राज्ञो दोषेण लोको{यं पीड्यते सम्पदा समम् ।।[11]“**

यदि सूर्य का संक्रमण बालव, कौलव, नाग और तैतिल नामक करण में हो तो मनुष्य सुखी होता है। यदि सूर्य का संक्रमण गर,बव, वणिक्, विष्टि, किंस्तुघ्न तथा शकुनि नामक करणों में हो तो राजा के दोष से जन धन का नाश होता है। तैतिल, नाग, चतुष्पद इन तीनों करणों में सूर्य सोते हुए, गर, वणिज, विष्टि, बव एवं बालव इन 5 करणों में सूर्य बैटकर, किंस्तुध्न, शकुनि और कौलव इन तीन करणों में खड़े





हुए सूर्य संक्रान्ति करते हैं। यदि सूर्य का सोते हुए संक्रान्ति हो तो अन्नादि पदार्थ महँगा तथा अर्ध्दवर्षणकारक, सूर्य जब बैटे हुए प्रवेश करे तो सामान्यपफल तथा सूर्य जब खड़े होकर प्रवेश करे तो अन्नादि पदार्थ सस्ता एवं वृष्टिकारक होता है।

**वार एवं समय के अनुसार संक्रान्ति का प्रभाव-**

**’’ संक्रान्तिर्जायते यत्र भास्करे भूसुते शनौ । तस्मिन्मासि भयं घोरं दुर्भिक्षं दृष्टितो भयम् ।।**

**संक्रान्तिसमये भानोर्भवेत्सप्तमगः शशी । तदाकाले महर्ंर्ध स्यात्सर्वधन्यं सुनिश्चितम् ।।[12]“**

यदि सूर्य की संक्रान्ति मंगलवार या शनिवार को हो तो उस मास में दुर्भिक्ष होता है और लोगों में भय व्याप्त होता है। यदि संक्रान्ति के दिन सूर्य के राशि से सातवें घर में चन्द्रमा हो तो उस मास में अन्नादिक पदार्थ महंगा होता है।

**’’ सूर्योदये विपत्तिर्जगतां मध्यो सकलशस्या विनाशकारिणी ।**

**अस्तं गते पफलं तृप्तं च सौरत्यं सुभिदां मंजुलं निशिचार् रात्रौ।।[13]“**

दोपहर से पूर्व संक्रान्ति होने पर राजा का नाश होता है, मध्या में संक्रान्ति होने पर ब्रा“मणों का, तीसरे पहर में संक्रान्ति होने पर वैश्यों का तथा सांयकाल में संक्रान्ति होने पर शूद्रों का नाश होता है। प्रदोषकाल में संक्रान्ति होने पर पिशाचों को, रात्रि में संक्रान्ति होने पर राक्षसों को तथा अर्ध्दरात्रि के बाद संक्रान्ति होने पर नृत्य करने वालों को कष्ट होता है। प्रातः बेला गाय आदि पशुओं के लिए तथा प्रभातकाल में संक्रान्ति होने पर सन्यासी को कष्ट होता है। मेष संक्रान्ति यदि दिन में हो तो अशुभपफल देने वाली तथा प्रजा में कलह उत्प करने वाली होती है। यदि संक्रान्ति रात्रि में हो तो बहुत ही सुभिक्ष तथा दोनों सन्ध्या में वर्षा का नाश करता है। संक्रान्ति के बाद त्याज्य समय के बारे में कहा गया है।

**’’पूर्व मध्ये परस्ताच्च ग्रहणे दिनसप्तकम् ।**
**शुभे कार्ये त्यजेत् सूर्य-संक्रमे च दिनत्रयम् ।।**
**विषुवायनेषु पर-पूर्व-मध्यमान् दिवसान् त्यजेदितरसंक्रमेषु तु ।**
**घटिकास्तु षोडश शुभक्रियाविधौ परतश्च पूर्वमपि संत्यजेद् बुधः ।।[14]“**

विषुवसंक्रान्ति ;मेष और तुलाद्ध तथा अयनसंक्रान्ति ;कर्क और मकरद्ध के एक दिन पूर्व, संक्रान्ति का दिन एवं संक्रान्ति के अगले दिन कुल तीन दिन त्याज्य कहा गया है, शेष सभी संक्रान्ति में षोडश घटी पूर्व के तथा षोडश घटी बाद के काल को सभी शुभ कार्यो में त्याज्य कहा गया है।

संक्रान्तिजन्य दोष को दूर करने का उपाय बताते हुए कहा गया है कि किसी थाल में तिल भरकर उसके उफपर कुम्कुम से चक्र, त्रिशुल और त्रिकोण बनाकर उसमें सोने का टुकड़ा रखकर उसका पूजन किया जाता है। पूजनोपरान्त ब्रा“मणों को दान देने से संक्रान्तिजन्य दोषों का निवारण होता है।

**’’ तिलोपरि लिखेच्चक्रं त्रिशुलं च त्रिकोणकम् । तत्रहेमं विनिक्षिप्य दद्यात्तद्दोषशान्तये ।।[15]“**

संक्रान्तिकाल में हमारे मनिषियों धर्म दानादि कार्य करने के लिए कहा है। पुराणों में कहा गया है कि दो अयन, दो विषुव और शेष संक्रान्ति में जो प्रस त्मा स्नान, दान और जप करता है वह अक्षय पूण्य को प्राप्त करता है। विषुव संक्रान्ति के बीच में विष्णुपद और दक्षिणायन संक्रान्ति के प्रारंभ में, षडशीति का मुख में और उत्तरायण में अयन काल अतीत होने पर दान करने से बहुत ही अधिक पफल प्राप्त होता है। अयन में करोड़ संख्यक पफल तथा विषुव, षडशीति और विष्णुपदों में दान पुण्य करने से हजारों गुणा पफल कहा गया है।

## सन्दर्भसंकेत-

1.सुर्यसि(ान्त मानाध्याय श्लोक 2
2. सुर्यसि(ान्त मानाध्याय श्लोक 3
3. सि(ान्त शिरोमणि कालमानाध्याय श्लोक 19
4. सुर्यसि(ान्त मध्यमाध्कार श्लोक 13
5. सुर्यसि(ान्त मानाध्याय श्लोक 4,7,8
6. पञ्चसि(ान्तिका तृतीय अध्याय 26
7. मुहूर्तचिन्तामणि संक्रान्तिप्रकरण श्लोक 8
8. नारदसंहिता अध्याय 11 श्लोक 17.18.19.
9. मुहूर्तचिन्तामणि संक्रान्तिप्रकरण श्लोक 1
10. मुहूर्तचिन्तामणि संक्रान्तिप्रकरण श्लोक 10
11. अग्निपुराण अध्याय 121 श्लोक 68.69
12. मयुरचित्रक श्लोक 71,72
13. ज्योतिष सर्वसंग्रह जातकप्रकरण प्रथमभाग
14. समयशु(िविवेक - ग्रहणसंक्रान्तिशु(
15. नारदसंहिता अध्याय 11 श्लोक 25

## सन्दर्भग्रन्थसूची-


| उपनाम नाम | पुस्तक नाम | प्रकाशक | संस्करण | वर्ष |
|---|---|---|---|---|
| शास्त्रि कपिलेश्वर | सुर्यसि(ान्त;तत्त्वामृत भाष्यद्ध | चौखम्भा संस्कृत संस्थान | चतुर्थ | 1987 ई. |
| शर्मा सत्यदेव | सि(ान्त शिरोमणि;सूर्यप्रभा टीकाद्ध | चौखम्भा सुरभारती प्रकाशन | पुनर्मुद्रित | 2011 ई. |
| शर्मा सत्यदेव | पञ्चसि(ान्तिका;दामोदरभाषाभाष्यद्ध | चौखम्भा सुरभारती प्रकाशन | पुनर्मुद्रित | 2011 ई. |
| पाठक रामचन्द्र | मुहूर्तचिन्तामणि;पीयूषधरा टीकाद्ध | चौखम्भा संस्कृत भवन | द्वितीय | 2006 ई. |






Paper Received- **19/01/2018** Paper Published- **22/02/2018**

# गोमेधयज्ञस्य महत्त्वम्

**ब्रजेशकुमारझा:**

शोधच्छात्र:, श्रीला.ब.शा.रा.सं.विद्यापीठ नई दिल्ली-१६

***************************************************************************************

**प्रमुखशब्दा:-** कात्यायन, गोमेध, देवता, यज्ञ।

**शोधसार:-** महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनु:[157] रिति स्मृत्या यज्ञक्षपितकल्मषैरेव पुरुषै: ब्रह्मसाक्षात्कर्तु शक्यते। अत्र यज्ञस्यैव प्राधान्याद् यज्ञार्थमेव वेदानां प्राकट्यं भवति। तद्यथा–

**अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।**
**दुदोह यज्ञसिद्ध्यर्थमृग्यजु: सामलक्षणम्।।**[158]

महर्षिकात्यायनेन यज्ञस्य लक्षणं कुर्वता लिखितं यत्-**द्रव्यं देवता त्याग:**[159] अर्थाद्देवानुद्दिश्य आज्यपशुसोमादिद्रव्याणां त्यागो यत्र भवति तत्र याग: सम्पद्यते। इत्थं यत्र-यत्र देवेभ्य: द्रव्यं दीयते तथा च यत्र-यत्र देवा: द्रव्याणां ग्रहणं कुर्वन्ति तत्र-तत्र यज्ञो भवतीति। तेनेदं फलितं यदग्नौ सोमाज्यपशुपुरोडाशादिद्रव्याणामाहुतिर्दीयते सैव यज्ञ:।

***************************************************************************************

यज्ञ: कतिविधो भवतीति जिज्ञासायां कश्चिदाह– **पञ्चविधा हीमे सर्वे यज्ञा: भवन्ति। अग्निहोत्रम्, दर्शपूर्णमासौ, चातुर्मास्यम्, पशुबन्ध:, सोमश्चेति।**[160] अपर आह यज्ञास्त्रिविधा **इष्टय:, पशव:, सोमा** इति। यत्राज्याहुति: दीयते पशुहिंसा नास्ति तत्रेष्टिशब्द:। यत्र मांसमपि दैवतायै दीयते तत्र पशुशब्द:। यत्र ग्रहयागे सोमरसाहुतिस्तत्र सोमशब्द इति। एके तावदाहु:– **एकविंशतिसंस्थ: सर्वो यज्ञ:– सप्तपाकयज्ञसंस्था:, सप्तहविर्यज्ञसंस्था, सप्तसोमसंस्था इति भेदात्**[161]। तद्यथा–

**सप्तपाकयज्ञसंस्था:–** औपासनहोम:, वैश्वदेवम्, पार्वणम् अष्टका:, मासिकश्राद्धम्, सर्पबलि:, ईशानबलिरिति।

---

157 मनुस्मृतौ-२/२८
158 मनुस्मृतौ १/२३
159 का.श्रौ.सू.- 1/2/2
160 यज्ञमधुसूदने यज्ञविटपाध्याये ५५ तमे पृष्ठे
161 यज्ञमधुसूदने यज्ञविटपाध्याये ५६ तमे पृष्ठे

**सप्तहविर्यज्ञसंस्थाः–** अग्निहोत्रम्, दर्शपूर्णमासौ, आग्रयणादीष्ट्यम्, चातुर्मास्यम्, निरूढपशुबन्धः, सौत्रामणिः, पिण्डपितृयज्ञः।

**सप्तसोमसंस्थाः–** अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, आप्तोर्यामश्च इति।

उक्तासु यज्ञसंस्थासु सप्तहविर्यज्ञसंस्थाः सप्त च सोमयज्ञसंस्था आहत्य चतुर्दशसंस्थाः श्रौतयागान्तर्गताः सन्ति। सप्तपाकयज्ञसंस्थाः स्मार्तयज्ञा उच्यन्ते। हविस्सोमसंस्थासु याश्चतुर्दशसंस्थाः प्रोक्तास्तास्त्रिविधाः होमा इष्टयः सोमाश्च। सर्वेषां होमानां प्रकृतिरग्निहोत्रम्। सर्वासामिष्टीनां प्रकृतिर्दर्शपूर्णमासौ। सर्वेषां सोमयागानां प्रकृतिरग्निष्टोमः।

अग्निष्टोमान्तर्गतः अग्निसोमीयः पशुयागः सर्वेषां पशुयागानां प्रकृतिः किन्तु कात्यायनश्रौतसूत्रे निरूढपशुबन्धः पशुयागानां प्रकृतित्वेन स्वीकृतः। तेन यज्ञाः पुनस्त्रिविधा भवन्ति– **इष्टिपशुसोमाश्चेति**। तत्र पशुयागेषु गोमेधस्य वर्णनमवलोक्यते। वस्तुत अग्निष्टोमस्य विकृतिरूपे अग्निचयनयागे पञ्चपशुयागानाम् उल्लेखो वर्तते। शुक्लयजुर्वेदसंहिताया एकादशाऽध्यायस्य प्रथममन्त्रस्य भाष्यं कुर्वता महीधराचार्येण लिखितं यत्–

**'चयनं कर्तुमिच्छन् फाल्गुनकृष्णप्रतिपदि पौर्णमासेष्टिं कृत्वा पुरुषाश्वगोऽव्यजानालभ्याजेन यागं कृत्वा पञ्चानां शिरांसि घृताक्तानि प्रथमचितावुपधानार्थं क्वचित्संस्थाप्य तेषां कबन्धान्यज्ञशेषं च मृद्युक्ते तडागादिजले प्रास्येत' इति।**[162]

प्रतीयते यदग्निचयनयागे येषां पञ्चपशुनामालभनविषये यद्वचनमुक्तं तेनैव पञ्चपशुमेधयागस्य बीजारोपणं जातम्। अतो वैदिकवाङ्मये पुरुषमेध-अश्वमेध-गोमेध-अविमेध-अजमेधाख्याः पञ्चपशुयागाः वर्णिता उपलभ्यन्ते।

यद्यपि शुक्लयजुर्वेदसंहितायाम् अश्वमेध-पुरुषमेधयोः स्वतन्त्ररूपेण वर्णनमुपलभ्यते। शिष्टानां गोमेध-अविमेध-अजमेधानां वर्णनं तथाविधं नाऽस्ति परमन्यासु शाखासु चोक्तानां पञ्चमेधयागानां वर्णनमवलोक्यते। विशेषरूपेण ऐतरेयब्राह्मणे, शतपथब्राह्मणे च पुरुष-अश्व-गो-अवि-अजाख्यानां पञ्चविधानां पशूनां निर्देश उपलभ्यते। तत्रैते पञ्चपशवो मेध्या उक्ताः।

अत्रेदं विचारणीयं यत्किमेते पशवो लौकिका उताधिदैविकतत्त्वानां प्रतीकभूताः सन्तीति। विषयेऽस्मिन् गोमेधशब्दस्य महर्षिगार्ग्यायणकृते प्रणववादग्रन्थे योऽर्थः प्रतिपादितः सोऽत्र प्रस्तूयते। तद्यथा–

[162] शु.सं.-११,०१ व्याख्यायाम्





**१.गोमेधस्तावच्छब्दमेध इत्यवगम्यते गां वाणीं मेधया संयोजनमिति तदर्थात्। शब्दशास्त्रज्ञानमात्रस्य सर्वेभ्यः प्रदानमेव गोमेधो यज्ञः।**[163]

एवमेव गोशब्दस्य अनेकानि निर्वचनानि परमवैज्ञानिकेन यास्केन स्वकीये निरुक्तग्रन्थे प्रस्तुतानि यथा– **गौरिति पृथिव्यानामधेयम्**[164], **ज्यापि गौरुच्यते**[165], **आदित्योऽपि गौरुच्यते**[166], **सर्वेऽपि रश्मयो गाव उच्यन्ते**[167] इत्यादीनि।

अत्रेदं पुनः विचार्यते यत् पशुयज्ञेषु अश्वमेधः पुरुषमेधः गोमेधः अविमेधः अजमेधश्च प्रमुखाः सन्ति। एषामन्ते **मेधृधातोः निष्पन्नो मेधशब्दः श्रूयते।**

**मेधृधातोरपि** द्वावर्थौ– हिंसनं, संगमनं च तदुक्तम्– **मिदृ मेदृ हिंसायाम्, मेधृ संगमे च** (पा.धातु.१,६०९,६११) पुरुषमेधादिषु मेधशब्दस्यार्थः संगमनमेव, न हिंसनम्। यत एषां पुरुषादीनां वेदे हिंसायाः साक्षात् प्रतिषेधो वर्तते। यथा–

**यदि नो गां हंसि यद्यश्वं यदि वा पूरुषम्।**
**तं त्वा सीसेन विध्यामो यथा नोऽसो अवीरहा।।**[168]

शुक्लयजुषस्त्र्योदशाध्यायेऽपि पुरुष-अश्व-गो-अविरूपाणां पशूनां हिंसा प्रतिषिद्धा। अत्र इदमपि ध्येयम्–यजुषोऽयमध्यायो याज्ञिकानां मतेग्निचयने विनियुक्तः। तथाहि–

**इमं मा हिंसीर्द्विपादं पशुं सहस्राक्षो मेधाय चीयमानः।**[169]
**अश्वं जज्ञानं सरिरस्य मध्ये। शिशुन्नदीनां हरिमद्रिबुध्नमग्ने माहिंसीः परमे व्योमन्।**[170]
**इमं मा हिंसीरेकशफं पशुङ्कनिक्रदं वाजिनं वाजिनेषु।**[171]
**गां मा हिंसीरदितिं विराजम्।**[172]

[163] महर्षि गार्ग्यायण कृते प्रणववादे, ब्रह्मवादिन् प्रेस मद्रास सन् १९१५ प्रकरणम्।
[164] निरुक्ते 2/2/1
[165] निरुक्ते 2/2/5
[166] निरुक्ते 2/2/6
[167] निरुक्ते 2/2/6-7
[168] अथर्ववेद १/१६/४
[169] शु.सं.-१३/४७
[170] शु.सं.-१३/४२
[171] शु.सं.-१३/४८
[172] शु.सं.-१३/४३

**इमं साहस्रं शतधारमृत्सं व्यच्यमानं सरिरस्य मध्ये। घृतं दुहानामदितिं जनायाग्ने मा हिंसीः परमे व्योमन्।**[173]

**अविं जज्ञानां रजसः परस्मात्। महीं साहस्रीमसुरस्य मायामग्ने मा हिंसीः परमे व्योमन्।**[174]

**इममूर्णायुं वरुणस्य नाभिन्त्वचं पशूनां द्विपदाञ्चतुष्पदाम्।**
**त्वष्टुः प्रजानां प्रथमञ्जनित्रमग्ने मा हिंसीः परमे व्योमन्।।**[175]

एतैर्वेदमन्त्रप्रमाणैरिदं सुव्यक्तं भवति यद् वेदेषु पुरुषादीनां पशूनां हिंसा सर्वथा वर्जिताऽस्ति।

यथा याज्ञिकग्रन्थेषु साक्षात्पुरुषाश्वमेधयोर्निर्देश उपलभ्यते, न तथा गोमेधसंज्ञकस्य कस्यचित् कर्मणः सम्पूर्णेऽपि याज्ञिकवाङ्मये साक्षान्निर्देशो विद्यते। एकं गवामयननामकं संवत्सरसाध्यं सत्रं विधीयते। अस्मिन् गोपशोरालभनस्य विधानं नास्ति। ऐतरेयब्राह्मणे (४/१७) गवामयनसत्रस्य विधानं वर्तते। तस्यालम्भन विषय एवमुक्तम्-

**''गवामयनेन यन्ति। गावो वा आदित्याः। आदित्यानामेव तदयनेन यन्ति। गावो वै सत्रमासत**[176]**।''**

अस्मिन् निर्दिष्टा गाव आदित्याः। यद्यपि आदित्य एक एव, तथापि कालभेदेन च स द्वादशधा भिन्नः। अयनं नाम तस्या गतेर्वाचकं यतः सा प्रारभते तत्रैव चावृत्य परिसमाप्तिमेति। आदित्यानां गतिरेव गवामयनम्। आदित्यस्य दक्षिणायनोत्तरायणे गती प्रसिद्धे स्तः। महाभाष्योद्धृते पाठे 'अनड्वाही' शब्दस्य निर्देशो दृश्यते। अनड्वान् शकटवाहको बलीवर्दः। स्त्रीलिङ्गेन अनड्वाहीशब्देन सा **'गौरुच्यते'** यस्या अनसि योजनं धर्मशास्त्रे प्रतिषिद्धम्, परन्तु तदपवादरूपेण बन्ध्याया गोरनसि योजनमुक्तम्। अतोऽनड्वाहीशब्दस्यापि बन्ध्या गौरेवार्थः वशाया गोर्विषये। तद्यथा–

**अश्वालम्भं गवालम्भं संन्यासं पलपैत्रकम्।**
**देवराच्च सुतोत्पत्तिं कलौ पञ्च विवर्जयेत्।।**[177]

एतद्वचनानुसारेण कलियुगे गवाश्वयोरालम्भनं प्रतिषिद्धम्। अश्वमेधस्य कलियुगे प्रतिषेधे सत्यपि पुष्यकमित्रादिभिरनेकै राजभिरश्वमेधानुष्ठानं कृतमितीतिहासे प्रसिद्धम्। श्रौत्रसूत्रादिषु यत्र

[173] शु.सं.-१३/४९

[174] शु.सं.-१३/४४

[175] शु.सं.-१३/५०

[176] ऐतरेयब्राह्मणे ४/१७

[177] श्रौतयज्ञमीमांसा पृष्ठे 83





क्वचिदपि गवालम्भनं विहितं तत्र प्रायेण सर्वत्रैव गोः स्थाने **आमिक्षया पयस्यया घृतेन**[178] वा तत्कर्मसमापनमुक्तम्।

विदितमेवास्ति यच्छ्रौतयज्ञाः साम्प्रतिके युगे अप्रचलितप्रायाः सन्ति। अस्ति क्वचिदेव कश्चिद्यजमानः श्रौतानुष्ठानसमर्थ इति श्रूयते। किन्तु प्राचीनकाले श्रौतयागस्य पर्याप्तं प्रचलनमासीत्। श्रौतयागानुष्ठानेन सर्वविधकल्याणं सम्भवति। जानन्त्येव भवन्तस्सर्वे यदस्मिन् विकरालभालकलिकाले सर्वेऽपि जीवाः स्वं जीवनं रक्षितुमसमर्थाः सन्ति। न क्वापि शान्तिरवलोक्यते। यत्र-तत्र सर्वत्र प्रदूषणमयं वातावरणं कलहात्मकञ्च जीवनमवलोक्य भृशं दुःखं जनयति चेतसि।

एतत्सर्वं समाधातुं श्रौतविद्याया अनुसरणं अवश्यमेवास्माभिः कर्त्तव्यम्। नैतद्विनाऽस्माकं कल्याणं सम्भवम्। अतो जगत्कल्याणदृष्ट्या सर्वविधशान्तिप्रतिष्ठापनाय च श्रुत्युक्तविधेरवगमनमावश्यकम्। प्रसङ्गेऽस्मिन् श्रौतयागानां महत्त्वं विधिविधानञ्च सार्वजनीनं स्यादेतदर्थं मया (**गोमेधयज्ञस्य महत्त्वम्**) एषः निबन्धः लिखित इति शम्।

**सन्दर्भग्रन्थसूची-**

1.**अथर्ववेदसंहिता** डॉ.धर्मेन्द्रकुमारः दिल्ली संस्कृत अकादमी 2013
3.)**ग्वेदः** पं.रामगोविन्दत्रिवेदी चौखम्बाविद्याभवनम् वाराणसी 1991
4.**ऐतरेयब्राह्मणम्** सायणः नागप्रकाशकः 11यू.ए.बंगलो रोड,जवाहर नगर,दिल्ली 1991
5.**निरुक्तम्** यास्काचार्यः मेहरचन्दलक्ष्मणदास पब्लिकेशन नवदेहली, 1999
6.**पशु यज्ञ मीमांसा**, डॉ. कृष्णा आचार्य, संजय प्रकाशन, दिल्ली
7.**मनुस्मृति** डॉ.राजेन्द्रनाथ शर्मा परिमल पब्लिकेशन शक्तिनगर दिल्ली 1992
8.**यज्ञमधुसूदन**, डॉ. विनोद शास्त्री, राजस्थान संस्कृत अकादमी, जयपुर
9.**शतपथब्राह्मणम्** पण्डितश्रीचन्द्रशर्मा, अच्युतग्रन्थमाला कार्यालयः, वाराणसी 1994
10.**शुक्लयजुर्वेदसंहिता** पं.जगदीशलालशास्त्री,मोतीलाल बनारसीदास, देहली 1987
11.**श्रीमद्भगवद्गीता** जयलालगोयन्दका, गीताप्रेस, गोरखपुर वि.सं. 1997
12.**श्रौतयज्ञमींमासा**, युधिष्ठिर मीमांसकः, श्रीमती सावित्रीदेवी बागड़िया ट्रष्ट, जी ब्लॉक, न्यू अलीपुर, कलकत्ता,

[178] मैत्रवरुणीमामिक्षामनूबन्ध्यायाः स्थाने बह्वृचाः समामनन्ति। आप.श्रौ. १३,२५,१० उभयाभावे पयस्या। कात्या. श्रौ.
१०,९,१६ अत्र विद्याधरटीका द्रष्टव्या।

Paper Received- **31/01/2018** Paper Published- **22/02/2018**

# वृत्ति-रीति-प्रवृत्तीनां स्वरूपं तद्गतभेदश्च ।

**रमेशचन्द्रनैलवालः**
शोधच्छात्रः, जवाहरलालनेहरूविश्वविद्यालय, नई दिल्ली

**********************************************************************************************

**प्रमुखशब्दाः-** वृत्तिः, रीतिः, प्रवृत्तिः, सात्त्वती, कैशिकी, भारती, आरभटी, पाञ्चाली, आवन्ती दाक्षिणात्या औड्रमागधी पाञ्चालमध्यमा, वैदर्भी, गौडी ।

**शोधसारः-**वृत्ति-रीति-प्रवृत्ति-अलङ्कार-गुणादयः धर्माः प्रायः लोके येष्वर्थेषु प्रसिद्धाः तेष्वर्थेषु एव काव्ये स्वीकृताः। यथा वृत्तिशब्दः लोके व्यवहार-व्यापारादिक्षेत्रे क्रियते, तथैव रूपकादिकाव्येषु प्रायः नायकस्य वाग्मनःकायजाः व्यापाराः वृत्तिशब्देनाभिधीयते। एवमेव प्रकारेण प्रवृत्तिशब्दः लोके व्यवहारशब्दे एव तथापि हृदयस्थविशेषव्यवहाराय क्रियते।

काव्ये तु प्रवृत्तिशब्दः वेशादिस्वरूपविषये वर्तते। एवं रीतिशब्दः लोके जीवननिर्वाहरीतिविषये, परम्परासभ्यतादिविषये च प्रसिद्धः। परं काव्ये वर्णानां विशेषसङ्घटनाविषये रीतिशब्दः प्रयुक्तः वर्तते। रीतिर्नाम **"रीणन्ति गच्छन्त्यस्यां गुणा इति, रीयते क्षरत्यस्यां वाङ्मधुधारेति वा रीतिः। अधिकरणार्थे क्तिन् प्रत्ययः।**[179] यद्यपि वामनमते रीतिरेवात्मा परं काव्यं तदा एव ग्राह्यं भवति यदा अलङ्कारयुक्तं भवति, एवं प्रथमसूत्रे एव तेन प्रदर्शितम्। वृत्तिशब्दः 'वृ' धातुना 'क्तिन्' प्रत्यये कृते निष्पद्यते। साहित्येशास्त्रे एव वर्णानां विन्यासः वर्णसङ्घटना वा वृत्तिः। भामहेन ग्राम्या-उपनागरिके नाम्नी द्वे वृत्ती स्वीकृते। उद्भटेन तृतीयवृत्तितया परुषावृत्त्याः गणना कृता। एतेषां सङ्केतः ध्वन्यालोककारेणापि अभाववादिनां निर्वचनावसरे कृतः। प्रवृत्तिः पात्राणां वेशभूषया भाषया व्यवहारेण च सम्बद्धा भवति। नाट्यशास्त्रानुसारेण पृथिव्यां विभिन्नप्रदेशेषु प्रचलिताः नानावेशभूषा-भाषा-आचारविचार-वार्ता-इत्यादीनां ख्यापनकारिका वृत्तिरेव प्रवृत्तिः।

यद्यपि संस्कृतकाव्यशास्त्रीय परम्परायां रीतिवृत्तिप्रवृत्तीनामुल्लेखः सर्वाचार्यैः न कृतम्। तथापि दृश्यते चेत्, प्रायः वृत्तीनां प्रवृत्तीनाञ्च प्रयोगः नाट्ये एव उचितम्, श्रव्यकाव्ये यद्यपि प्रयोगः क्रियते चेत्, तदा तादृशः वैशिष्ट्यं न भविष्यति यथा नाट्ये। एतदर्थमेव मम्मटेन अनुप्रासस्य भेदेषु एव वृत्तीनां चर्चा कृता। तत्सर्वं शब्दाधारितम्। अतः प्रायः वृत्तिरीतिमध्ये काव्यदृशा भेदः सत्यं, वृत्ते चर्चा नाट्ये उचिता, रीतेश्च श्रव्यकाव्ये। तथैव प्रवृत्तेरपि नाट्ये एव वर्णनमुचितम्। एवं काव्याधारितमेव एतेषां प्रयोगः उचितः।

**********************************************************************************************

भारतीयसाहित्यपरम्परायां यत्किमपि वर्तते, तत्सर्वं लोकाधारमेव। साहित्ये समाजस्य प्रतिबिम्बं सन्निहितं भवति। तत्र लोकस्य साक्षात्दर्शनं प्रत्यक्षीक्रियते। वास्तविकरूपेण यदि दृश्यते चेत् एतत्प्रतिबिम्बं भेदेन भासितयोग्यम्, अशक्तम्, अन्यसाहाय्येन च भासितं भवति। उक्तं अभिनवगुप्तेन – यत् भेदेन भासितम्, अशक्तम्, अन्यव्यामिश्रत्वेनैव भाति तत् प्रतिबिम्बम्।[180] अतः तत्साहित्यमपि प्रतिबिम्बमिव भवति। एवं

---

[179] तत्रैव, 1/6/2

[180] तन्त्रसार पृ० ४८



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani 0976-8645

ये तत्र काव्यधर्माणि, उत्कर्षकारणानि एवं या आत्मा-शरीरादिकल्पना दृश्यते, तत्सर्वं लोकनिष्ठमेव। वृत्ति-रीति-प्रवृत्ति-अलङ्कार-गुणादयः धर्माः प्रायः लोके येष्वर्थेषु प्रसिद्धाः तेष्वर्थेषु एव काव्ये स्वीकृताः। यथा वृत्तिशब्दः लोके व्यवहार-व्यापारादिक्षेत्रे क्रियते, तथैव रूपकादिकाव्येषु प्रायः नायकस्य वाग्मनःकायजाः व्यापाराः वृत्तिशब्देनाभिधीयते। एवमेव प्रकारेण प्रवृत्तिशब्दः लोके व्यवहारशब्दे एव तथापि हृदयस्थविशेषव्यवहाराय क्रियते।

काव्ये तु प्रवृत्तिशब्दः वेशादिस्वरूपविषये वर्तते। एवं रीतिशब्दः लोके जीवननिर्वाहरीतिविषये, परम्परासभ्यतादिविषये च प्रसिद्धः। परं काव्ये वर्णानां विशेषसङ्घटनाविषये रीतिशब्दः प्रयुक्तः वर्तते। वृत्तिशब्दः 'वृ' धातुना 'क्तिन्' प्रत्यये कृते निष्पद्यते। यस्य कोशार्थाः अस्तित्वपरिस्थितिदशा क्रियापद्धतिव्यवहारावरणकार्यसम्मानपूर्णव्यवहारादयाः सन्ति। शास्त्रपरम्परायां सूत्रेषु कारिकासु या व्याख्या लिख्यते, सा वृत्तिशब्देन कथ्यते। साहित्यशास्त्रे शब्देभ्यः अर्थबोधप्रक्रिया वृत्तिः कथ्यते, अभिधा-लक्षणा-व्यञ्जना-तात्पर्यादयः शब्दवृत्तयः। साहित्येशास्त्रे एव वर्णानां विन्यासः वर्णसङ्घटना वा वृत्तिः। भामहेन ग्राम्या-उपनागरिके नाम्नी द्वे वृत्ती स्वीकृते। उद्भटेन तृतीयवृत्तितया परुषावृत्त्याः गणना कृता। एतेषां सङ्केतः ध्वन्यालोककारेणापि अभाववादिनां निर्वचनावसरे कृतः।[181]

रुद्रटेन अनुप्रासस्य मधुरा-प्रौढा-परुषा-ललिता-भद्रादयः पञ्च वृत्तयः उल्लिखिताः, यासां गणना अनुप्रासालङ्कारस्य भेदानुसारं कृता। प्राचीनभाषाशास्त्रे शाब्दबोधजन्यपदपदार्थसम्बन्धः वृत्तिः इति उक्तः। न्यायदर्शने आचार्यविश्वनाथेन अभिधया लक्षणया वा शब्दार्थयोः सम्बन्धज्ञानं वृत्तिः इत्युक्तम्।[182] वृत्तिः तात्पर्यनिर्वाहिका भवति, तात्पर्यं त्रिविधं औत्सर्गिकम्, आपवादिकम्, नियतञ्च। औत्सर्गिकेन अभिधायाः, अपवादिकेन लक्षणायाः, नियतेन रूढालक्षणाया व्यापारः क्रियते।[183]

व्याकरणमते वृत्त्या संस्कार उत्पद्यते, संस्कारकल्पिका शाब्दबुद्धिः शब्दधर्म वा वृत्तिः। 'परार्थाभिधानं वृत्तिः' इति वैयाकरणैः। कृत्तद्धितसमासैकशेषधातवः पञ्चवृत्तयः। साङ्ख्यदर्शने महत्तत्त्वस्य इन्द्रियैः सह व्यापारः वृत्तिशब्देनोच्यते। महाभारते जाग्रत्स्वप्नसुषुप्त्यः त्रयः बुद्धेः वृत्तयः, अस्य अनुभवकर्ता पुरुषः अस्याध्यक्षः कथ्यते।[184] योगदर्शने द्विधा वृत्तिः- क्लिष्टाक्लिष्टभेदेन।[185] वेदान्तदर्शने अन्तःकरणस्य परिणामः वृत्तिः, यथा तडागादीनां जलं लघुनद्यादिमाध्यमेन क्षेत्रेषु गच्छति, तथाकारिता च भवति, तथैव अन्तःकरणमपि नेत्रादीन्द्रियादिमाध्यमेन घटादिविषयं प्रति गत्वा तदाकारिताभूय तेषु आकारेषु एव परिणितः भवति, एषा परिणति एव वृत्तिः।

---

[181] तदनतिरिक्तवृत्तयः वृत्तयोऽपि या कैश्चिदुपनागरिकाद्याः प्रकाशिताः, ता अपि गता श्रवणगोचरम्। ध्वन्यालोक पृ १७

[182]182 वृत्तिश्च शक्तिलक्षणान्यतरः सम्बन्धः। न्यायसिद्धान्तमुक्तावली, शब्दखण्ड- पृ० ८०

[183] नाट्यशास्त्रविश्वकोश खण्ड-४, पृ

[184] श्रीमद्भागवत ७/७/२५

[185] वृत्तयः पञ्चतय्य क्लिष्टाक्लिष्टाः। योगसूत्र १/६/७

नाट्यप्रयोगे वृत्तीनां विशेषमहत्त्वम्, आनन्दवर्धनेन व्यवहारः वृत्तिः इति [186], तथा कीदृशः व्यवहारः? अर्थशब्दयोः रसानुगुणव्यवहारः। [187] नायकस्य व्यापारविशेषः वृत्तिशब्देन विश्वनाथेन उक्तम्। [188] भोजदेवेन चेष्टाविन्यासक्रमः वृत्ति इति उक्तम्। [189] अभिनवगुप्तमते वृत्तिः शरीरवाग्मनसां चेष्टारुपा एव, या पुरुषस्य पुरुषार्थसाधने उपयोगी भवति।[190]

**"वृत्तिर्नाम वाङ्मनःकायजा चेष्टा पुमर्थोपयोगिनीति सामान्यलक्षणम्"।**

यस्य सम्बन्धः नायकेन सह वर्तते। अत एव दशरूपकस्य 'अवलोक'वृत्तिकारेण वृत्तेः लक्षणम्- प्रवृत्तिरूपनायकस्य व्यापारस्य स्वभावमेव वृत्तिः इति स्वीकृतम्- **"प्रवृत्तिरूपो नेतृव्यापारस्वभावरूपो वृत्तिः"।**[191] भरतेन वृतये नाट्यस्य मातरः इति प्रतिपादितम्। [192] भरतेन वृत्योत्पत्तिविषये न केवलं पौराणिककल्पना स्वीकृतापितु वैदिकाधारेण अपि तस्या विवेचनं कृतम्।[193]

वृत्तीनामुत्पत्तिविषये एका अन्या परम्पराऽपि श्रूयते। तदनुसारेण वाग्व्यापारप्रधानं, पुरुषप्रयोज्यं, स्त्रीवर्जितं, संस्कृतपाठ्युक्तभरतनाम्ना भारतीवृत्तिः प्रचलिता इति। [194] नाट्यशास्त्रानुसारेण्ण भरतेन त्रिसृणां वृत्तीनां प्रयोगस्तु स्वयं कृतम्, परं कैशिकीवृत्तेः प्रयोगः शिवनृत्याधारेण कृतम्। भावप्रकाशने शारदातनयेन शिवपार्वत्योः नृत्यावसरे ब्रह्मणः मुखेनैव चतुर्वृत्तीनामुत्पत्तिः स्वीकृता। [195] अग्नेपुराणस्य एकस्यां टीकायां भरतराज्ञा प्रकाशिता वृत्तिः भारती, सात्त्वतनाम्ना प्रकाशिता सात्त्वती, आरभटनाम्ना प्रकाशिता आरभटी, तथा कुशिकराज्ञा प्रकाशिता वृत्तिः कौशिकीवृत्तिः वर्तते। अतः चतस्रः वृत्तयः रसभावानां अनुभाविकाः वर्तन्ते।[196]

---

[186] व्यवहारो हि वृत्तिरित्युच्यते। ध्वन्यालोक ३/३३ वृत्ति- पृ० ४४३

[187] रसाद्यनुगुणत्वेन व्यवहारोऽर्थशब्दयोः। औचित्यवान्यस्ता एता वृत्तयो द्विविधः स्थिताः॥ ध्वन्यालोक ३/३३

[188] ..........। नायकादिव्यापारविशेषा नाटकादिषु॥ साहित्यदर्पण ६/१२३

[189] नाट्यशास्त्र का इतिहास, पृ० ३३३ (पारसनाथ द्विवेदी)

[190] नाट्यशास्त्रम्, पृ० १७६ (ब्रजमोहनद्विवेदी)

[191] नाट्यशास्त्रम्, पृ० १७६ (ब्रजमोहनद्विवेदी)

[192] वृत्तयो नाट्यमातरः। नाट्यशास्त्र का इतिहास, पृ० ३३३ (पारसनाथ द्विवेदी)

[193] ऋग्वेदात्भारती वृत्तिर्यजर्वेदाञ्च सात्त्वती। कैशिकी सामवेदाच्च शेषा चाथर्वणादपि॥ नाट्यशास्त्र २०/२५

[194] या वाक्प्रधाना पुरुषप्रयोज्या स्त्रीवर्जिता संस्कृतपाठयुक्ता। स्वनामधेयैर्भरतैः प्रयुक्ता सा भारती नाम भवेत्तु वृत्तिः॥ नाट्यशास्त्र २०/२६

[195] भावप्रकाशन, (नाट्यशास्त्र का इतिहास, पृ० ३३४ (पारसनाथ द्विवेदी))।

[196] (नाट्यशास्त्र का इतिहास, पृ० ३३४ (पारसनाथ द्विवेदी))।





नाट्यशास्त्रे नाट्यसङ्ग्रहस्य एकादशतत्त्वेषु एतेषां परिणमनं भवति। वृत्तिविषये उक्तम्- "भारती सात्त्वती चैव कैशिक्यारभटी तथा। चतस्रो वृत्तयो ह्येता यासु नाट्यं प्रतिष्ठितम्"॥[197] भरतेन वृत्ते पृथगर्थं न कृतम्, नाट्यस्याधारभूतं तत्त्वमेव वृत्तिः। आचार्यमते वृत्तयः नाट्यस्य निष्पादिका वर्तन्ते। पृथक्-पृथग्प्रकाराणां वृत्तीनां प्रयोगेन पृथग्पृथग्रूपकाणि निष्पन्दन्ते। रूपकप्रकारेषु वृत्तीनां सम्बन्धः उक्तम्- नाटकं प्रकरणञ्च सर्वाभिर्वृत्तिभिः निष्पन्देते। वीथी-समवकार-ईहामृग-उत्सृष्टिकाङ्क-व्यायोग-भाण-प्रहसन-डिमादयेषु कैशिकीवृत्तिः न भवति।

नाट्याशास्त्रानुसारेण भारतीवृत्तिः शब्दाश्रिता वर्तते, अन्या तिस्रः अर्थाश्रिता च। अभिनवगुप्तेन भारतीवृत्तिं 'पाठ्यप्रधाना' वाग्वृत्तिः इति उक्तम्। नाट्यदर्पणकारेण भारतीरूपवशात् भारती इति नाम स्वीकृतम्।[198] शिङ्गभूपालेन भरतस्य वृत्तिवशाद् अस्य नाम भारती इति स्वीकृतम्।[199] अतः भारतीवृत्ति वाग्वृत्तिः वर्तते, या सर्वेषु रसेषु प्रयोज्या वर्तते। भरतानुसारेण केवलं करुणाद्भुतरसयोः एव अस्य प्रयोगः करणीयः। परं एतन्न युक्तिसङ्गतम्।[200] भारतीवृत्तेः चतुरङ्गानि सन्ति- प्ररोचनामुखवीथीप्रहसनाः।[201]

प्ररोचनामुखे नाटकस्य प्रस्तावनासम्बद्धे, वीथीप्रहसने च रूपकप्रकारे। परं वीथेः अङ्गानां प्रयोगः रूपकस्य कस्यापि भागविशेषे प्रथमसन्धौ वा क्रियते। विश्वनाथेन संस्कृतवाग्व्यापारप्रधाना नराश्रिता च वृत्तिः भारती कथिता।[202]

प्ररोचना – पूर्वरङ्गे नाटकादयस्य प्रशंसां कृत्वा सामाजिकान् नाटकावलोकनं प्रति उन्मुखीकरणमेव प्ररोचना। विश्वनाथेनापि श्रोतृन् प्रस्तुतप्रकरणे उन्मुखीकरणमेव प्ररोचना इति कथितम्।[203]

---

[197] नाट्यशास्त्र ६/२४-२५

[198] भारतीरूपत्वात् व्यापारस्य भारतीति। नाट्यदर्पण, (नाट्यशास्त्र का इतिहास, पृ० ३३३ (पारसनाथ द्विवेदी))।

[199] प्रयुक्तत्वेन भरतैः भारतीति निगद्यते। रसार्णवसुधाकर १/२६१

[200] भारती चापि विज्ञेया करुणाद्भुतसंश्रया॥ नाट्यशास्त्र, निर्णयसागर २०/६३

[201] तस्याः प्ररोचना वीथी तथा प्रहसनामुखे। साहित्यदर्पण ६/३०

[202] भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः॥ साहित्यदर्पण ६/२९

[203] अङ्गान्यत्रोन्मुखीकारः प्रशंसार् प्ररोचना॥ साहित्यदर्पण ६/३०

आमुखम् – यत्र सूत्रधारः नटीविदूषकपारिपार्श्विकैः सह प्रस्तुतकार्यस्याक्षेपं कुर्वन् चित्रविचित्राद्युयुक्तिमाध्यमेन वार्तालापं करोति स आमुखः, अस्य अपर नाम प्रस्तावना वर्तते। [204] साहित्यदर्पणकारेण प्रस्तावनायाः पञ्चभेदाः स्वीकृताः।[205]

वीथी – वीथेः त्रयोदशानि अङ्गानि सन्ति। उद्घात्यकः अवगलितः, प्रपञ्चः, त्रिगतः, छलः, वाक्केलिः, अधिबलः,गण्डः, अवस्यन्दितः, नालिका, असत्प्रलापः, व्याहारः, मृदवश्च।[206]

प्रहसनम्- प्रहसनन्तु नाट्यभेदः वर्तते।

**सात्त्वतीवृत्तिः -** सात्त्वतीवृत्तिः सत्त्वप्रधानमानसव्यापारः। अस्यां वाचिकाङ्गिकाभ्यां सह सत्त्वस्य मनोव्यापारस्य वा अधिकता भवति। भरतानुसारेणास्यां सत्त्वस्य प्रधानता भवति। अस्यां शौर्यत्यागदयादानार्जवादिगुणैः सह सत्त्वस्य प्राधान्यं भवति। हर्षस्य प्रकाशनम्, शोकस्य संवरणम्, अद्भुतरस्य च प्राधान्यं भवति। यथोक्तम्-

**या सत्त्वेनेह गुणेन युक्ता न्यायेन वृत्तेन समन्विता च।**
**हर्षोत्कटा संहृतशोकभावा सा सात्त्वती नाम भवेत्तु वृत्तिः॥**

भरतेन वीराद्भुतरौद्ररसेभ्यः सात्त्वतीवृत्तिः स्वीकृता। अस्यां पुरुषपात्रसङ्ख्या अधिका भवति। विश्वनाथेनापि सात्त्वतेः शौर्यसत्वञ्च कथितम्।[207]

एतस्य चत्वारि अङ्गानि स्वीकृतानि- उत्थापकः, सांघात्यः, संलापः, परिवर्त्तकश्च।[208] उत्थापकः शत्रवे उत्तेजनप्रकारवाणी उत्थापकः कथ्यते।[209] मन्त्रशक्त्या अर्थशक्त्या दैवशक्त्या च शत्रोः सङ्घभेदनं सांघात्यः कथ्यते।[210] विविधभावाश्रितगम्भीरा उक्तिः संलापः कथ्यते।[211] प्रारब्धकार्यान् त्यक्त्वा अन्यकार्यसम्पादनं परिवर्त्तकः।[212]

---

204 नटी विदूषको वापि पारिपार्श्विक एव वा। सूत्रधारेण सहिताः संलापं यत्र कुर्वते।

चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः। आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा। साहित्यदर्पण ६/३२-३३

205 उद्घात्यकः कथोद्घातः प्रयोगातिशयस्तथा। प्रवर्तकावलगिते पञ्चप्रस्तावनाभिधा॥ साहित्यदर्पण ६/३४

206 दशरूपक ३/१२-१३

207 सात्त्वती बहुला सत्त्वशौर्यत्यागदयार्जवैः। सहर्षा क्षुद्रशृङ्गारा विशोका साद्भुता तथा। साहित्यदर्पण ६/१२९

208 उत्थापकोऽथ सांघात्यः संलापः परिवर्तकः। विशेषा इति चत्वारः सात्वत्याः परिकीर्तिता। साहित्यदर्पण ६/१३०

209 उत्तेजनकरी वागुत्थापक उच्यते॥ साहित्यदर्पण ६/१३०

210 मन्त्रार्थदैवधक्त्यादेः सांघात्यः संघभेदनम्॥ साहित्यदर्पण ६/१३१

211 संलाप स्याद्गभीरोक्तिर्नानाभावसमाश्रया॥ साहित्यदर्पण ६/१३१

212 प्रारब्धादन्यकार्याणां करणं परिवर्तकः॥ साहित्यदर्पण ६/१३२



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor]
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani ISSN 0976-8645

**आरभटीवृत्तिः –**

'आर' इत्यस्यार्थः चाबुक अङ्कुश वा। अङ्कुशवत् उद्धता भटाः पुरुषाः आरभटाः, एतेषां वर्णनं यत्र भवति, सा वृत्तिः 'आरभटी' कथ्यते। नाट्यदर्पणकारेणोक्तम्- **"आरेण प्रतोदकेन अङ्कुशेन वा तुल्या भटा उद्धताः पुरुषा आरभटास्ते सन्त्यस्यामिति आरभटी।**[213] भरतानुसारेण आरभटगुणैः (क्रोधावेगादिभिः) युक्ता वृत्तिरेव आरभटी कथ्यते।[214] साहित्यदर्पणाकारेण माया-इन्द्रजाल-सङ्ग्राम-क्रोधादिभिः संयुक्ताः वृत्तिः आरभटी कथिता।[215]

आरभटीवृत्त्यां नानाप्रकारकाः इन्द्रजालमायायुद्धकपटदम्भानृतवञ्चनाछलवधक्रोधादयः बाहुल्येन प्राप्यन्ते। अस्याः वृत्तेः पात्राणि उद्धतानि भवन्ति। एषा वृत्तिः आङ्गिकवाचिकसात्त्विकाहार्याभिनयेषु सम्पन्ना भवति। एषा रौद्रवीभत्सभयानकादिरसेषु अनुकूला भवति। अस्याः चत्वारि अङ्गानि कथितानि- वस्तूत्थापनम्, संफेटः, सक्षिप्तिः, अवपातनम्।[216] वस्तूत्थापनं मायेन्द्रजालादिमाध्यमेन नवीनवस्तोः प्रकाशनं वस्तूत्थापनं वर्तते।[217] क्रोधावेगाभ्यां पक्षविपक्षयोः परस्परप्रहारः द्वन्द्वयुद्धश्च सम्फेटः।[218] संक्षिप्तिस्तु कुशलशिल्पकारैः अन्येन प्रकारेण वा वस्तुनः सङ्क्षिप्तीकरणं वर्तते।[219] हर्षक्रोधभयविद्रवविनिपातसम्भ्रमादिकारणात् प्रवेशनिष्क्रमणात् अवपातः कथ्यते।[220]

**कैशिकीवृत्तिः –**

कैशिकीवृत्तेः सम्बन्धकेशैः सह वर्तते। भरतानुसारेण विष्णोः लीलायुक्तविचित्राहङ्कारेण स्वकेशाः बद्धाः, तदा कैशिक्याः उदयोऽभवत्।[221]

नाट्यदर्पणानुसारेण अत्यन्तदीर्घकेशवशाद् स्त्रीणां नाम केशिका कथ्यते। तेषां प्राधान्यादेषा वृत्तिः कैशिकी काथिता- **"अतिशायितः केशाः सन्त्यासामिति केशिकाः स्त्रियः, स्तनकेशवतीत्वं हि स्त्रीणां लक्षणम्, तत्प्रधानत्वात् तासामियं कैशिकी"**। व्युत्पत्त्यानुसारेण विशेषप्रकारकाणां वेशादिरचनावशाद्

---

213 नाट्यदर्पण, (नाट्यशास्त्र का इतिहास, पृ० ३३७ (पारसनाथ द्विवेदी))।

214 नाट्यशास्त्र, २०/६४-६६

215 मायेन्द्रजालसङ्ग्रामक्रोधोद्भ्रान्तादिचेष्टितैः। संयुक्ता वधबन्धाद्यैरुद्धतारभटी मता। साहित्यदर्पण ६/१३३

216 वस्तूत्थापमसंफेटो संक्षिप्तिरवपातनम्। इति भेदास्तु चत्वारः आरभट्याः प्रकीर्तिताः। साहित्यदर्पण ६/१३४

217 मायाद्युत्थापितं वस्तु वस्तूत्थापनमुच्यते। साहित्यदर्पण ६/१३४

218 संफेटस्तु समाघातः क्रुद्धसत्वरयोर्द्वयोः। साहित्यदर्पण ६/१३४

219 संक्षिप्ता वस्तुरचना शिल्पैरितरथापि वा। संक्षिप्तिस्यान्निवृत्तौ च नेतुर्नेत्रन्तरग्रहः॥ साहित्यदर्पण ६/१३३४-१३५

220 प्रवेशत्रासनिष्क्रान्तिहर्षविद्रवसंभवम्। अवपातनमित्युक्तम्। साहित्यदर्पण ६/१३५

221 "विचित्रैरङ्गहारैस्तु देवो लीलासमन्वितैः। बबन्ध यः शिखापाशं कैशिकी तत्र निर्मिता"॥ नाट्यशास्त्र २२/१३

 ISSN 0976-8645

हास्यशृङ्गारादिचेष्टादिभिः विचित्रायुक्ता, नाट्य-नृत्त-गीत-वाद्ययुक्त-स्त्रीपात्राणामधिकतया समन्विता वृत्तिः कैशिकी।[222] भरतमुनिनाऽपि एताः विविधविशिष्टाः कैशिक्याः कथिताः।[223]

विश्वनाथेनापि भरतसमर्थितमेव कैशिक्याः लक्षणं कृतम्।[224] दशरूपकारेण अस्याः चत्वारः भेदाः स्वीकृताः। नर्म, नर्मस्फुर्जः, नर्मस्फोटः, नर्मगर्भश्च।[225] प्रियजनाकर्षणाय बहुप्रकारककुशलक्रीडाविलासं नर्म कथ्यते।[226] तस्य त्रिविधविशेषता- शुद्धहास्यः, शृङ्गारमिश्रितहास्यः, भयमिश्रितहास्यश्च। नायकनायिकयोः प्रथममिलनावसरे सुखं अन्ते च भयोत्पादकं यत्र वर्ण्यते सः नर्मस्फूर्जः कथ्यते।[227] विविधभावानां किञ्चिदशैः रससृजनं नर्मस्फोटः।[228] प्रच्छन्ननायकस्य कार्यवशाद् नायिकया सह प्रच्छन्नप्रेमव्यवहारः नर्मगर्भः।[229]

एताः भारतीसात्त्वत्यारभटीकैशिकीषु उत्तममध्यमाधमप्रकृतिकपुरुषाणां स्त्रीणाञ्च चेष्टाव्यापाराः प्रदर्श्यन्ते। एतासु शरीरवाङ्मनसां चेष्टाः भवन्ति। एतेषु भारतीवृत्ति वाग्प्रधाना, सात्त्वतीवृत्तिः मनोव्यापारप्रधाना, आरभटी शरीरव्यापारप्रधाना, सौन्दर्योपयोगीशरीरव्यापारप्रधाना कैशिकीवृत्तिः वर्तते। आनन्दवर्धनानुसारेण भारतीवृत्तिः शब्दवृत्तिः, अन्याश्च अर्थप्रधानाः वर्तन्ते। अग्निपुराणानुसारेण भोजानुसारेण च एताः वृत्तयः अनुभावरूपे बुद्ध्यारम्भकः व्यापाराः वर्तन्ते। भोजेन 'विमिश्रा' नाम्ना पञ्चमी वृत्तिः स्वीकृता। उद्भटानुययिनाः अपि 'अर्थवृत्तिः' नाम्ना पञ्चमी वृत्तिः स्वीकुर्वन्ति (पञ्चमीं वृत्तिमौद्भटाः प्रतिजानते)। एतासु भारतीवृत्तिः वाग्प्रधानतया सर्वेषु रसेषु भावेषु च निवसति। सात्त्वतीवृत्तिः वीराद्भुतरसयोः, आरभटी रौद्राभुतरसयोः, कैशिकी च हास्यशृङ्गारयोः च निवसति। अस्मिन् विषये विश्वनाथेनापि स्वमतं स्पष्टीकृतम्।[230]

---

222 नाट्यदर्पण पृ० १३९

223 "या श्लेक्षणनेपथ्यविशेषचित्रा स्त्रीसंयुता या बहुनृत्तगीता। कामोपभोगप्रभवोपचारा तां कैशिकीवृत्तिमुदाहरन्ति"॥ नाट्यशास्त्र २२/६४

224 या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसंकुला पुष्कलनृत्यगीता। कामोपभोगप्रभवोपचारा सा कैशिकी चारुविलासयुक्ता॥ साहित्यदर्पण ६/१२४

225 नर्मतत्स्फिञ्जतस्फोटतदगर्भैश्चतुरङ्गिका॥ दशरूपक २/४८

226 वैदग्ध्यक्रीडितं नर्म। साहित्यदर्पण ६/१२४

227 नर्मस्फूर्जः सुखारम्भो भयान्तो नवसंगमः॥ साहित्यदर्पण ६/१२६

228 नर्मस्फोटो भावलेशैः सूचिताल्परसो मतः॥ साहित्यदर्पण ६/१२७

229 नर्मगर्भो व्यवहृतिर्नेतुः प्रच्छन्नवर्तिनः॥ साहित्यदर्पण ६/१२८

230 शृङ्गारे कैशिकी, वीरेसात्त्वत्यारभटी पुनः। रसे रौद्रे च वीभत्से, वृत्तिः सर्वत्र भारती।

चतस्रो वृत्तयो ह्येता सर्वनाट्यस्य मातृकाः। स्युर्नायकादिव्यापारविशेषा नाटकादिषु॥ साहित्यदर्पण ६/१२२-१२३



[A First International Electronic Peer-reviewed Quarterly Refreed **UGC Approved** (41039 ) Sanskrit Tri-lingual Journal with **Impact Factor**]
**Available at-** www.jahnavisanskritejournal.in **Issue**-32nd , **Year** 08, **Vol** -I, **Date**-22/02/2018, **Place**- Madhubani ISSN 0976-8645

**रीतिः –**

रीतिविषये सर्वप्रथममुल्लेखः काव्यालङ्कारसूत्रवृत्तिग्रन्थे प्राप्यते। वामनमते **"विशिष्टा पदरचना रीतिः"**[231] इत्यनुसारेण सा रीतिः काव्यस्यात्मभूतत्वेन विशिष्टानां पदानां रचना एव। रीतिर्नाम **"रीणन्ति गच्छन्त्यस्यां गुणा इति, रीयते क्षरत्यस्यां वाङ्मधुधारेति वा रीतिः। अधिकरणार्थे क्तिन् प्रत्ययः।**[232] यद्यपि वामनमते रीतिरेवात्मा परं काव्यं तदा एव ग्राह्यं भवति यदा अलङ्कारयुक्तं भवति, एवं प्रथमसूत्रे एव तेन प्रदर्शितम्।[233] यद्यपि आनन्दवर्धनेन स्पष्टरूपेण रीतेः नामोल्लेखः न कृतः, तथापि असलक्ष्यक्रमध्वनौ तेन सङ्घटना विषये चर्चा कृता। सङ्घटनास्वरूपविषये उक्तं यत्- **"असमासा समासेन मध्यमेन च भूषिता। तथा दीर्घसमासेति त्रिधा सङ्घटनोदिता"॥**[234] तन्मते सङ्घटना माधुर्यादीनां गुणानामाश्रयणं कृत्वा रसान् व्यनक्ति। यथा- **"गुणानाश्रित्य माधुर्यादीन्व्यनक्ति सा। रसान्-**[235]। कुन्तकेन मार्गभेदचर्चावसरे कविप्रस्थानहेतु माध्यमेन उत्तममध्यमाधमभेदेन तस्य त्रैविध्यं स्वीकृतम्।[236]

तत्र मध्यमः उभयात्मकः। कुन्तकेन देशाधारेणस्वीकृताः रीतयः खण्डिता। तेषां मते चतस्र एव वृत्तयः कथं सर्वप्रदेशाधारिता स्वीक्रियन्ते, एतत्दोषः।

प्रायः आचार्यैः रीतिवृत्तिप्रवृतिमध्ये भेदः स्थापितः, तथापि प्रायः केचनाचार्याः वृत्तिशब्दस्य प्रयोगः न स्पष्टतया पृथक् तया न कृतवन्तः मम्मटेन अनुप्रासभेदे एव वृत्तिशब्दस्य प्रयोगः कृतः। अग्निपुराणे रीतिवृत्तिप्रवृत्तीन् बुद्ध्यारम्भकः स्वीकृतः, अग्निपुराणानुसारेण वक्तृत्वकला एव रीतिः- "वाग्विद्यासम्प्रतिज्ञाने रीतिः"।[237] वक्तृत्वकला यदि अभिव्यक्तेः रूपान्तरं स्वीक्रियते चेत्, रीतेः अर्थावबोधः सारल्येन भवति। भोजेन 'रीङ् गतौ' धातुना 'क्तिन्' प्रत्यये कृते रीतिशब्दः निष्पादितः, तस्यार्थः वर्तते मार्गः। यथोक्तम्- "वैदर्भादिकृतः पन्थाः काव्ये मार्ग इति स्मृतः। रीङ्गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते"।[238]

वामनेन 'विशिष्टपदरचना रीतिः', आनन्दवर्धनेन 'पदसंघटना रीतिः', कुन्तकेन 'कविप्रस्थानहेतुः' रीतिः राजशेखरेण च 'वचनविन्यासक्रमं रीतिं' स्वीकृतम्। नाट्यशास्त्रे चतुर्विधप्रवृत्ति देशभाषाचार-

---

231 काव्यालङ्कारसूत्रे, 1/2/7

232 तत्रैव, 1/6/2

233 काव्यं ग्राह्यं अलङ्कारात्- काव्यालङ्कारसूत्रे, 1/1/1

234 ध्वन्यालोक ३/५

235 ध्वन्यालोक ३/६

236 "सम्प्रति तत्र ये मार्गाः कविप्रस्थानहेतवः। सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः"॥ वक्रोक्तिजीवितम् १/२४

237 नाट्यशास्त्र का इतिहास, पृ० ३४१ (पारसनाथ द्विवेदी))।

238 नाट्यशास्त्र का इतिहास, पृ० ३४१ (पारसनाथ द्विवेदी))।

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani 0976-8645

विचाराश्रितास्तु वर्तते, परं रीतिविषये चर्चा वर्तते। यथोक्तम्- **“चतुर्विधा प्रवृत्तिश्च प्रोक्ता नाट्यप्रयोगतः। आवन्ती दाक्षिणात्या च पाञ्चाली औड्रमागधी”॥**[239]

अतः देशप्रदेशयोः विशिष्टाधारेण प्रवृत्तयोः नाट्ये प्रचलिताः, नाट्यशास्त्रस्य विवेचनानुसारेण रीतिविवेचनं अग्निपुराणे कृतम्। अग्निपुराणकारेण देशाधारेणैव रीतेः चतस्रः भेदाः स्वीकृता- वैदर्भी, गौडी, पाञ्चाली लाटी च। एताः वस्तुतः नाट्यप्रवृत्त्यानुरूपा एव। वैदर्भी दाक्षिणात्यानुरूपा, गौडी औड्रमागध्यानुरूपा, पाञ्चाली पाञ्चाल्यानुरूपा, लाटीश्च आवन्त्यानुरूपा वर्तते। मम्मटेन अनुप्रासालङ्कारान्तर्गतं उपनागरिका, परुषा कोमलाश्च त्रयः वृत्तयः स्वीकृताः। तेषानुसारेण वामनेन तिस्रः वृत्तयः वैदर्भी गौडी पाञ्चालीश्च स्वीकृताः। मम्मटेन नियतवर्णगतं रसविषयकव्यापारमेव वृत्तिः स्वीकृता। मम्मठेन वैदर्भी, गौडी पाञ्चाली च तिसृणां वृत्तीनां उक्तेषु त्रयेषु एव अन्तर्भावः कृतः। रुद्रटेन मधुरा, प्रौढ़ा, परुषा, ललिता भद्रादयः पञ्च वृत्तयः स्वीकृताः।

यद्यपि संस्कृतकाव्यशास्त्रीय परम्परायां रीतिवृत्तिप्रवृत्तीनामुल्लेखः सर्वाचार्यैः न कृतम्। तथापि दृश्यते चेत्, प्रायः वृत्तीनां प्रवृत्तीनाञ्च प्रयोगः नाट्ये एव उचितम्, श्रव्यकाव्ये यद्यपि प्रयोगः क्रियते चेत्, तदा तादृशः वैशिष्टयं न भविष्यति यथा नाट्ये। एतदर्थमेव मम्मटेन अनुप्रासस्य भेदेषु एव वृत्तीनां चर्चा कृता। तत्सर्वं शब्दाधारितम्। आचार्येण उद्भटेनापि वृत्तीनां शब्दाधारित्वं स्वीकृतम्।[240]

अतः उद्भटस्य वृत्तिविषये मम्मटमिव साम्यं वर्तते। या शब्दाधारिता एव। वस्तुतः नाट्यशास्त्रे वर्णितेषु वृतिषु एव रीतयोऽन्तर्भावः भवति। परं नाट्यशास्त्रे तस्याः प्रयोगः वेषभूषाभाषामाध्यमेन च क्रियते। तथैव रीतेः प्रयोगोऽपि शब्दाधारितमेव। अतः प्रायः मम्मठस्य वृत्तेः रीतेश्च स्वभावः पृथक् न वर्तते। तेन पृथक् पृथग्रूपेण तयोः वर्णनमपि न कृतम्। तथैव साहित्यदर्पणकारेण पृथग्रूपेण वृत्तेः प्रतिपादनं न कृतम्। रीतेः एव चर्चा कृता। यथा- **“पदसंघटना रीतिरङ्गसंस्थाविशेषवत्”, उपकर्त्री रसादीनाम्॥**[241]

**प्रवृत्तिः –**

प्रवृत्तिः पात्राणां वेशभूषया भाषया व्यवहारेण च सम्बद्धा भवति। नाट्यशास्त्रानुसारेण पृथिव्यां विभिन्नप्रदेशेषु प्रचलिताः नानावेशभूषा-भाषा-आचारविचार-वार्ता-इत्यादीनां ख्यापनकारिका वृत्तिरेव प्रवृत्तिः- **“पृथिव्यां नानादेशवेशभाषाचाराः वार्ताः ख्यापयतीति वृत्तिः, प्रवृत्तिश्च निवेदने”।** [242] अभिनवगुप्तेन येषु येषु प्रदेशेषु या वेशादिरचना भाषा च प्रचलिता, या आचारविचारव्यवहारश्च, या वार्ताकृषिपशुपालनवाणिज्यादिजीविका च वर्तते, तस्य प्रत्याख्यापिका प्रवृत्तिरेव इति उक्तम्। यतोहि

[239] नाट्यशास्त्र १४/३६

[240] “शषाभ्यां रेफसंयोगैष्टवर्गेण च योजिता। परुषा नाम वृत्तिः स्याद् ह्वह्वह्याद्यैश्च संयुता॥

सरूपसंयोगयुतां मूर्ध्नि वर्गान्त्ययोगिभिः। स्पर्शैर्युतां च मन्यन्त उपनागरिकां बुधाः॥

शेषैर्वर्णैर्यथायोगं कथितां कोमलाख्यया। ग्राम्यां वृत्तिं प्रशंसन्ति काव्येष्वाद्रुतबुद्धयः॥ काव्यालङ्कारसारसङ्ग्रह १/५-७

[241] साहित्यदर्पण ९/१

[242] नाट्यशास्त्र, (नाट्यशास्त्र का इतिहास, पृ० ३३९ (पारसनाथ द्विवेदी))।



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved (41039 ) Sanskrit Tri-lingual Journal with Impact Factor] ISSN
Available at- www.jahnavisanskritejournal.in Issue-32nd , Year 08, Vol -I, Date-22/02/2018, Place- Madhubani 0976-8645

बाह्याद्यर्थविषयेषु निवेदनम् अर्थात् निःशेषज्ञानरूपार्थे प्रवृत्तिः शब्दः वर्तते। यथोक्तम्- **“देशे देशे येष्वेव वेषादयो नैपथ्यं भाषा वा आचारो लोकशास्त्रव्यवहारः वार्ता कृषिपशुपाल्यादिजीविका इति तान् प्रख्यापतीति पृथिव्यादिसर्वलोकविधाप्रसिद्धिं करोति। प्रवृत्तिः बाह्यार्थे यस्मान् निवेदने निःशेषेण वेदने ज्ञाने प्रवृत्तिशब्दः”।**[243]

प्रवृत्तिः विभिन्नदेशानां वेशभूषाभाषाव्यवहारादिज्ञानानां साधनं वर्तते। राजशेखरानुसारेण विलासविन्यासक्रमं वृत्तिः, वेष-विन्यासक्रमञ्च प्रवृतिः वर्तते। परवर्त्याचार्यैः भरतस्य वृत्तौ एव रीतेः समावेशः कृतः। प्रवृत्तिस्तु मुख्यत्वेन बाह्यवेशभूषा-आचारविचार-भाषा-व्यवहारैश्च सम्बद्धा वर्तते। राजशेखरानुसारेण भोजेनापि वेशविन्यासक्रमरूपमेव प्रवृत्तेः स्वीकृतम्।[244] धनञ्जयेन शारदातनयेन च देशवेषभाषान्यव्यवहाररूपे च प्रवृत्तिः स्वीकृता।[245] वस्तुतः प्रवृत्तिः आहार्याभिनयेन सम्बद्धा भवति। प्रवृत्तयः वेशभाषाव्यवहारादिभिश्च नाट्यप्रयोगे सहायिका भवति। भरतेन चतस्रः प्रवृत्तिः स्वीकृताः। उक्तं भरतेन-

**“आवन्ती दाक्षिणात्या च तथा चैवोड्रमागधी। पाञ्चालमध्यमा चेति विज्ञेयास्तु प्रवृत्तयः॥**[246]

दाक्षिणात्या – दाक्षिणात्यप्रदेशेषु केरलमहेन्द्रमलयसयमेकलादिप्रदेशेषु विध्यदक्षिणसागरेषु स्थितेषु द्रविणान्ध्रमहाराष्ट्रवनवासकोसलादिप्रदेशेषु वेषभूषायाः, वाग्व्यवहारस्य भाषायाश्च साम्यं प्राप्यते। अतः एतेभ्यः दाक्षिणात्यप्रवृत्तेः उल्लेखः कृतः।[247] अत्रत्यः जनानां नृत्यगीतवाद्यादिषु बहुरुचिः वर्तते, अतः चतुरललितमधुराभिनयः प्रसिद्धः वर्तते।[248] एषा प्रवृत्तिः शृङ्गारप्रधाना वर्तते।

अवन्तिका – अवन्तिकाप्रदेशेषु अवन्तीविदिशासौराष्ट्रमालवासिन्धुदशार्णादयः जनपदाः आगच्छन्ति। अत्रत्य जनानां वेषभूषाभाषाचारविचाराश्च साम्ययुक्ताः वर्तते। एतेषु प्रायः कैशिकीसात्वतीवृत्तिश्च प्राप्यते। अत्रत्य नाट्यप्रयोगे पात्राणां भाषावेषभूषा च तदनुरूपा एव।[249] नाट्यप्रयोगे तत्तद्देशजवेशादयाः आवश्यकाः।

[243] अभिनवभारती, भाग २, (नाट्यशास्त्र का इतिहास, पृ० ३४० (पारसनाथ द्विवेदी))।

[244] काव्यमीमांसा पृ० ९

[245] दशरूपक २/६३-७१, भावप्रकाशन, पृ० ३१०-३१३ (नाट्यशास्त्र का इतिहास, पृ० ३४० (पारसनाथ द्विवेदी))।

[246] नाट्यशास्त्र पृ० १७८ (ब्रजवल्लभ द्विवेदी)

[247] नाट्यशास्त्र १२/,३९-४१

[248] तत्र दाक्षिणात्यास्तावत् बहुनृत्तगीतवाद्याः कैशिकी प्रायः चतुरमधुरललिताङ्गाभिनयाश्च। नाट्यशास्त्र, अभिनवभारती (नाट्यशास्त्र का इतिहास, पृ० ३४० (पारसनाथ द्विवेदी))।

[249] नाट्यशास्त्र १२/४२-४३

औड्रमागधी – अङ्गबङ्गकलिङ्गवत्सौड्रमागधपौण्ड्रविदेहादयेषु प्रदेशेषु औड्रमागधीवृत्तिः प्राप्यते। अस्यां आरभटीवृत्तिः प्राप्यते। अत्रत्य जनाः स्वदेशाधारितानि अभिनयानि कुर्वन्ति।[250]

पाञ्चालमध्यमा पाञ्चाली वा – पाञ्चालशूरसेनकाश्मीरहस्तिनापुरवाह्वीकमद्रादिप्रदेशेषु गङ्गायाः उत्तरप्रदेशे हिमालयस्य दक्षिणभागे आश्रितषु प्रदेशेषु एषा वृत्तिः प्राप्यते।अत्र गीतप्रयोगाः न्यूनरूपेण प्राप्यन्ते। अस्यां प्रवृत्तौ सात्त्वत्यारभटीवृत्तेश्च प्राधान्यं भवति।[251]

नाट्यशास्त्रे प्रवृत्त्यानुसारं रङ्गमञ्चे एव पात्राणां प्रयोगविधानं कथितम्। तदनुसारेण आवन्तीदाक्षिणात्यप्रवृत्त्योः जनाः दक्षिणपार्श्वभागात् पाञ्चाली-औड्रमागधीप्रवृत्तयोः जनाः वामपार्श्वभागात् रङ्गमञ्चे प्रवेशं कुर्वन्ति। प्रवेशद्वारे सति आवन्तीदाक्षिणात्यप्रवृत्त्योः जनाः नाट्यगृहे उत्तरद्वारेण पञ्चाली-औड्रमागधीप्रवृत्तयोः जनाः दक्षिणद्वारेण प्रवेशं कुर्वन्ति।[252] स्वस्वप्रदेशानुरूपं प्रवृत्तिमनुसृत्यमेव अभिनयः करणीयः इति भरतवचनम्।

**टिप्पणी -**

यद्यपि संस्कृतकाव्यशास्त्रीय परम्परायां रीतिवृत्तिप्रवृत्तीनामुल्लेखः सर्वाचार्यैः न कृतम्। तथापि दृश्यते चेत्, प्रायः वृत्तीनां प्रवृत्तीनाञ्च प्रयोगः नाट्ये एव उचितम्, श्रव्यकाव्ये यद्यपि प्रयोगः क्रियते चेत्, तदा तादृशः वैशिष्ट्यं न भविष्यति यथा नाट्ये। एतदर्थमेव मम्मटेन अनुप्रासस्य भेदेषु एव वृत्तीनां चर्चा कृता। तत्सर्वं शब्दाधारितम्। अतः देशप्रदेशयोः विशिष्टाधारेण प्रवृत्तयोः नाट्ये प्रचलिताः, नाट्यशास्त्रस्य विवेचनानुसारेण रीतिविवेचनं अग्निपुराणे कृतम्। अग्निपुराणकारेण देशाधारेणैव रीतेः चतस्रः भेदाः स्वीकृता- वैदर्भी, गौडी, पाञ्चाली लाटी च। एताः वस्तुतः नाट्यप्रवृत्त्यानुरूपा एव। वैदर्भी दाक्षिणात्यानुरूपा, गौडी औड्रमागध्यानुरूपा, पाञ्चाली पाञ्चाल्यानुरूपा, लाटीश्च आवन्त्यानुरूपा वर्तते। मम्मठेन वैदर्भी, गौडी पाञ्चाली च तिसृणां वृत्तीनां उक्तेषु त्रयेषु एव अन्तर्भावः कृतः। रुद्रटेन मधुरा, प्रौढ़ा, परुषा, ललिता भद्रादयः पञ्च वृत्तयः स्वीकृताः। अतः प्रायः वृत्तिरीतिमध्ये काव्यदृशा भेदः सत्यं, वृत्ते चर्चा नाट्ये उचिता, रीतेश्च श्रव्यकाव्ये। तथैव प्रवृत्तेरपि नाट्ये एव वर्णनमुचितम्। एवं काव्याधारितमेव एतेषां प्रयोगः उचितः। तासु भेदः काव्यधारेण वर्णनाधारेण च वर्तते। यतो हि प्रायः आचार्यैः नाट्ये कैशिकीवृत्तेः ग्रहणं सुनिश्चितम्, तया विना न रूपकाणि न सिध्यन्ति। पुनः काव्येषु संघटनायाः महत्वं प्रायः वर्तते। प्रवृत्तिप्रयोगस्तु दृश्ये श्रव्ये च।

**सन्दर्भग्रन्थसूची**

१.आनन्दवर्धनः, ध्वन्यालोकः (व्या०- आचार्यः जगन्नाथ पाठकः), वाराणसी : चौखम्बा विद्या भवनम्, २०११.

10. विश्वनाथः, साहित्यदर्पणः (व्या०- शालिग्रामशास्त्री), प्रकाशनम्- मोती लाल बनारसीदास, संस्करण- २००५.

11. मम्मटः, काव्यप्रकाशः (व्या०- आचार्यः विश्वेश्वरः), वाराणसी : चौखम्बा सुरभारती प्रकाशनम्, २००३.

[250] नाट्यशास्त्र १३/,४५-४८

[251] नाट्यशास्त्र १३/४९-५०

[252] नाट्यशास्त्र १२/५२-५४





12. कुन्तकः, वक्रोक्तिजीवितम् (व्या०- परमेश्वरदीनपाण्डेय), वाराणसी : चौखम्भा सुरभारती प्रकाशन, २०१३.

13. भामहः, काव्यालंकार, बिहार राष्ट्रभाषा परिषद्, पटना, १९८५.

14. जगन्नाथः, रसगंगाधरः (व्या०- मदन मोहन पाठक), वाराणसी : चौखम्भा विद्या भवन, २०११.

15. वामनः, काव्यालंकारसूत्रवृत्तिः, वाराणसी : चौखम्भा विद्या भवन, २०११.

16. भरतः, नाट्यशास्त्र (व्या०- ब्रजमोहन चतुर्वेदी), वाराणसी : चौखम्भा विद्या भवन, २०११.

17. महिम भट्टः (व्या०- ब्रह्मानन्द त्रिपाठी), वाराणसी : चौखम्भा सुरभारती प्रकाशन, २०११.

18. द्विवेदी. पारसनाथ, नाट्यशास्त्र का इतिहास, वाराणसी चौखम्बा सुरभारती प्रकाशन, २००४.

19. उपाध्याय. बलदेव उपाध्याय, संस्कृत शास्त्रों का इतिहास, वाराणसी : चौखम्बा विद्या भवन, २०१०.

20. उपाध्याय. बलदेव उपाध्याय, संस्कृत साहित्य का इतिहास, वाराणसी : शारदा निकेतन, २००१.

Paper Received- 19/01/2018 Paper Published- 22/02/2018

# शिक्षण प्रक्रिया में योग शिक्षा की उपादेयता

**प्रदीप कुमार झा**
असि. प्रो. शिक्षाशास्त्र–विभाग
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् नवदेहली – 110016

*************************************************************************************

**प्रमुखशब्दाः-** भाषा शिक्षण. नवाचारी.अभ्यास।

**शोधसार-** किसी भी भाषा के शिक्षण के लिए नवाचारी अभ्यास का होना अत्यन्त ही आवश्यक है। नवाचारी विधियों, प्रयोगों या उपागमों का जितना अधिक से अधिक प्रयोग होगा, अधिगम का स्तर उतना ही सरल, अधिक और स्थायी होगा। नवाचारी विधियाँ अधिगम के लिए जिज्ञासा और रुचि उत्पन्न करने में अत्यधिक कारगर होते हैं। तकनीकी और मनोविज्ञान के सन्दर्भ में तो नवाचारी अभ्यास प्रायशः देखे ही जाते हैं परन्तु योगशिक्षा के सन्दर्भ में इसे बहुत कम ही देखा जाता है। जबकि ये नवाचारी अभ्यास प्राचीन काल से लेकर वर्तमान समय में प्रत्यक्ष और अप्रत्यक्ष रूप से यत्र–तत्र–सर्वत्र देखे और अनुभव तथा जाने–अनजाने में प्रयोग किए जाते हैं। वस्तुतः योग शिक्षा की प्रकृति दर्शन–परक है और दर्शन ने हमेशा ही शिक्षा को उ `श्य, विधि, प(ति, तकनीक आदि विभिन्न प्रकार के तत्त्वों से आलोकित किया है, इसलिए निश्चित है कि योग ने भी भाषा–शिक्षण को वैज्ञानिक रूप से समृ( किया है।

*************************************************************************************

**'योगश्चित्तवृत्ति निरोधः'** अर्थात् चित्त की नकारात्मक वृत्तियों को रोकना ही योग है। चित्त इन्द्रियों के मा यम से ज्ञान का अर्जन और क्रियाओं का सम्पादन करता है, इसलिए चित्त का निर्मल और निर्विकारी होना आवश्यक है। जब चित्त विभिन्न प्रकार के भ्रमात्मक ज्ञान से स्वयं को हटाकर **'यम–नियम–आसन–प्राणायाम–प्रत्याहार–धरणा– यान– समाधि'** के द्वारा स्वरूपशून्य अर्थात् निर्धरित परमलक्ष्य में अपने को सम्पूर्ण समाहित कर लेता है तो वही योग की पूर्णता कहलाती है। इस प्रक्रिया को शिक्षाशास्त्र में अधिगम–अनुभव की पूर्ण अवस्था बताया गया है तथा इसकी प्रक्रिया पर अत्यधिक बल दिया गया है। इसमें बताया गया है कि समाधि की अवस्था में अधिगम–कर्ता अधिगम–अवस्था के सबसे निकटस्थ स्तर पर होता है। अष्टाङ्ग योग की प्रथम अवस्था **'यम'** शिक्षार्थी के चारित्रिक शुचिता को व्यक्त करता है तथा उसकी विधियों को अहिंसा, सत्य, अस्तेय, ब्र चर्य और अपरिग्रह इन पाँच व्यवहारों के द्वारा बताया गया है। **'नियम'** में शौच, सन्तोष, तप, स्वा याय तथा ईश्वर या गुरु के प्रति पूर्ण श्र(1 का भाव होना ही नियम है। **'आसन'** का निहितार्थ है कि शिक्षक और शिक्षार्थी सुखपूर्वक स्थिरता के साथ विषयवस्तु के साथ अपने आपको जोड़ें। **'प्राणायाम'** में जहाँ श्वास–प्रश्वास के द्वारा आन्तरिक–क्रिया को बा –क्रिया के साथ संतुलित किया जाता है वहीं इसका सम्बन्ध अ ययन और अ यापन से भी साक्षात् जुड़ा हुआ है। अ ययन के द्वारा ज्ञान प्राप्त करना तथा उसके बाद उस पर श्रवण–मनन–निदि यासन की प्रक्रिया के द्वारा तत्त्व पर





विचार करना, पिफर अ यापन के द्वारा व्यक्त करना ही प्राणायाम का शैक्षिक स्वरूप है। प्रत्याहार में इन्द्रियों को भटकावपूर्ण मार्गों से हटाकर किसी एक निश्चित स्वरूप की ओर प्रेरित किया जाता है और जब इन्द्रियों का नियंत्रण हो जाता है तो चित्त किसी एक निर्धरित उ `श्य की ओर प्रवृत्त हो जाता है और यही **'धरणा'** कहलाती है। चित्त की प्रवृत्ति के बाद जब लगातार उसी उ `श्य पर विचार या चिन्तन किया जाता है तो यही **' यान'** का स्वरूप होता है। यान के बाद जब शिक्षार्थी उस विषयवस्तु को अपने में आत्मसात् कर लेता है तो यही **'समाधि'** कहलाती है। जिस प्रकार नदी अपने–आपको समुद्र में समाविष्ट कर एकत्व बोध की स्थिति में आ जाती है, वही समाधि का वास्तविक स्वरूप होता है। इस प्रकार यौगिक–प्रक्रिया के अनुसार ही शैक्षिक–प्रक्रियाओं का भी क्रियान्वयन होता है।

वस्तुतः अन्य दर्शन जहाँ मानसिक और आ यात्मिक पक्ष को रखते हुए अमूर्त तर्कों के द्वारा अमूर्त्त विषयों का चिन्तन करते हैं वहीं योग दर्शन शारीरिक, मानसिक एवं आ यात्मिक इन तीनों पक्षों के द्वारा प्रत्यक्ष साधन से अमूर्त्त विषयों का वैज्ञानिक चिन्तन करता है। इसी कारण से योग दर्शन और योग शिक्षा समाज के सभी वर्गों एवं क्षेत्रों में व्याप्त है तथा सभी के लिए उपयोगी एवं प्रभावी है।

आइये आज हम विभिन्न प्रमाणों के द्वारा यह अन्वेषण करने की कोशिश करते हैं कि भाषा–शिक्षण हेतु कौन–कौन से नवाचारी अभ्यास है जिसे योग–शिक्षा के सन्दर्भ में अर्थात् पृष्ठभूमि में पल्लवित और पुष्पित किए जाते हैं। योग–शिक्षा के द्वारा इन नवाचारी अभ्यासों से भाषा शिक्षण को किस प्रकार लाभ प्राप्त होते हैं।

**कण्ठस्थीकरण.** भाषा शिक्षण या किसी अन्य विषय के शिक्षण–अधिगम के लिए कण्ठस्थीकरण एक प्रमुख प्रायोगिक–क्रिया के समान है जिसमें अधिगमकर्ता अपने इन्द्रियों को नियन्त्रित करके तथा एकाग्रचित्त होकर वाक्यों, गद्यांशो, पद्यांशों या किसी भी विषय के तत्त्वों को बार–बार स्मरण करते हुए कण्ठस्थ करता है। इस कण्ठस्थीकरण की प्रक्रिया में अधिगम कर्ता योग के विभिन्न अंगों का परोक्षापरोक्ष रूप से प्रयोग करते हुए अभ्यास करता है तथा कण्ठस्थीकरण से अधिगम शक्ति को सपफल, स्थायी और प्रत्युत्पन्नमतित्व बनाता है। इस कण्ठस्थीकरण–प्रक्रिया में अष्टाङ्ग योग **;यमनियमासनप्राणायामप्रत्याहारधरणा यानसमाधिद्ध** अत्यन्त सहायक होते है। अष्टाङ्ग योग में जो दूसरा योग नियम है उसके अन्तर्गत आनेवाला स्वा याय ;योगद्ध कण्ठस्थीकरण–प्रक्रिया की प्रवृत्ति में सहायक सि( होता है। प्राणायाम की शक्ति को जागृत करके भी कण्ठस्थीकरण के स्तर में अधिकाधिक वृ( की जा सकती है। प्राणायाम कण्ठस्थीकरण के साथ–साथ भावार्थ स्पष्टीकरण में भी सहायक होते हैं। इस प्रकार कण्ठस्थीकरण की प्रक्रिया में योग शिक्षा अत्यन्त सहायक सि( होती है।

**उच्चारण शिक्षण.** श्रवण–पठन–वाचन एवं लेखन इन चार बुनियादी तत्त्वों का शिक्षण में बड़ा ही महत्त्व है। श्रवण के बाद पठन एवं वाचन इन दो तत्त्वों की स्वयं–सि(ता निर्विवादित है। उच्चारण में जहाँ वनियों को सन्तुलित वायु के साथ निश्चित स्थान के द्वारा प्रयोग किया जाता है। इच्छित शब्द या वर्ण के उच्चारण के लिए प्राणायाम की

अत्यन्त उपयोगिता देखी जाती है। प्राणायाम के द्वारा जहाँ वायु को श्वास–प्रश्वास के द्वारा सन्तुलित प्रयोग किया जाता है। प्राणायाम को सूत्रात्मक रूप में परिभाषित करते हुए महर्षि पतञ्जलि ने कहा है – **'तस्मिन्सति श्वास–प्रश्वासयोर्गतिविच्छेदः प्राणायामः'**। अर्थात् आसनसि( होने के बाद जब शरीर को किसी आसन में स्थिर करने में प्रयत्न की अपेक्षा न हो तथा बहुत काल तक स्थिर बैठने का अभ्यास हो जाए तो उसके बाद पूर्वोक्त यान सम्बन्धी आसनों में से किसी एक आसन में बैठकर श्वास अर्थात् बाहर से वायु अन्दर ग्रहण करके शरीर के अन्दर वक्षस्थल में स्थित वायु, जो शरीर की प्राण सम्बन्धी क्रियाओं का आधर है, को बाहर निकालकर उन्हें दोनों स्थिति में रोकने का अभ्यास करते हुए इस स्थितियों में पहुँचना कि श्वास और प्रश्वास दोनों ही क्रियाओं का अभाव हो जाए, प्राणायाम कहलाता है। इस प्राणायाम के द्वारा शब्दों या वर्णों के उच्चारण में कुशलता तथा स्पष्टता आती है। मस्तिष्क में एक कम्पन सी होती है जिससे शब्दोच्चारण विकाररहित तथा प्रभावी होता है।

**वाचन** संस्कृतभाषा शिक्षण के अन्तर्गत या किसी अन्य भाषा शिक्षण अध्गिम के लिए वाचन विशिष्ट कारक है। चूँकि वाचन में लय, गति, यति, छन्द, अलघ ार, विरामादि चिथों के अनुरूप ही प्रक्रियाओं का अनुकरण करना होता है इसलिए यहाँ योग के विभिन्न अघ ों की उपयोगिता देखी जा सकती है। पद्य–शिक्षण में जहाँ सस्वर–वाचन की जरुरत होती है तथा बड़े–बड़े छन्द से सम्बन्धित पद्यों का गायन किया जाता है। इन गायनों में श्वास को रोककर या दीर्घ श्वास लेकर ही इसे पूरा किया जाता है जो योग के प्राणायाम के द्वारा ही सम्भव है। प्राणायाम के द्वारा ही शास्त्रीय–सघ ीत के सात–सुरों को इतना लम्बा और सुरीला बना पाना सम्भव हो पाता है। इसी प्रकार गद्य–वाचन या आदर्श–वाचन में भी विभिन्न आसनों का प्रयोग अपेक्षित हो जाता है तथा यान का महत्त्व कापफी सकारात्मक हो जाता है। यान के बारे में योगसूत्रकार ने बताया है – **'तत्र प्रत्यैकतानता यानम्'**। अर्थात् वाचन के क्रम में विरामादि चिथों को अवधनपूर्वक उच्चारण करके उसके भावार्थ के प्रति यानकेन्द्रित करना। स्वरों का उतार–चढ़ाव इत्यादि सभी योग से प्रेरित होते हैं। इन्हीं शिक्षण के सोपानों में मौन–वाचन का सोपान भी आता है जहाँ शिक्षार्थी मौनपूर्वक अपने इन्द्रियों को नियन्त्रित करके विषय पर यान केन्द्रित करता है और अर्थावबोध के लिए बारम्बार मानसिक प्रयत्न करता रहता है। मौनवाचन में स्वा याय ;नियमद्ध प्रत्याहार तथा समाधि की भागीदारी देखी जा सकती है। जिस प्रकार प्रत्याहार में इन्द्रियों को बा जगत से हटाकार मुख्य विषय पर यानकेन्द्रित किया जाता है उसी प्रकार मौनवाचन में भी शोर–शराबे तथा दृश्य जगत से हटकर मुख्य वाचन की सामग्री पर यान केन्द्रित करना होता है तथा समाधिवत् उस विषय–ज्ञान को आत्मसात् करना पड़ता है।

**क्रीडा विधि** संस्कृत शिक्षण को अधिक से अधिक प्रभावी और रुचिकर बनाने के लिए क्रीडा विधि का प्रयोग किया जाता है। पद्यात्मक क्रीडा में अन्त्याक्षरी, पद्यगायन और पहेलियों का प्रयोग किया जाता है जिससे मस्तिष्क की चिन्तन–शक्ति जागृत होकर व्यावहारिक होती है। गद्यात्मक–क्रीडा के लिए शब्द–निर्माण, वर्ण–संयोजन इत्यादि का प्रयोग किया जाता है क्रीडा–विधि में योग का रचनात्मक योगदान देखा जाता है।





अन्त्याक्षरी में जहाँ ' **यान**' और **'स्वा याय'** के द्वारा एकाग्रचित्त होकर क्रीडा द्वारा अध्गिम होता है। इन सभी विधियों में अष्टाघ योग किसी न किसी प्रकार से सहायक सि( है। अतः क्रीडा विधि नवाचारी अभ्यास के लिए योग शिक्षा हर प्रकार से उपयुक्त एवं उपकारी है।

**निष्कर्ष** प्रस्तुत पत्र में भाषा–शिक्षण हेतु नवाचारी अभ्यास को योग शिक्षा के सन्दर्भ में उपस्थापित किया गया है। यथेष्ट अध्गिम स्तर को प्राप्त करने के लिए शिक्षण के नवाचारी–अभ्यास का अत्यन्त महत्त्व है। परन्तु योग–शिक्षा के सन्दर्भ में इसका नूतन प्रयोग दिखाई दे रहा है। यद्यपि इसका प्रयोग तो प्राचीन समय से ही दिखाई देता रहा है। योग के इन नवाचारी अभ्यासों से शिक्षण में कई लाभ हुए हैं। कण्ठस्थीकरण में इन्द्रिय–नियन्त्रण के द्वारा उचित उ ेश्य की प्राप्ति होती है। इसमें प्राणायाम, यान, धरणा और प्रत्याहार के द्वारा मन–मस्तिष्क का व्यवस्थापन करके विषयवस्तु को आत्मसात् किया जाता है। जब विषयवस्तु आत्मसात् होता है तो कण्ठस्थीकरण की प्रक्रिया पूर्ण हो जाती है। उच्चारण शिक्षण में योग शिक्षा के सन्दर्भ में नवाचारी अभ्यास कापफी उपयोगी है। उच्चारण शिक्षण में वर्णों, शब्दों, वाक्यों के उच्चारण में प्राणायाम कापफी उपयोगी है। श्वास एवं प्रश्वास के द्वारा उच्चारण शक्ति का विकास होता है एवं प्राणायाम के द्वारा मस्तिष्क झंकृत होते हैं और उच्चारण स्थानों में तीव्रता उत्पन्न कर देती है जिससे उच्चारण स्पष्ट और शु( हो जाते हैं। वाचन में गति, यति, लय इत्यादि को समन्वित करने में योग की बड़ी भूमिका है। वाचन में आदर्श वाचन, अनुवाचन, सस्वर वाचन एवं मौन वाचन इत्यादि आते हैं और इन सभी के लिए प्राणायाम, प्रत्याहार, यान, धरणा इत्यादि अत्यन्त सहायक होते हैं। क्रीडा विधि में भी योग की सहभागिता प्रभावपूर्ण है। शब्दनिर्माण, वर्णसंयोजन, पद्यगायन, अन्त्याक्षरी इत्यादि में प्राणायाम, यान, धरणा एवं समाधि प्रभावपूर्ण भागीदारी निभाते हैं। इस प्रकार हम इस निष्कर्ष पर पहुँचते हैं कि भाषा शिक्षण हेतु नवाचारी अभ्यास का योग शिक्षा के सन्दर्भ में महत्त्वपूर्ण भूमिका एवं उपयोगिता है।

**सन्दर्भग्रन्थसूची-**

1. परमहंस, स्वामी अनन्त भारती, योग दर्शन, स्वामी केशवानन्द योग संस्थान, दिल्ली
2. पुरुषार्थी, योगेन्द्र ;1995, वेदों में योग विद्या, महर्षि वेद विद्या प्रतिष्ठान, उज्जैन
3. आत्रेय, शान्ति प्रकाश, योग मनोविज्ञान
4. शास्त्री, विजयपाल ;2007, पातञ्जल योग विमर्श, चौखम्बा प्रकाशन, वाराणसी
5. सिलोड़ी, महेशप्रसाद ;2008, योगामृतम्, मान्यता प्रकाशन, नई दिल्ली
6. सिलोड़ी, महेशप्रसाद ;2013, योगामृतम् एवं सि(ान्त, अभिषेक प्रकाशन, नई दिल्ली
7. शर्मा, हरीश कुमारी, योग दीपिका, कमला पब्लिशिंग हाउस, दिल्ली
8. कल्याण योग तत्त्व , गीता प्रेस, गोरखपुर

# Important dates for next Issue-

- ✓ DEADLINE FOR SUBMISSION- 01.03. 2018
- ✓ NOTIFICATION FOR ACCEPTANCE-15.03.2018
- ✓ INAUGRATION-01.04.208



**Send your paper**



bipinkumarjhaofficialid@gmail.com

jahnavisanskritjournal@gmail.com